CALCUTTA SANSKRIT COLLEGE RESEARCH SERIES NO. IV

श्रीहरिरामतर्कवागीशकृत-

# मुक्तिवादविचारः

S
181.43
H 225 M; 1

*Calcutta Sanskrit College Research Series No. IV*

Published under the auspices of the
Government of West Bengal.

TEXTS NO. 3

श्रीहरिरामतर्कवागीशकृत-

# मुक्तिवादविचारः

SANSKRIT COLLEGE
CALCUTTA
1959

*Board of Editors :*

Dr Radha Govinda Basak, M.A., Ph.D., *Chairman*

Dr Suniti Kumar Chatterji, M.A., D.Litt. (Lond)

Professor Durgamohan Bhattacharyya, M.A.,
Kāvya-Sāṃkhya-Purāṇatīrtha

Professor Ananta Kumar Nyāya-Tarkatīrtha

Dr Gaurinath Sastri, M.A., D.Litt.,
*Secretary and General Editor.*

CALCUTTA SANSKRIT COLLEGE RESEARCH SERIES NO. 4

# MUKTIVĀDAVICARAḤ

OF

ŚRĪ HARIRĀMA TARKAVĀGĪŚA

WITH THE COMMENTARY MUKTILAKṢMĪ

BY

MAHĀMAHOPĀDHYĀYA

KĀLĪPADA TARKĀCĀRYA

*Formerly Assistant Professor of Nyāya,*
*Government Sanskrit College, Calcutta.*

EDITED BY

JAGADISH CHANDRA BHATTACHARYA,
TARKATĪRTHA

*Assistant Editor, Publication Branch, Department of Post-Graduate Training and Research, Sanskrit College*

SANSKRIT COLLEGE
CALCUTTA
1959

*Published by*
The Principal, Sanskrit College,
1, Bankim Chatterjee Street, Calcutta 12

INDIAN INSTITUTE OF ADVANCED STUDY
1018
Date 8·10·65
SIMLA

S
181.43
H 225 M

**Price : Rupees ten only**

Library IIAS, Shimla
S 181.43 H 225 M-H 225 M: 1
00001018

*Printed by*
S. N. Guha Ray at Sree Saraswaty Press Limited.,
32, Acharjya Prafulla Chandra Road, Calcutta 9

कलिकातासंस्कृतमहाविद्यालयगवेषणाग्रन्थमाला—ग्रन्थाङ्कः ४

श्रीहरिरामतर्कवागीशकृत-

# मुक्तिवादविचारः

कलिकातासंस्कृतमहाविद्यालयस्य पाठशालाविभागीयाध्यक्षचरेण
महामहोपाध्यायपदलाञ्छनेन
**श्रीमता कालीपदभट्टाचार्य-तर्कतीर्थ-तर्काचार्येण**
विरचितया **मुक्तिलक्ष्मीति** व्याख्यया समलङ्कृतः

यथापेक्षितटिप्पन्यादिसंयोजनया
कलिकातासंस्कृतमहाविद्यालयस्थगवेषणाविभागान्तर्गतप्रकाशनविभागीय-
सहकारिसम्पादकेन तर्कव्याकरणतीर्थोपनामकेन
**श्रीजगदीशचन्द्रभट्टाचार्येण**
सम्पादितः

१८८०तमे शकवत्सरे कलिकातानगर्यां प्रकाशितः

# FOREWORD

I am very glad to be able to present to the world of scholars yet another work of Harirāma Tarkavāgīśa, preceptor of Gadādhara Bhattacharya of hallowed memory. When I thought of editing this work, I requested Mahāmahopādhyāya Kalipada Tarkācārya to write a running commentary in simple Sanskrit for the benefit of a wider circle of readers. Mahāmahopādhyāya in his earlier years published an edition of Gadādhara's Muktivāda, or more precisely, Nava Muktivāda with a commentary of his own under the auspices of the Sanskrit Sahitya Parishat, Calcutta, and so I considered that he would be the fittest person to undertake this work and attempt a comparative study between the productions of the teacher and his disciple. I felt particularly happy, therefore, when this savant acceded to my request and completed it in all earnestness defying the infirmities of age. I have, therefore, no words for adequately expressing my gratitude to him. I can only add that this Sanskrit College has always a place in his wide bosom and he can never refuse a call from it.

The editor of this work, Pandit Jagadish Chandra Tarkatīrtha, to whom goes the credit for the discovery of the manuscripts of Harirāma, has spared no pains in seeing it through; and for this the young scholar deserves our encouragement and appreciation.

GAURINATH SASTRI

# TABLE OF CONTENTS


| SUBJECT | | PAGE |
|---|---|---|
| 1. | Foreword | vii |
| 2. | English Introduction | xi |
| 3. | Manuscript Meterials ... | xiii |
| 4. | Sanskrit Introduction | xv |
| 5. | Text of *Muktivādavicāra* with the commentary *Muktilakṣmī* and Critical Notes | 1—96 |

The present work from the pen of Harirāma Tarkavāgīśa discusses the nature of emancipation (*apavarga* or *mukti*), a most interesting topic in Indian philosophy. Philosophers belonging to different systems of Indian thought agree in saying that emancipation is the ultimate goal of human existence and that there is complete freedom or release from misery in that state (*niśśreyasaṁ punar duḥkhanivṛttir ātyantikī. Atra ca vādinām avivāda eva. Kiraṇāvalī*, p. 62. ed. by G. Sāstri)—that is to say, an emancipated soul is no longer required to suffer from misery. Udayanācārya, the redoubtable Nyāya-Vaiśeṣika philosopher, describes emancipation as permanent (*atyanta*) cessation (*nivṛtti*) of misery (*duḥkha*), and writers who came after him have tried to explain the two terms, permanent (*atyanta*) and cessation (*nivṛtti*) in different ways. *Nivṛtti* means negation (*abhāva*) and 'permanent cessation' means absolute negation (*atyantābhāva*). Now, if emancipation is described as 'absolute negation of misery' it must be admitted that it is an eternal entity (*nitya*), for, absolute negation has been acknowledged to be an eternal entity by the Nyāya-Vaiśeṣika philosopher. But a difficulty arises and it is this: If emancipation be described as something eternal why should men strive at all to devise means for its achievement. An eternal entity is already there and it does not require any effort to achieve it. Yet the Śāstras prescribe various means which would enable an individual to secure emancipation. In the circumstances, it is suggested that the term *nivṛtti* means post-negation (*dhvaṁsābhāva*) which is not an eternal entity but a temporal product (*kārya* or *janya*). Emancipation, therefore, means 'post-negation of misery' and so it becomes quite understandable why men should devise means for its achievement. But one may enquire what is precisely meant by the term '*atyanta*' which is an adjective to the term '*nivṛtti*', or, in other words, what is meant by 'permanent post-negation' (*atyanta* or *ātyantika dhvaṁsa*). Scholars usually explain it in the following manner: Permanent post-negation of misery means such destruction of misery as is not contemporaneous with the pre-negation of any misery lying in the same locus that is the substratum for it. It is, therefore, that during our life-time so long as we have not as yet achieved emancipation, each destruction of misery being contemporaneous with the pre-negation of our misery cannot be counted as permanent post-negation of misery and so such destruction of misery will not be described as emancipation.

Harirāma thinks that the aforesaid definition of emancipation suffers from the defect that it is particularistic in character—that is to say, it is not one definition which extends to all cases of emancipation but each and every case of emancipation is defined individually. He, however, suggests that the defect may be removed if emancipation be described as the destruction of final misery and 'finality' in the context may be looked upon

as a universal inhering in misery. But this definition, too, is not free from defects and Harirāma points out that it is vitiated by cross-division (*sāṅkarya*).

Harirāma concludes this section by saying that the first definition mentioned above might be accepted if the defect could be removed by taking out from the body of the definition itself such portions as give the specific character to it and incorporating the same in the body of the relation. To be precise, the definition of emancipation would be as follows: Emancipation is the post-negation of misery which is different from the post-negation of misery that we experience during our life-time. Now the term 'different' in this definition requires elucidation and for that purpose we must refer to some relation in the light of which it is to be understood. That 'relation', it may be said, is the 'absence of contemporaneity with the pre-negation of misery in the same locus'. The relation, it may be pointed out, is, of course, specific but it is admitted on all hands that the relation, even if it be specific, does not constitute a defect.

Harirāma next proceeds to discuss the question whether *tattvajñāna* is the cause of emancipation and in that context he argues that if *tattvajñāna* be regarded as the cause of emancipation, the latter should be defined as the permanent post-negation of sin and not of misery, a view which has been referred to by his disciple Gadādhara in his *Nava Muktivāda* and which is strikingly original in the sense that it goes against the traditions of the Nyāya-Vaiśeṣika school.

It is, however, unfortunate that unlike Gadādhara, his teacher has not recorded the views of the different schools of philosophers on emancipation. Harirāma has referred to the view of the Tridaṇḍins only and given a fairly exhaustive criticism of the Tautātita school (which is, more often than not, wrongly identified with the Bhāṭṭa school) according to which emancipation is described as a manifestation of eternal bliss (*nityasukhābhivyakti*). The criticism of the Tautātita school exhibits our author's superb power of logical analysis and presentation. Indeed he revels as an astute dialectician and advances lines of criticism which are strikingly original.

Let us conclude our observations with a brief and modest comparison between the works of the master and his disciple. There can be no two opinions on the point that Gadādhara's style is more compact and forceful but it must redound to the credit of his *guru* that he is a staunch Naiyāyika and approaches the problem with the grit and ardour that does credit to one professing allegiance to the Nyāya-Vaiśeṣika school. It is really surprising to find that Gadādhara does not raise the issue at all how the definition of emancipation as 'permanent post-negation of misery' involves difficulties; almost all the Nyāya-Vaiśeṣika philosophers including commentators have made some contributions to this rather important question but Gadādhara remains absolutely silent about it.

GAURINATH SASTRI

The present edition of Harirāma Tarkavāgīśa's *Muktivāda-vicāra* has been prepared on the basis of four manuscripts preserved in the Calcutta Sanskrit College Library. The manuscripts on which the present edition is based are designated A B C and D. They are written on country-made paper in Bengali script. The writing of A seems to be the oldest. Details of the manuscripts are mentioned below:

A. Nyāya No. $\frac{17}{149}$

Substance—Paper
Size—17½″×3¼
Folios—Seven
Lines—Seven to a page
Date—not mentioned.

Writing of this Ms. faded. Occasional corrections appear on the margin. First folio begins with the page mark 83. It might have been bound along with other treatises of Harirāma. Unlike other mss. it does not contain any salutation to the Lord. It contains numerous lacunae. This is complete but not correct. It is severely damaged. The colophon reads "मुक्तिवादरहस्यम्"

B. Nyāya No. 17
Substance—Paper
Size—18¼″×3¼″
Folios—6
Lines—8 to a page, the last page containing four lines.
Date—not mentioned.

Writing of this Ms. is neat. This seems to be more correct. The Ms. has on its last page an entry "श्रीहरये नमः" and in the first page "ॐ लिपिलम्बोदराय ।" Square blanks are left at the centre of each folio. All folios have मुक्तिः written on the right margin. In the colophon we read "इति महामहोपाध्यायश्रीहरिरामतर्कवागीशभट्टाचार्यविरचितो मुक्तिवाद-विचारः सम्पूर्ण :"

C. Nyāya No. $\frac{17}{214}$
Substance—Paper
Size—16½″×3″
Folios—Eight
Lines—Five to Seven a page
Date—Not mentioned.

In this Ms. alternations by erasure are sometimes found. It provide us with a correct version. In the beginning we read "ॐ नमो परमात्मने". The colophon contains no reference to the name of the author, but only "इति मुक्तिवादरहस्यम् ॐ नमो गणेशाय". The folios have the edges slightly damaged.

D. Nyāya $\frac{17}{54}$

Substance—Paper
Size—$17\frac{1}{2}'' \times 4''$
Folios—Six
Lines—Nine to twelve a page
Date—Not mentioned.

This Ms. begins with अथ कस्तावदपवर्गः। The colophon reads श्रीहरिः सम्पूर्णोऽयं मुक्तिवादः। Slightly damaged. The first folio begins with page mark 1. From folio 60 we find another treatise of Harirāma.

J. C. T.

# पूर्वभाषणम्

वङ्गदेशीयनैयायिककुलचूडामणीनां तत्रभवतां गदाधरभट्टाचार्यपादानामध्यापकपादा महामहोपाध्यायहरिरामतर्कवागीशमहोदयाः खलु नव्यन्यायशास्त्रीयपाण्डित्यविशेषवशात् तदानीन्तने काले दिङ्मण्डलव्यापिनीं विशेषकीर्तिमावहता सर्वश्रेष्ठसम्मानसूचकेन "जगद्गुरु"संज्ञकेन विरुदरत्नेन विभूषिता इति तेषामध्यापनानैपुण्यं सुतरां प्रतिभाति। सर्वतन्त्रस्वतन्त्राणां तत्रभवतां हरिराममहोदयानां छात्रेषु गदाधर-रघुदेवावेव विशिष्टं प्रावीण्यमधिगतौ। परं सर्वत्र पण्डितमण्डलेषु सुविदितेऽपि गदाधरपाण्डित्ये रघुदेवोऽविदितप्राय एव। अध्ययनसमाप्त्यनन्तरं बहिर्वङ्गं तदीयाध्यापनमेव चात्र कारणमिति प्रतीयते। किञ्च रघुदेवविरचितानां ग्रन्थानां बहिर्वङ्गमेव विशेषतः प्रसिद्धिरासीत्।

कः खलु कालो हरिरामेण समलंकृत आसीदित्यत्र विशेषतः प्रमाणं नोपस्थापयितुं शक्यते। महत्या प्रचेष्टया च यत्किञ्चिल्लभ्यते तदपि तत्र विषये हस्तावलम्बं दातुं न प्रभवति। रघुदेवस्य गुरुपादानां कालनिर्णयविषये रघुदेवकालनिर्णयः प्रामाण्यपदवीमारोढुं शक्नुयादतस्तत्रैव किञ्चिद् यतनीयम्। तत्र रघुदेवकृत-"द्रव्यसारसंग्रहा"ख्यग्रन्थस्य पुष्पिकायां "सम्वत् १७५७, (खृः १७००) इति महामहोपाध्यायश्रीहरिरामतर्कवागीशभट्टाचार्यशिष्यरघुदेवकृतद्रव्यसारसंग्रहः समाप्त" इति लभ्यते, तथा समुद्रबाणरसेन्दुमित-(१६५७ खृः) खृष्टाब्दीये कस्मिंश्चिन्निर्णयपत्रेऽपि (चित्लेभट्टप्रकरणम् ७९ पृः) रघुदेवस्वाक्षरं लभ्यते, एतेन रघुदेवस्य सप्तदशशतकमध्यभागादारभ्य तच्छतकान्तकालपर्यन्तावस्थायित्वं गम्यते। रघुदेवः स्वकृतनञ्वादविवेचननामकटीकाप्रारम्भे—

"शिवं प्रणम्य तत्पश्चात्तर्कवागीश्वरं गुरुम्।
क्रियते रघुदेवेन नञर्थस्य विवेचनम्॥"

तथा अन्ते च पुनः—

"अत्र सूक्तं दुरुक्तं वा यत्किञ्चिज् जल्पितं मया।
तत् सर्वं जगदीशस्य प्रीत्यर्थं लिखितं हि तत्॥"

इत्यादिश्लोकेन यादृशमात्मपरिचयं दत्तवान् तेनैव तस्य हरिराम-जगदीशसंज्ञकयोः पण्डितवर्ययोः शिष्यत्वं परिज्ञातुं क्लेशो नाश्रयणीयः। अनेनैतत् सुस्पष्टं प्रतीयते यत् खृष्टीयषोडश-सप्तदशशतकयोर्मध्ये हरिरामोऽवर्तत इति।

नैयायिकप्रवरो गदाधरभट्टाचार्योऽपि हरिरामशिष्य एव इत्यत्र नास्ति लेशतोऽपि सन्देहावसरः। यतः शब्दचिन्तामणिव्याख्याप्रारम्भे तेन स्वीयगुरोर्हरिरामस्य नामोल्लेखेन मङ्गलाचरणं कृतम्—

"निजगुरुहरिरामनामभूमीसमुदितभास्करवाङ्मयूखयोगात्।
स्फुरदमलचिदर्ककान्तरत्नं शरममणिं विवरीतुमुद्यतोऽस्मि॥"

(पि. पि. शास्त्री सम्पादिततञ्जोरसरस्वतीमहलपुस्तकविवरणस्यैकादशखण्डे न्यायविभागे ४६०८तम पृष्ठे ग्रन्थविवरण (catalogue) संख्या ६२४४)। "इण्डिया अफिस्"

इत्याख्यपुस्तकविवरणावलोकनेन महान् सन्देहो जायते यन्मुक्तिवादरहस्यं हरिरामविरचितं न वेति। (I. O. No. 5858. Vol III. p. 572) तत्रत्यमुक्तिवादपुष्पिकायां "इति मुक्तिवादरहस्यं सम्पूर्णम्" इत्येतावन्मात्रं वर्तते, नास्ति ग्रन्थकारस्य लिपिकारस्य वा नामादिकं किञ्चित्, तथापि कथं तैर्निर्णीतं ग्रन्थोऽयं हरिदासस्येति ? कलिकाता-राष्ट्रियसंस्कृतमहाविद्यालय-ग्रन्थशालायां चतुःसंख्यका मुक्तिवादस्यादर्शग्रन्था वर्तन्ते, तेषु सर्वत्रैव "इति हरिरामविरचितं मुक्तिवादरहस्यं (विचारः, विचाररहस्यं वा) सम्पूर्ण"-मित्येतादृश एवोल्लेखो दृश्यते, परं "इण्डिया अफिस्" विवरणे मुक्तिवादविषये या विवृति र्लभ्यते तया सह पूर्वोक्तग्रन्थचतुष्टयस्य नास्ति कश्चिद्विरोधः। अतो मुक्तिवादरहस्यं हरिरामविरचितमेवेति नास्त्यत्रांशतोऽपि सन्देहावसरः।

लभ्यन्ते च अत्रत्यग्रन्थशालायां हरिरामकृतग्रन्था अनेके एव। तेषामव-लोकनेन एवं ज्ञायते यद् हरिरामेण तत्त्वचिन्तामणिं दीधितिमथवा अन्यं कमपि ग्रन्थ-विशेषमवलम्ब्य व्याख्या न कृता, परं प्रचलितचिन्तामणिखण्डत्रयस्य प्रधानविषयानवलम्ब्य विचाररहस्यनामधेयानि मौलिकग्रन्थरत्नानि रचितानि। तेषु तेषु ग्रन्थेषु पूर्वपक्षरूपेण प्रतिवादिनां मतान्युल्लिख्य तेषां सम्यक्पर्यालोचनया पाण्डित्यपूर्णबुद्धिवैशद्यञ्च प्रदर्श्य स्वमतं संस्थापितम्। नायं मुक्तिवादः कस्य च न ग्रन्थविशेषस्य व्याख्या, अपि तु मूलग्रन्थ एवेति शम्।

**श्रीजगदीशचन्द्र तर्कतीर्थस्य**

# मुक्तिवादविचारः

## [1]कस्तावदपवर्गः

---

मुक्तिलक्ष्मीः ।

गौरीनाथशिरःस्रुतत्रिपथगास्रोतःपरिप्लावितं
नम्रब्रह्मललाटचन्दनरजःप्रच्छादितालक्तकम् ।
श्रीविष्णोर्मुकुटाग्ररत्नमहसा नीतं विचित्रां रुचिं
वाग्देवीपदपङ्कजं परतरं वन्दे मतिश्रेयसे ।
श्रीमद्गदाधरगुरोर्गुरुगौरवस्य
तर्कार्कसूरिहरिरामपदाभिधस्य ।
तर्कापवर्गजयजीवनमुक्तिवादः
प्रस्वाद्यतां बुधवरैस्तमसा विमुक्तः ।
कालीपदेन मधुसूदनवंशरत्न-
श्रीतर्कतीर्थहरिदासतनूद्भवेन ।
श्रीसार्वभौमशिवपादमधुव्रतेन
व्याख्या मयास्य सभयं क्रियते प्रयत्नात् ।
भ्रान्तेर्मानुषधर्मत्वादल्पज्ञत्वाच्च मादृशाम् ।
दयालवः सदा सन्तः कुर्वन्त्वत्र दयालवम् ।

इह हि धर्मार्थकामापवर्गलक्षणाश्चत्वारः पुरुषार्थाः, तेष्वपवर्गः परमपुरुषार्थश्चरमावधिरधिगन्तव्यानामिति सदुन्दुभितुन्दिलघोषमुद्घोषितं महान्तमखिलतान्त्रिकसिद्धान्तं प्रसङ्गतो गुरुमुखादवगत्य तत्रत्यपरमत्वप्रयोजकविशेषरूपेणानवधृतापवर्गस्वरूपः शिष्यस्तादृशरूपेण तज्जिज्ञासया गुरुं पप्रच्छ 'कस्तावदपवर्ग' इति प्रश्नवाङ्मयेन ।

अथवा 'आत्मा वा अरे द्रष्टव्य' इत्यादिश्रुतिवचनसाचिव्येन गुरुरात्मदर्शनमिष्टसाधनमित्यन्तेवासिनमुपदिदेश । स चाह किमिदमिष्टं नाम यदासादनाय लोकविलक्षणमात्मदर्शनमुपयुक्तमिति । गुरुराह वत्सापवर्गः खल्वेषः । अथापवर्गस्वरूपमजानन्नन्तेवासी पृच्छति 'कस्तावदपवर्ग' इति ।

अथवा 'त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः' बुद्धितत्त्वस्य विलयेन पुरुषे बुद्ध्यनुपराग एव वा' अपवर्ग इति सांख्याः ।

---

1 C omits कस्तावदपवर्गः; B D read अथ (before कस्तावद०)

'आत्यन्तिकदुःखानुत्पाद' इति प्राभाकराः। 'नित्यसुखाभिव्यक्तिर्मुक्तिरिति तौतातिताः। यदुपाध्यनवच्छिन्नस्य ब्रह्मणो विशुद्धरूपता तादृशोपाधिविगम एव कैवल्यमित्येकदण्डिवैदान्तिकाः। आनन्दमयपरमात्मनि जीवात्मनो लयो मोक्ष इति त्रिदण्डिवेदान्तिन इत्येवमनेकविधमिथोविरुद्धसिद्धान्तेषु जागरूकेषु दृढं संशयितः शिष्यो विशिष्यापवर्गस्वरूपं निश्चिकीर्षुर्गुरुं पृच्छति 'कस्तावदपवर्ग' इति।

अथवा अनवधृतापवर्गस्वरूपः प्रसङ्गतो गुरुमुखादधिगतेन 'सुधीभिरपवर्गः सुतरामेष्टव्य' इति वचनेनापवर्गविषयिण्याः कामनायाः कर्तव्यत्वमवधार्य तस्याश्च विशेषतो विषयविज्ञानसापेक्षत्वेनापवर्गस्यैव प्रकृते कामनाविषयतया विशेषतस्तत्स्वरूपपरिज्ञानाय परिपृच्छति 'कस्तावदपवर्ग' इति। गुरुरपि 'नापृष्टः कस्यचिद् ब्रूयादि' ति निषेधशास्त्रानतिक्रममात्मनः साक्षात् प्रत्याययितुं तदेव शिष्यप्रयुक्तं प्रश्नवाक्यमनुकारेण प्रायुङ्क्त 'कस्तावदपवर्ग' इति तुल्यरूपप्रश्नवैखर्या। गुरुरत्र प्रकृतो ग्रन्थकर्ता।

एतेन ज्ञानविषयकेच्छारूपजिज्ञासाविषयीभूतज्ञानस्य जिज्ञासाविरोधितया जिज्ञासाविषयीभूतज्ञानशालिनो ग्रन्थकारस्य निरुक्तप्रश्नवाक्यप्रतिपाद्यप्रकृतार्थजिज्ञासाविरहेण तद्विज्ञापनाय नोपपद्यते तादृशप्रश्नवाक्यप्रयोग इत्यधिक्षेपोऽपि निरस्तः। ग्रन्थकारसमुपन्यस्तप्रश्नवाक्यस्यानुकरणमात्रतया तदनुकार्यमूलीभूतशिष्यप्रयुक्तप्रश्नवाक्यसमानार्थकत्वेन तत्प्रतिपादितशिष्यजिज्ञासाया एव तदर्थत्वानुपपत्त्यभावात्।

निपुणास्तु 'कस्तावदपवर्ग' इति वाक्यानन्तरमिति प्रश्ने अपवर्गस्वरूपं कथयामीति वाक्यशेषमध्याहृत्यात्रत्यग्रन्थोपपत्तिं कुर्वन्ति। तन्मते तथा वाक्याध्याहारेण ग्रन्थोपपत्तौ सम्पादितायां कथयामीति समीपभविष्यदर्थकतिङ्विभक्तिप्रयोगेण ग्रन्थादौ ग्रन्थकृत्कर्तव्यायाः शिष्यावधानानुकूलाया उत्तरकालकर्तव्यत्वप्रकारकबोधानुकूलव्यापारात्मकप्रतिज्ञायाः स्वरूपस्य प्रकृते लब्धास्पदत्वेन प्रतिज्ञानुपन्यासनिबन्धनं प्रकृतग्रन्थस्य न्यूनत्वमपि परिहृतं भवतीति बोध्यम्।

अथवा 'कस्तावदपवर्ग' इत्यत्र काकुस्वरविशेषेण 'कस्तावदपवर्ग' इति पृच्छसि किमिति सम्भावनार्थककिम्पदघटितवाक्ययोजनया 'तदा कथयामि' इति वाक्ययोजनया च प्रकृतग्रन्थस्य सौकर्येणोपपत्तिः करणीयेति।

ननु निरुक्तरीत्या प्रतिज्ञानुपन्यासप्रयुक्तन्यूनतापरिहारे सम्भवत्यपि ग्रन्थारम्भे सुतरामपेक्षणीयस्य शिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकस्य मङ्गलाचरणस्याननुष्ठाननिबन्धनन्यूनतापातः कथङ्कारं शक्यः परिहर्तुमिति चेन्न वाचिकनमस्कारादिरूपमङ्गलाचरणस्य प्रकृते वाचा निबन्धनाभावेन कथञ्चिदकरणसम्भावनाया लब्धास्पदत्वेऽपि कायिकमानसिकयोर्द्वयोरेव वा तयोरेकतरस्य वा वाचिकस्यापि वा प्रकृतग्रन्थवहिर्भावेणाकरणे प्रमाणविरहात्। यदि चैवं शिष्यादिपरम्पराशिक्षणानुवृत्तिव्याघातः। दृश्यन्ते हि सहस्रशो वाचिकप्रणतयः प्राचीनतन्त्रकृद्भिः शिष्यशिक्षणार्थमादौ विहितनिबन्धाः। तदनेनापि तथैव प्रवर्तनीयं मङ्गलमङ्गरूपेण स्वीयतन्त्रस्येति तदा पुरतो दीयतामवधानम्; तथाहि 'मारुते वेधसि ब्रध्ने पुंसि क' इत्यमरकोषवचनप्रामाण्यात्, 'कः प्रजापतिरुद्दिष्टः को वायुरिति शब्दितः। कश्चात्मा च समाख्यातः कः प्रकाश उदाहृतः।' इत्येकाक्षर-

कोषप्रामाण्याच्च पुंसि प्रथमाविभक्त्यन्तकशब्दसमानाकारस्य पुंसि प्रथमाविभक्त्यन्त-किंशब्दस्य प्रयोगतः प्रकृते देवतानुस्मरणरूपमङ्गलनिर्वाहः, गौतमीयन्यायसूत्रे ग्रन्थप्रारम्भे परमेश्वरनामरूपप्रमाणपदप्रयोगतो मङ्गलनिर्वाहवत् ।

अथवा नामैकदेशे नामोपचारस्य शिष्टसम्प्रदायसिद्धतया कृष्णकपर्दिन् प्रभृति शब्दैक-देशभूत-कशब्देन विष्णुमहेश्वरयोः कोषबलेन च कशब्दतो ब्रह्मणः प्रतिपत्त्या ब्रह्मविष्णु-महेश्वरलक्षणविशिष्टदेवत्रयीस्मरणात् सुतरां मङ्गलसङ्गतिः। नचैवं देवत्रयस्य कशब्देन परिग्रहे कर्तव्ये 'क' इत्येकत्वमनुपपन्नमिति वाच्यम्; ब्रह्मविष्णुमहेश्वराणां परमात्मरूपैक-परमेश्वराभिन्नताया 'ॐ नमः सर्वभूतानी' त्याद्यनुमितिदीधितिव्याख्यानादिषु गदाधरादिभिः स्पष्टमाख्यानात् तदनुसारेण परमात्मगतैकत्वमुपादाय तदुपपादनस्यादोषत्वात् । एतेनात्र परमात्मनोऽपि बुद्धिस्थत्वेन प्रकृतस्थलीयमङ्गले कोऽपि विशेषः प्रतिपादितो भवति ।

केचित्तु प्रकृतवाक्यार्थमन्यथा वर्णयन्तो न कशब्दप्रयोगमात्रनिर्वाह्यं मङ्गलमत्रा-भ्युपगच्छन्ति किन्तु प्रकृतापवर्गशब्दव्युत्पत्तिविचारेण वाचिकनमस्काररूपमेव मङ्गलं सङ्गमयन्ति। तथाहि वृजी वर्जन इत्यस्य धातोर्घञ्प्रत्ययेन निष्पन्नस्य वर्गेतिशब्दस्य अपगतार्थकापशब्देन सह अपगतो वर्गो वर्जनं यस्य स तथा इत्यर्थे बहुव्रीहिसमासाद-पवर्गशब्दनिष्पत्त्या 'कः अपवर्ग' इति समुदायतः कशब्दप्रतिपाद्यदेवताया अवर्जितत्वं लभ्यते । तेन ग्रन्थारम्भे मया कशब्दप्रतिपाद्या देवता नमस्कार्यत्वेनोपादीयत इत्यवसीयते । अतः प्रकृते न ग्रन्थकृतो नमस्कारानिबन्धनप्रयुक्तशिष्यशिक्षणानुवृत्तिव्याहतिशङ्कावकाशः । कस्तावदपवर्ग इत्यस्य ग्रन्थकृन्निबद्धवाक्यस्यैव वाचिकनमस्कारपरत्वात् ।

क्वचित्तु ग्रन्थारम्भे 'ॐ नमो लिपिलम्बोदराय' इतिवाक्यमुपनिबद्धं दृश्यते, ततस्तेनैव प्रारम्भिकमङ्गलाचरणन्यूनतापरिहारात्तदर्थं तावान् प्रयासो व्यर्थ इति ये वदन्ति तेषां नातिरमणीयः पक्षः, लिपिलम्बोदरायेत्यनेन लिपिनिर्विघ्नतामुद्दिश्य लिपिकारकृत-त्वस्यैव तत्र सूचनाद् ग्रन्थसमाप्तिमुद्दिश्य ग्रन्थकारेण कृतस्य मङ्गलस्य विरहेण शङ्कित-न्यूनतापरिहारानुपपत्तेरिति ध्येयम् ।

ये तु 'कस्तावदपवर्ग' इत्यत्र 'अथ कस्तावदपवर्ग' इति मूलपाठमनुसरन्ति तेषामथ-शब्देनैव मङ्गलोपपत्त्या नापेक्षितो मङ्गलसम्पत्त्यर्थं तावान् प्रयास इति ध्येयम् ।

नन्वेवं विविधप्रयासोपष्टम्भेन मङ्गलाचरणाकरणप्रयुक्तन्यूनतापरिहारस्य शक्य-साधनत्वेऽपि 'नासङ्गतं प्रयुञ्जीते'त्याद्यनुशासनेन सङ्गत्यभाववतो निरूपणस्य प्रति-षिद्धतया प्रकृतनिरूपणविषयापवर्गे सङ्गतिरपेक्षिता; तदत्र किंनिरूपिता किंरूपा च सङ्गतिरित्याकाङ्क्षायां ब्रूमः—

ईश्वरानुमानग्रन्थे तत्त्वचिन्तामणिकारप्रोक्तस्य 'परमप्रयोजनमपवर्ग' इति वाक्य-स्यार्थतोऽनुवादेन 'अपवर्गः परमपुरुषार्थ' इत्यभिहितं गुरुणा। आत्यन्तिकत्वविशिष्टदुःख-ध्वंसादिरूपापवर्गस्वरूपस्य तादृशवाक्यार्थघटकपरमत्वसिद्धिप्रयोजकत्वेन स्वघटकसाधकत्व-लक्षणोपोद्घातरूपा तद्वाक्यार्थनिरूपिता प्रकृते सङ्गतिर्बोध्या। 'चिन्तां प्रकृतसिद्ध्यर्था-मुपोद्घातं विदुर्बुधा' इत्यनेन प्रकृतार्थसिद्ध्यनुकूलज्ञानविषयत्वस्यैवोपोद्घातस्वरूपत्व-निर्वचनात् ।

अथवा प्रागेव शिष्येण गुरुमुखाद् 'धर्मार्थकामापवर्गलक्षणाश्चत्वारः पुरुषार्थाः, तेष्वपवर्गः परमपुरुषार्थ, इति वाक्यं श्रुत्वा अपवर्गस्य पुरुषार्थत्रयापेक्षयोत्कर्षवत्त्वमवधृतं, ततः किञ्चिदनन्तरं धर्मादिवर्गत्रयज्ञानात् स्वावधिकोत्कर्षवत्त्वसम्बन्धेनापवर्गस्मरणात् परमत्वेन चास्योपेक्षणानर्हत्वात् स्मृतत्वे सत्युपेक्षानर्हत्वरूपा त्रिवर्गनिरूपिता प्रसङ्गसङ्गतिरपि सम्भवति।

अथवा 'आत्मा वा अरे द्रष्टव्य' इति श्रुत्यनुवादेन गुरुः शिष्यमात्मदर्शनस्यापवर्गरूपेष्टसाधनत्वमुपादिक्षत्। ततः शिष्यस्यात्मदर्शनमपवर्गरूपेष्टसाधनमिति ज्ञानमुदपादि, तुल्यवित्तिवेद्यतया चापवर्गे निरुक्तात्मदर्शनजन्यत्वस्य जन्यत्वसम्बन्धेनात्मदर्शनसम्बन्धित्वस्यापि ज्ञानम्। तेनानन्तरं केनाप्युद्बोधकेन जन्यत्वसम्बन्धेनापवर्गस्मृतिस्ततस्तज्जिज्ञासा ततश्च तन्निरूपणमित्यात्मदर्शननिरूपितापवर्गे जन्यत्वरूपा सङ्गतिः सङ्गच्छते। नचैवं जन्यत्वस्य सङ्गतित्वस्वीकारे 'सप्रसङ्ग उपोद्घातो हेतुतावसरस्तथा। निर्वाहकैक्यकार्यैक्ये षोढा सङ्गतिरिष्यते।' इत्यादिना निरूपितस्य सङ्गतेः षोढात्वस्य व्याघात इति शङ्कनीयम्; तत्र हेतुतापदस्यैव स्वतादात्म्य-स्वनिरूपकत्वैतदन्यतरसम्बन्धेन हेतुतासम्बन्धित्वादिरूपकिञ्चिद्धर्मपुरस्कारेणाजहत्स्वार्थवृत्त्या हेतुत्वजन्यत्वोभयपरताया अभ्युपगमात्। तदुक्तं गदाधरेणानुमितिप्रकरणव्याख्याने 'हेतुतापदमजहत्स्वार्थवृत्त्या कार्यत्वकारणत्वोभयसाधारणेन केनचिद्रूपेण तदुभयपरमिति नाधिक्यमिति भाव' इति।

अत्र 'कस्तावदपवर्ग' इति प्रश्नवाक्ये अपवर्गपदमपवर्गपदार्थत्वावच्छिन्नपरम्। अपवर्गत्वस्यात्यन्तिकदुःखनिवृत्तित्वाद्यनन्यथारूपत्वेनोद्देश्यतावच्छेदकतासम्बन्धेनाभेदसम्बन्धावच्छिन्नविधेयकान्वयबोधे विधेयतावच्छेदकभेदस्य कारणत्वेन च उत्तरवाक्ये अनायत्या अपवर्गपदस्यापवर्गत्वेतरधर्मावच्छिन्नपरत्वस्यावश्यमभ्युपगन्तव्यत्वेन प्रश्नवाक्येऽपि तस्य तत्परत्वस्यावश्यकत्वात्। अन्यथा तद्धर्मावच्छिन्नविषयकजिज्ञासायास्तद्धर्मावच्छिन्नविषयकज्ञानादेव निवृत्तिनियमेनापवर्गत्वावच्छिन्नविषयकजिज्ञासाया अपवर्गत्वेतरधर्मावच्छिन्नविषयकज्ञानादनिवृत्तेरर्थान्तरप्रसङ्गात्। एवञ्च किंशब्दस्य प्रकृते उद्देश्यबोधकतया तस्य स्वसमभिव्याहृतपदोपस्थाप्यतावच्छेदकधर्मावच्छिन्नविधेयतानिरूपितोद्देश्यतावच्छेदकत्वेन वक्तृजिज्ञासितधर्मप्रवृत्तिनिमित्तकत्वादुपस्थाप्यतावच्छेदकत्वान्तभागस्य चोपलक्षणतयानुगमकत्वेन शाब्दबोधेनाविषयीकरणात् 'कस्तावदपवर्ग' इति वाक्यस्यापवर्गपदार्थत्वावच्छिन्नाभेदसम्बन्धावच्छिन्नविधेयतानिरूपितोद्देश्यतावच्छेदकत्वेन वक्तृजिज्ञासितधर्मवानपवर्गपदार्थ इत्यर्थबोधः। तत्परिष्कारश्च स्वविषयीभूतज्ञाननिरूपिता या अपवर्गपदार्थत्वावच्छिन्नविधेयतानिरूपितोद्देश्यता तदवच्छेदकत्वविषयतानिरूपिता या वक्तृज्ञानेच्छारूपजिज्ञासाविषयता तद्विशिष्टाश्रयोऽपवर्गपदार्थ इति। अत एव किञ्चिद्धर्मावच्छिन्नोद्देश्यकापवर्गपदार्थत्वावच्छिन्नविधेयकज्ञानं जायतामित्येतादृश्या निरुक्तप्रश्नवाक्योपात्तजिज्ञासायाः किञ्चिद्धर्मावच्छिन्नोद्देश्यकापवर्गपदार्थत्वावच्छिन्नविधेयकज्ञानावगाहितया तस्या 'आत्यन्तिकी दुःखनिवृत्तिरपवर्ग' इति वाक्यजनितात् किञ्चिद्धर्मावच्छिन्नोद्देश्यकापवर्गपदार्थत्वावच्छिन्नविधेयकज्ञानादेव निवृत्तिसम्भव इति तादृशजिज्ञासाबोधकवाक्योत्तरं प्रकृतजिज्ञासानिवर्तनाय तादृशज्ञानजनकमेव ग्रन्थकारेणोत्तरवाक्यं प्रयुक्तमिति। ज्ञानस्यैव साक्षाज्जिज्ञासाविषय-

**तत्रात्यन्तिकी दुःखनिवृत्तिरपवर्ग[1] इत्याचार्यप्रभृतयः[2]। तत्र निवृत्तिध्वंसः। [3]तस्यात्यन्तिकत्वञ्च [4]स्वसमानाधिकरणदुःखप्रागभावासमानकालीनत्वम्,**

---

त्वेऽपि गृहे तिष्ठासतीत्यादौ गृहं तिष्ठासतीत्यादिप्रयोगप्रतिषेधाय सन्प्रकृतिभूतधात्वर्थनिरूपितकर्मत्वस्यैव सन्प्रत्ययार्थेच्छाकर्मत्वरूपत्वाभ्युपगमात् प्रकृते ज्ञानविषयीभूतोद्देश्यतावच्छेदकधर्मस्य जिज्ञासितत्वं नानुपपन्नमिति ध्येयम्।

शिष्यजिज्ञासानिवृत्त्यर्थमादावाचार्यसम्मतसिद्धान्तमुपन्यस्यति "**तत्रे**"त्यादिना। आचार्यप्रभृतय इत्यनेन प्रकृते स्वीयासम्मतिः सूचिता, अग्रे 'अत्रेदं चिन्तयती' त्यादिसन्दर्भेण निरुक्तमते दोषमुद्भाव्य दुःखसाधनध्वंसस्यैवात्यन्तिकस्यापवर्गस्वरूपत्वस्य स्वयमुपपादयिष्यमाणत्वात्। पूर्वपक्षरूपेणोपस्थापितमाचार्यादिमतं विवृणोति "**तत्रे**"त्यादिग्रन्थेन। तत्रेति आचार्यप्रभृतिनिरुक्ते 'आत्यन्तिकी दुःखनिवृत्तिरपवर्ग' इत्यर्थके दुःखनिवृत्तिपदघटितवाक्ये इत्यर्थः। तत्रापवर्गपदम् अपवर्गपदार्थत्वावच्छिन्नपरम्, अन्यथा तादृशवाक्यजन्यबोधस्य प्रकृतशिष्यजिज्ञासानिवर्तकत्वानुपपत्तेरर्थान्तरप्रसङ्गादित्येतदुपपादितमधस्तात्। तत्रेति तत्पदं निरुक्तप्रश्नवाक्यपरम्, सप्तम्यर्थो जन्यप्रतिपत्तिविषयत्वम्, तत्पदस्य जन्यतायां प्रतिपत्तिविषयत्वस्य चापवर्गपदार्थेऽन्वयाद् 'आत्यन्तिकी दुःखनिवृत्तिरुक्तप्रश्नवाक्यजन्यप्रतिपत्तिविषयापवर्गपदार्थ' इत्येतद्वाक्यार्थबोधः। अथवा तत्पदं निरुक्तप्रश्नवाक्यार्थपरम्, सप्तम्यर्थो घटकत्वम्, तस्य चापवर्गपदार्थेऽन्वयाद् 'आत्यन्तिकी दुःखनिवृत्तिः निरुक्तप्रश्नवाक्यार्थघटकापवर्गपदार्थ इति बोधः। तत्र आत्यन्तिकदुःखनिवृत्तेरुद्देश्यत्वं विधेयत्वञ्चापवर्गपदार्थस्येत्यवगन्तव्यम्। "**आचार्यप्रभृतय**" इति उदयनाचार्यप्रभृतय इत्यर्थः। प्रभृतिपदेन कन्दलीकारश्रीधरादीनामुपग्रहः। तदुक्तं किरणावल्यामुदयनाचार्येण,—'निःश्रेयसं पुनर्दुःखनिवृत्तिरात्यन्तिकी, अत्र च वादिनामविवाद एवेति। निःश्रेयसमपवर्ग इत्यनर्थान्तरम्। न्यायकन्दल्याञ्चोक्तं श्रीधरेण,—'तस्मादहितनिवृत्तिरात्यन्तिकी महोदय इति युक्त' मिति। अत्राहितशब्दो दुःखपरो महोदयशब्दश्चापवर्गपरः।

तदेवमाचार्यप्रभृतीनां मतमाश्रित्यापाततः शिष्यजिज्ञासानिवर्तकत्वेनाभिमतम् 'आत्यन्तिकी दुःखनिवृत्तिरपवर्ग' इति गुरोरुत्तरवाक्यं प्रतिपत्तव्यम्; उपरिष्टाद् ग्रन्थकारेण निपुणमेव तदुपपादनस्यानुपेक्षितत्वादिति बोध्यम्।

ननु मशकनिवृत्तये धूम इत्यादौ निवृत्तिशब्दस्यायोग्यतया प्रध्वंसरूपार्थासम्भवेनाभावरूपार्थो लभ्यते, तदेवं प्रकृतेऽपि 'दुःखस्यात्यन्ताभाव एवापवर्ग' इत्यर्थः पर्यवस्यति। सोऽयं दुःखस्यात्यन्ताभावो न दुःखप्रतियोगिकाभावमात्रं, संसारदशायामप्यात्मनि परकीयदुःखप्रतियोगिकाभावस्य स्वीयदुःखविशेषाभावस्य दुःखघटत्वोभयाभावादेश्च विद्यमानतय

1 B A ०रेवापवर्गः 2 C omits प्रभृतयः 3 C omits तस्य
4 "स्व"पदमत्र मुक्त्यात्मकदुःखध्वंसपरमिति

सुतरामतिप्रसङ्गापातात्; किन्तु दुःखसामान्याभाव एव। इत्थञ्च संसारदशायामात्मनः प्रतिपलमेवाविरलदुःखसंकुलतया विरोधिसत्त्वेन निरुक्तदुःखात्यन्ताभावविरहेण नातिप्रसङ्गापातः। मुक्तिदशायान्तु दुःखधारासन्निवृत्त्या कस्यचिदपि दुःखस्यासम्भवेन निरुक्तदुःखात्यन्ताभावसम्वलनान्न मुक्तत्वानुपपत्तिरिति।

नचैवं संसारदशायामात्मनि शरीरावच्छेदेन दुःखसत्त्वेऽपि घटाद्यवच्छेदेन दुःखात्यन्ताभावसत्त्वादतिप्रसङ्गतादवस्थ्यमिति वाच्यम्; देशानवच्छिन्नवृत्तिकत्वस्यावच्छेद्यतासम्बन्धेन देशविशिष्टान्यत्वस्य वा तादृशात्यन्ताभावे विशेषणत्वोपगमात्, परममुक्तेरेव प्रकृते लक्ष्यत्वेन तदानीं देहरूपावच्छेदकाभावेन तत्कालीनदुःखात्यन्ताभावस्य देशानवच्छिन्नवृत्तिकत्वादवच्छेद्यतासम्बन्धेन देशविशिष्टान्यत्वाच्च प्रकृतलक्षणसमन्वयः। तदानीन्तनदुःखात्यन्ताभावस्य कालावच्छिन्नतया लक्षणासम्भवभयादनवच्छिन्नवृत्तिकत्वमवच्छेद्यतासम्बन्धेन किञ्चिद्विशिष्टान्यत्वं वा परिहाय देशानवच्छिन्नवृत्तिकत्वमवच्छेद्यतासम्बन्धेन देशविशिष्टान्यत्वं वा विशेषणमुपात्तम्। तदेवं देशानवच्छिन्नवृत्तिकदुःखात्यन्ताभावः, अवच्छेद्यतासम्बन्धेन देशविशिष्टान्यदुःखात्यन्ताभावो वा अपवर्गमिति स्थितमिति चेन्न; घटादिगतदुःखात्यन्ताभावस्य देशानवच्छिन्नवृत्तिकत्वादवच्छेद्यतया देशविशिष्टान्यत्वाच्च घटादौ मुक्तत्वातिप्रसक्तेस्तावताप्यपोहितुमशक्यत्वात्।

न च यत्राधिकरणभेदेऽप्यभावाभेदाङ्गीकारे प्रतियोगिसमानाधिकरणत्वप्रतियोगिव्यधिकरणत्वादिलक्षणविरुद्धधर्माध्यासस्तत्राधिकरणभेदेनाभावभेदस्य तार्किकसम्मतत्वादचेतनघटादिवृत्तेः प्रतियोगिव्यधिकरणतादृशदुःखात्यन्ताभावस्य चेतनवृत्तिप्रतियोगिसमानाधिकरणतादृशदुःखात्यन्ताभावतो भिन्नतया देशानवच्छिन्नवृत्तिकत्वादिवच्चेतनवृत्तित्वस्यापि दुःखात्यन्ताभावविशेषणत्वाद् घटादावचेतने नातिप्रसङ्गशंकेति वाच्यम्; एवमपि परमात्मवृत्तिदुःखात्यन्ताभावस्य देशानवच्छिन्नवृत्तिकत्वाच्चेतनधर्मत्वाच्च तस्मिन्नतिप्रसङ्गस्य दुर्वारत्वाद् बद्धस्यैव मुक्तत्वनियमेन बन्धाभाववतः परमात्मनो मुक्तत्वासम्भवेन तस्य मुक्तलक्षणलक्ष्यताया अभ्युपगन्तुमशक्यत्वात्। अथैतद्दोषपरिजिहीर्षया महता च लाघवेन देशानवच्छिन्नवृत्तिकत्वादिपरिहारेण दुःखात्यन्ताभावे कालावच्छिन्नत्वमवच्छेद्यतासम्बन्धेन कालविशिष्टत्वं वा विशेषणमुपादेयम्; घटाद्यचेतनवृत्तेस्तथा चेतनपरमात्मवृत्तेर्दुःखात्यन्ताभावस्य दैशिकव्याप्यवृत्तित्ववत् कालिकव्याप्यवृत्तित्वस्यापि सत्त्वेन तस्य कालावच्छिन्नत्वविरहात्तमादाय तत्र तत्रातिप्रसङ्गशंकानवकाशादिति चेन्न; तावतापि सुषुप्तात्मन्यतिप्रसङ्गस्य प्रतिषेद्धुमशक्यत्वात्। यदि च ध्वंसप्रागभावाभ्यां सममत्यन्ताभावस्य विरोधेन सुषुप्तिदशायामात्मनि दुःखध्वंसप्रागभावाधिकरणे दुःखात्यन्ताभाव एव नास्तीति विभाव्यते, तदा मुक्तात्मनि दुःखध्वंसाधिकरणे दुःखात्यन्ताभावाभावेन सुतरां मुक्तलक्षणासम्भवः, अत्यन्ताभावस्य नित्यत्वेनासाध्यतया पुरुषार्थत्वाभावेन मुक्तिमुद्दिश्य तत्त्वज्ञानादिप्रवृत्त्यनुपपत्तिश्चेति। यदि च सुषुप्तात्मनि मुक्तत्वातिप्रसङ्गप्रतिषेधाय निरुक्तदुःखात्यन्ताभावे स्वसमानाधिकरणदुःखप्रागभावासमानकालीनत्वं निवेश्यते, क्षेमसाधारणसाध्यत्वमुपादाय च तस्य पुरुषार्थत्वमुपपाद्य कथञ्चिदेव मुक्त्यर्थं तत्त्वज्ञानादिप्रवृत्तिरुपपाद्यते तदापि नित्यसंसर्गाभावत्वरूपगुरुतरपदार्थनिवेशापेक्षया ध्वंसत्वनिवेशे महालाघवमित्यतो ग्रन्थकारः

नौ

**स्वसमाधिकरणदुःखासमानकालीनत्वं वा। मुक्त्यन्तरञ्च तस्य[1] पुंसो दुःखानुत्पादात्।**

---

स्वयमेव निवृत्तिशब्दस्य ध्वंसरूपमर्थं तद्विशेषणमात्यन्तिकत्वञ्च विशेषतो निर्वक्ति **'तत्र निवृत्तिर्ध्वंस'** इत्यादिना। तेनात्यन्तिकत्वविशिष्टो दुःखध्वंसोऽपवर्ग' इत्यर्थः स्थितः। इत्थञ्च ध्वंसस्य जन्याभावरूपत्वेन साध्यत्वाविवादान्न मुक्तेरपुरुषार्थत्वापत्तिः। भावप्रतियोगिकध्वंसप्रागभावयोः स्वप्रतियोगिसमवायिदेशवृत्तित्वनियमेन नापि घटादावतिप्रसङ्गः। सुषुप्तिदशोत्पन्नदुःखध्वंसादिकमादाय सुषुप्तादावतिप्रसङ्गवारणन्तु प्रकृतात्यन्तिकत्वविशेषणनिर्वाह्यमिति 'तन्निवेशश्चे,त्यादिना ग्रन्थकारः स्वयमेवोपपादयिष्यति।

आत्यन्तिकत्वमाधिक्यमुत्कर्षवत्त्वमिति यावत्। तच्च साधारणदुःखध्वंसापेक्षया। तच्च विशेषतः किंलक्षणमित्याकाङ्क्षायामाह तस्यात्यन्तिकत्वञ्चेत्यादि। **"तस्ये"ति** आत्यन्तिकत्वविशिष्टदुःखध्वंसस्येत्यर्थः। तत्र वृत्तित्वं षष्ठ्यर्थः। तस्यात्यन्तिकत्वपदार्थेऽन्वयः। तेन तद्वृत्त्यात्यन्तिकत्वपदार्थ इत्यर्थः। तस्मादभेदान्वयो निराबाधः।

**"स्वसमानाधिकरणदुःखप्रागभावे"**त्यादि। अत्र स्वसमानाधिकरणो यो दुःखप्रागभावः, तदसमानकालीनत्वं तत्समानकालीनान्यत्वमित्यर्थः। अत्र यथाश्रुते दुःखप्रागभावे सामानाधिकरण्यस्य सामानाधिकरण्यनिरूपके च समानकालीनत्वस्यान्वयो लभ्यते। तेनानुगमे गौरवं प्रतिसन्धाय सामानाधिकरण्य-कालिकविशेषणत्वोभयसम्बन्धेन दुःखप्रागभावविशिष्टान्यदुःखध्वंसे प्रकृतग्रन्थतात्पर्यं ग्रन्थकारः स्वयमेवोपवर्णयिष्यति। परन्त्वत्र न तादृशानुगमप्रतिसन्धानम्, तथा सति स्वत्वस्यैक्याभावेन वक्ष्यमाणलक्षणाननुगमशङ्काया अनुत्थानेन ग्रन्थासङ्गतिप्रसङ्गात्।

निरुक्तात्यन्तिकत्वघटक-स्वसामानाधिकरण्ये निरूपकत्वं वृत्तित्वञ्च दैशिकस्वरूपसम्बन्धावच्छिन्नं ग्राह्यम्; अन्यथा मुक्तित्वाभिमतदुःखध्वंसस्यापि कालिकविशेषणत्वादिना स्वाधिकरणे महाकालादौ कालिकविशेषणत्वादिना वर्तमानो यः परकीयदुःखप्रागभाव स्तत्समानकालीनतया सुतरामसम्भवापातात्। प्रकृतनिवेशे च भावप्रतियोगिकध्वंसप्रागभावयोः स्वस्वसमवायिदेश एव दैशिकस्वरूपेण वर्तमानत्वादुक्तरीत्यासम्भवानवकाशात्। न च वृत्तित्वनिरूपकत्वयोरेकत्र दैशिकस्वरूपसम्बन्धावच्छिन्नत्वनिवेशेनैव दोषवारणसम्भवे किमर्थमुभयत्र तादृशसम्बन्धावच्छिन्नत्वनिवेशगौरवमभ्युपेयत इति वाच्यम्; वृत्तित्वनिरूपकत्वयोरेकतरमात्रे तन्निवेशे विनिगमकाभावेन तदुभयत्रैव तादृशसम्बन्धावच्छिन्नत्वघटितलक्षणस्यापरिहार्यत्वात्। नचैवमेकैकत्र तादृशसम्बन्धावच्छिन्नत्वघटितलक्षणेन तल्लक्षणवैयर्थ्यापत्तिरिति वाच्यम्; अखण्डाभावघटकतया प्रकृतस्य लक्षणस्य सार्थक्यसम्भवात्।

तादृशदुःखप्रागभावासमानकालीनत्वमित्यस्य तादृशदुःखप्रागभावाधिकरणक्षणवृत्तिभिन्नत्वपर्यवसितं तादृशदुःखप्रागभावाधिकरणकालवृत्तिभिन्नत्वमर्थः। अन्यथा स्वसमाना-

1 A D omit तस्य

घिकरणदुःखप्रागभावक्षणावधिकचरमदुःखध्वंसकालपर्यन्तस्थायिस्थूलकालमादायासम्भवापत्ते-र्दुरुद्धरत्वात्।

तादृशक्षणवृत्तिभिन्नत्वञ्च तादृशक्षणवृत्तित्वपर्याप्तावच्छेदकताकप्रतियोगिताकभेदः, तेन संसारदशोपजातेऽपि दुःखध्वंसे व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदादिकमादाय न मुक्तिलक्षणातिप्रसङ्गावकाशः।

अथ गुरुमतानुसारेण मुक्तिदशायामपि सन्तं दुःखस्य पण्डप्रागभावमादाय लक्षणमिदम-सम्भवीति चेन्न पण्डप्रागभावस्य दृढतरयुक्तिपराहतत्वात्। तथाहि स पण्डप्रागभावो नाश्यो वा तदन्यो वा? आद्यकल्पे स प्रतियोगिनाश्यः प्रतियोगिसामग्रीनाश्यो वा वक्तव्यः। तत्र प्रतियोगिनाश्यत्वे मुक्तिदशायामपि तन्नाशार्थमनायत्या स्वप्रतियोगिभूतदुःखोत्पत्तेरवश्यम-भ्युपगन्तव्यत्वेन मुक्तित्वाभिमतपूर्वोपजातदुःखध्वंसस्य संसारकालीनसाधारणदुःखध्वंसस्येव स्वसमानाधिकरणतद्दुःखप्रागभावसमानकालीनत्वाद् दुःखानुविद्धत्वाच्च संसारदशावैलक्षण्य-शून्यत्वेन परमपुरुषार्थत्वानुपपत्तिः प्रवृत्तिव्याघातप्रसङ्गश्च दुःखत्रितयं जिहासतां विशेषदृशां तदुद्देशेन तत्त्वज्ञानाद्युपायप्रपञ्चे।

तस्य प्रतियोगिसामग्रीनाश्यत्वे दुःखकारणीभूतस्य दुरितस्य पूर्वमेव तत्त्वज्ञानेन निवर्त-नात्तद्घटितसामग्र्या मुक्तिदशायामसम्भवितया तया तन्नाशानुपपत्तिः। अनाश्यत्वे तु विनाश्यभावत्वलक्षणप्रागभावस्वभावव्याघातः। तस्मादेवंविधविविधविकल्पादिपराहतत्वेन निरस्ते दुःखपण्डप्रागभावे नास्ति निरुक्तमुक्तिलक्षणस्य प्रोक्तदोषाशङ्केति ध्येयम्।

निरुक्तरूपदुःखध्वंसस्य मुक्तिरूपत्वात् तद्वत्त्वमेव मुक्तत्वव्यवहारप्रयोजकमित्यायातम्। तच्च दैशिकस्वरूपसम्बन्धेनैवावधेयम्। अन्यथा घटादावपि कलिकादिसम्बन्धेन तद्वत्त्व-स्याक्षततया तत्र मुक्तत्वव्यवहारस्य परिहर्तुमशक्यत्वात्।

अथ प्रथमोपस्थितत्वाल्लाघवाच्च दुःख एव स्वसामानाधिकरण्यं निवेश्य प्रागभाव-घटितलक्षणतुल्ययोगक्षेमत्वात्तदसमानकालीनत्वलक्षणमेव प्रकृतलक्षणघटकमात्यन्तिकत्वं निर्वक्ति "**स्वसमानाधिकरणदुःखासमानकालीनत्वं वे**"ति। अत्र दुःखनिष्ठं सामानाधिकरण्य-घटकवृत्तित्वं समवायसम्बन्धावच्छिन्नं ग्राह्यम्। अन्यथा एकात्मवृत्तिदुःखस्यापरात्मनि स्वाभाववत्त्वसमानकालीनत्वादिसम्बन्धेन सत्त्वाच्चरमदुःखध्वंसाधिकरणवृत्तिदुःखपदेना-त्मान्तरवृत्तितत्कालीनदुःखस्यापि ग्रहीतुं शक्यतया तत्समानकालीनत्वस्यैव मुक्तात्म-वृत्तिचरमदुःखध्वंसे सत्त्वात् प्रकृतलक्षणासङ्गतेः। अन्यत् सर्वं समानमवसेयम्।

ननु भेदस्याव्याप्यवृत्तित्वमते सुषुप्तिकाले सुषुप्तात्मगतदुःखध्वंसस्य स्वसमानाधिकरण-दुःखासमानकालीनत्वेन तत्रैतदात्यन्तिकत्वघटितलक्षणस्यातिव्याप्तिरपरिहार्या। तदुक्तं न्यायसूत्रभाष्ये भगवता वात्स्यायनेन,—'यथा सुषुप्तस्य खलु स्वप्नादर्शने रागानुबन्धः सुखदुःखानुबन्धश्च विच्छिद्यते, तथा अपवर्गेऽपीति'। विश्वनाथवृत्तौ च विश्वनाथेन,— 'स्वप्नादर्शनकाले सुषुप्तस्य यथा हेत्वभावेन दुःखाभावस्तथापवर्गेऽपि रागाद्यभावेन दुःखाभावः स्या'दिति। प्रागुक्तदुःखप्रागभावासमानकालीनत्वघटितलक्षणे तु न तया सुषुप्त्यनन्तरमुत्पत्स्यमानस्य दुःखस्य तदानीं सुषुप्तात्मनि प्रागभावसत्त्वात् तत्कालीन-दुःखध्वंसस्य तत्समानकालीनत्वादतो निरुक्तदुःखासमानकालीनत्वघटितलक्षणस्य लाघवम-

**मुक्त्यात्मक[1]दुःखध्वंसे तथाविधात्यन्तिकत्वं वर्तत एवेति समन्वयः[2]। तन्निवेशश्चेदानीन्तनदुःखध्वंसेऽतिव्याप्तिवारणाय। इदानीन्तनमुक्तेः पुरुषान्तरीयदुःखप्रागभाव[3]समानकालीनतयाऽसम्भव इत्यतः[4] स्वसमानाधिकरणेति।**

---

किञ्चित्करमिति चेन्न भेदस्य व्याप्यवृत्तित्वसिद्धान्तमनुसृत्यैव लक्षणकरणात्। अन्यथा संसारदशोपजातदुःखध्वंसस्यापि मुक्तिकालावच्छेदेन तादृशदुःखप्रागभावासमानकालीनत्वस्य तादृशदुःखासमानकालीनत्वस्य च सत्त्वादतिव्याप्तेरशक्यपरीहारत्वात्।

मुक्त्यात्मकदुःखध्वंसे निरुक्तात्यन्तिकत्वविशेषणसङ्गतिमुपपादयितुमाह **"मुक्त्यनन्तरञ्चे"**त्यादि। **"तस्ये"**ति मुक्तस्येत्यर्थः। एतेनामुक्तपुरुषव्यावृत्तिः कृता। अन्यथा तस्येत्यस्यानुपादाने एकस्य पुरुषस्य मुक्त्यनन्तरमपरात्मनि दुःखोत्पादे बाधाभावेन सामान्यतो मुक्त्यनन्तरं दुःखानुत्पादरूपो हेतुरसिद्धः स्यादतस्तस्य पुंस इति विशेषनिर्देशः। **दुःखानुत्पादा**दिति दुःखोत्पत्तिविरहादित्यर्थः, नतु दुःखप्रागभावादिति, मुक्त्यनन्तरं दुःखप्रागभावस्य मुक्तात्मन्यसत्त्वात् तत्स्वीकारे प्राथमिकलक्षणे तदात्यन्तिकत्वविशेषणसङ्गत्युपपादनाया अनुपपत्तेः।

मुक्त्यनन्तरं तस्य पुंसो दुःखानुत्पादेऽपि तदीयसंसारकालीनदुःखध्वंसे तथाविधात्यन्तिकत्वबाधेन सामान्यतो दुःखध्वंसे तथाविधात्यन्तिकत्वप्रतिपादकवाक्यार्थानुपपत्तिरतो मुक्त्यात्मकेति दुःखध्वंसस्य विशेषणम्।

अथ मुक्त्यनन्तरञ्चेत्यत्र किं नाम मुक्त्यनन्तरत्वम्? यदि मुक्त्युत्पत्तिक्षणोत्तरकालत्वं तत्, तदा मुक्त्युत्पत्तिक्षणे दुःखोत्पत्तिसम्भावनया मुक्त्यात्मकदुःखध्वंसे द्वितीयात्यन्तिकत्वविशेषणसमन्वयानुपपत्तिशंका जागृयात्। अतो मुक्त्युत्पत्तिक्षणसाधारणमेव तन्निर्वाच्यम्। तच्च स्वोत्पत्तिमत्त्व-स्वोत्पत्तिध्वंसवत्त्वान्यतरसम्बन्धेन मुक्तिविशिष्टकालत्वम्। एवञ्च मुक्त्युत्पत्तिक्षणस्य तादृशान्यतरसम्बन्धघटकस्वोत्पत्तिमत्त्वसम्बन्धेन मुक्तिविशिष्टत्वरूपमुक्त्यनन्तरत्ववत्त्वात् तत्रापि दुःखानुत्पादस्य प्रकृतग्रन्थेन प्रतिपादनान्न तत्र दुःखोत्पत्तिसम्भावनाया अवसर इति ध्येयम्।

नचैवमपि मुक्त्यव्यवहितपूर्वक्षणे तथैव दुःखोत्पत्तेरापाततः सम्भावनया तद्विशेषणसमन्वयानुपपत्तिशंका स्यात् मुक्त्यव्यवहितपूर्वक्षणोत्पन्नस्य क्षणद्वयावस्थायिनो दुःखस्य मुक्त्युत्पत्तिक्षणेऽपि स्थितेरावश्यकत्वादिति वाच्यम्। तत्र स्वसामग्रीमत्त्व-स्वोत्पत्तिमत्त्व-स्वोत्पत्तिध्वंसवत्त्वैतत्त्रितयान्यतमसम्बन्धेन मुक्तिविशिष्टत्वस्य वक्तव्यत्वात्। सामग्रीमत्त्वस्य कार्याव्यवहितपूर्वक्षण एव नियमतः सत्त्वेन स्वसामग्रीमत्त्वसम्बन्धेन मुक्तिविशिष्टत्वस्य तत्पूर्वकालान्तरे सत्त्वाभावेन न तदुपादाय प्रकृतवाक्यार्थबाधशंका।

अथवा मुक्त्यनन्तरत्वं मुक्त्यव्यवहितक्षणत्वं मुक्त्युत्पत्तिक्षणाव्यवहितक्षणत्वमिति

1 B मोक्षात्मक 2 B C omit एवेति समन्वयः 3 C D read प्रागभावादि
4 B C D read अव्याप्तिवारणाय (for असम्भव इत्यतः)

यावत्। अनन्तरपदस्योत्तरवर्त्तिपदार्थ इव सन्निहितपूर्वपदार्थेऽपि प्रयोगस्य 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्ग' इत्यादिन्यायसूत्रे दृष्टचरत्वात्। तदुक्तं तत्र विश्वनाथेन 'दुःखादीनां मध्ये यत्तु उत्तरोत्तरं तेषामपाये तदनन्तरस्य तत्सन्निहितस्य पूर्वपूर्वस्यापायादपवर्ग' इति।

न चैवं मुक्त्यनन्तरपदेन मुक्त्यव्यवहितपूर्वक्षणोत्तरक्षणयोर्लाभेऽपि मुक्त्युत्पत्तिक्षणस्यालाभेन तत्र दुःखोत्पत्तिसम्भावनाजन्यनिरुक्तानुपपत्तिशंका कथं वारणीयेति वाच्यम्, स्वप्रागभावाधिकरणसमयप्रागभावानधिकरणत्वे सति स्वसमयध्वंसाधिकरणसमयध्वंसानधिकरणक्षणत्वरूपस्य मुक्त्युत्पत्तिक्षणसाधारणस्य मुक्त्यव्यवहितक्षणत्वस्य प्रकृते परिग्रहेण मुक्त्युत्पत्तिक्षणाव्यवहितक्षणे दुःखानुत्पादकथनेनैव दुःखस्य मुक्त्युत्पत्तिक्षणेऽप्यनुत्पादस्य प्रतिपादनान्न काप्यनुपपत्तिः। नहि तादृशदुःखं मुक्त्यव्यवहितपूर्वक्षणे मुक्त्युत्पत्तिक्षणे वा जनिमनासाद्य मुक्त्युत्पत्तिक्षणे कथमप्यवस्थातुमीष्टे।

नन्वेवमपि कथं मुक्त्यव्यवहितोत्तरक्षणानन्तरं दुःखोत्पत्तिशंकाधीनतादृशशंकानिरास इति चेदत्र ब्रूमः,—मुक्त्यनन्तरपदस्य मुक्त्यव्यवहितपूर्वक्षणरूपमर्थमुक्तरीत्या गृहीत्वा तदनन्तरमस्त्यर्थाच्प्रत्ययेन मुक्त्यव्यवहितपूर्वक्षणविशिष्टरूपार्थो लभ्यते। तत्र वैशिष्ट्यञ्च स्वतादात्म्यस्वोत्तरकालत्वैतदन्यतरसम्बन्धेन। ततश्च स्वतादात्म्यसम्बन्धेन मुक्त्यव्यवहितपूर्वक्षणस्य स्वोत्तरत्वसम्बन्धेन च मुक्त्युत्पत्तिकालादारम्य सर्वेषामेव मुक्त्यधिकरणक्षणानां संग्रहेण तत्र तत्र सर्वत्रैव दुःखानुत्पादस्य प्रतिपादनान्न कथमपि निरुक्तशंकावकाश इति ध्येयम्।

"**तथाविधात्यन्तिकत्वमि**"ति — स्वसमानाधिकरणदुःखप्रागभावासमानकालीनत्वरूपं स्वसमानाधिकरणदुःखासमानकालीनत्वरूपञ्च निरुक्तात्यन्तिकत्वमित्यर्थः "**तन्निवेशश्चे**"ति। तथाविधात्यन्तिकत्वनिवेश इत्यर्थः। "**इदानीन्तनदुःखध्वंसे**" इति। संसारकालीने नियमतः स्वसमानाधिकरणदुःखप्रागभावसमानकालीने स्वसमानाधिकरणदुःखसमानकालीने च दुःखध्वंस इत्यर्थः। "**पुरुषान्तरीयदुःखप्रागभावसमानकालीनतये**"त्युपलक्षणम्, पुरुषान्तरीयदुःखसमानकालीनतयेत्यपि बोध्यम्। यथाश्रुते द्वितीयात्यन्तिकत्वसमन्वयाप्रदर्शनेन न्यूनतापत्तेः। "**स्वसमानाधिकरणे**"तीति—। प्रथमात्यन्तिकत्वघटकदुःखप्रागभावे तथा द्वितीयात्यन्तिकत्वघटकदुःखे विशेषणतयोपक्षिप्तमिति शेषः।

"**इदानीन्तनमुक्ते**"रिति। पुरुषान्तरसंसारकालीनमुक्तेरित्यर्थः। मुक्तेरिदानीन्तनत्वविशेषणञ्च मुक्तौ पुरुषान्तरीयदुःखप्रागभावसमानकालीनत्वोपपादकम्। नच महाप्रलयसमुत्पन्नस्य दुःखध्वंसस्य सामान्यत एव दुःखप्रागभावासमानकालीनतया दुःखासमानकालीनतया च तत्रैव स्वसामानाधिकरण्याघटितात्यन्तिकत्वसम्भवेन कथमसम्भव इति वाच्यं, महाप्रलये मानाभावात् सर्वः कालो भोगवान् अदृष्टवान् वा कालत्वादित्यनुमानसिद्धसर्वकालवृत्तिभोगादृष्टाभ्यां महाप्रलयस्य व्याघाताच्च।

तदेवं प्रथमात्यन्तिकत्वघटकदुःखप्रागभावे द्वितीयात्यन्तिकत्वघटकदुःखे च स्वसामानाधिकरण्यविशेषणदानेन मुक्त्यात्मकदुःखध्वंसे पुरुषान्तरीयदुःखप्रागभावसमानकालीनत्व-पुरुषान्तरीयदुःखसमानकालीनत्वयोः सत्त्वेऽपि स्वसमानाधिकरणदुःखप्रागभावा-

**अथात्र स्वपदं तत्तद्दुःखध्वंसपरम्। दुःखध्वंससामान्य[1]परत्वे सर्वेषामेव[2] दुःखप्रागभावादीनां दुःखध्वंससमानाधिकरणतया अव्यावर्तकतापत्तेः[3]। एवञ्च तत्तद्दुःखध्वंससमानाधिकरणेत्यादि पर्यवसितम्।[4] तथाचाननुगमः। दुःखध्वंसानां विशिष्योपादाने असमानकालीनान्तविशेषणं व्यर्थम्।[5]**

---

समानकालीनत्वस्य स्वसमानाधिकरणदुःखासमानकालीनत्वस्य च सत्त्वान्नासम्भव इति भावः।

महाप्रलयस्य प्रमितत्वाङ्गीकारे तु महाप्रलयकालोत्पन्नदुःखध्वंसे स्वसामानाधिकरण्याघटितात्यन्तिकत्वसम्भवेन प्रकृतासम्भवपदमव्याप्तिपरं मन्तव्यम्। सर्वः कालो भोगवान्, अदृष्टवान् वा कालत्वादित्यनुमानस्य प्रयोजकाभावेन एकैकशः सर्वेषामेव जीवानां मुक्तेर्युक्त्यनुगृहीतत्वेन सर्वान्तिममुक्तौ लक्षणगमनादसम्भवपदस्याव्याप्तिपरत्वमवश्यमभ्युपेयम्। क्वचि'दव्याप्तिवारणाय' इत्येव पाठः।

मुक्तिसामान्यलक्षणमुक्त्वा लक्ष्ये तत्सङ्गतिं तद्वाक्यघटकपदव्यावृत्तिञ्चाभिधाय ग्रन्थकृत् प्रतिपक्षदृष्ट्या तल्लक्षणं दूषयितुमुपक्रमते **"अथे"**त्यादिना। अथशब्दः प्रकृतकार्यारम्भं व्याचष्टे। तदुक्तममरसिंहेन 'मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथे'ति। तथाच इदानीं मया लक्षणं दूषयितुमारभ्यत इत्यर्थः। अत्रेत्यत्र सप्तम्यर्थो घटकत्वम्, तस्य स्वपदेऽन्वयः। तेन निरुक्तमुक्तिलक्षणवाक्यघटकं स्वपदमित्यर्थः।

साक्षात्परम्परया वा यः स्वार्थस्य विशेष्यस्तत्र स्वपदशक्त्या प्रकृते दुःखध्वंसस्य परम्परया स्वार्थविशेष्यत्वात् स्वपदस्य दुःखध्वंसपरत्वमभ्युपेयम्। तदत्र स्वपदस्य दुःखध्वंससामान्यपरत्वं तद्विशेषपरत्वं वेति संशयं निराकर्तुमाह **"अत्र स्वपदं तत्तद्दुःखध्वंसपरमि"**ति। स्वत्वस्याननुगतत्वेन तत्तद्व्यक्तिविश्रान्ततया प्रकृते स्वपदं तत्तद्दुःखध्वंसरूपविशेषबोधनेच्छयैवोच्चारितमित्यर्थः। न तु दुःखध्वंससामान्यबोधनेच्छयेति भावः।

स्वत्वस्यानुगतत्वमभ्युपेत्य स्वपदस्य दुःखध्वंससामान्यपरत्वस्वीकारे दोषमाह **"दुःखध्वंससामान्यपरत्व"** इत्यादिना। प्रकृतस्वपदस्येति शेषः। **"सर्वेषामेवेति"**—। इदानीन्तनमुक्तेः समानाधिकरणत्वेन तद्व्यधिकरणत्वेन चाभिमतानां निखिलानामेवेत्यर्थः। **"दुःखप्रागभावादीनामि"**त्यादिपदेन द्वितीयात्यन्तिकत्वघटकदुःखपरिग्रहः। तथाच सर्वेषामेव दुःखप्रागभावानां सर्वेषामेव दुःखानाञ्चेत्यर्थः। प्रथमलक्षणे दोषदानाय दुःखप्रागभावोपन्यासः, द्वितीयलक्षणे दोषदानाय च दुःखोपन्यासः।

1 C ध्वंस before परत्वे 2 C omits सर्वेषामेव 3 D reads समानाधिकरणत्वान्मुक्त्यात्मकध्वंसे तत्समानाधिकरणतयाऽव्याप्त्यापत्तेः (for दुःखध्वंससमानाधिकरणतयाऽव्यावर्तकतापत्तेः) 4 A reads अथ स्वत्वस्यैक्याभावात्तत्दुःखध्वंससमानाधिकरणदुःखप्रागभावासमानकालीनस्तत्तद्दुःखध्वंस इति पर्यवसितम् (for अथात्र स्वपदं तत्तद्दुःखध्वंसपरम्—० समानाधिकरणेत्यादि पर्यवसितम्) 5 A reads वैयर्थ्याच्च (for व्यर्थम्) वैयर्थ्याच्चेति पाठो न समीचीनतया प्रतीयते, पञ्चम्यर्थस्यान्वयानुपपत्तेः।

"**दुःखध्वंससमानाधिकरणतये**"ति। इदानीन्तनमुक्तात्मवृत्तिदुःखप्रागभावस्य तथाविधदुःखस्य च इदानीन्तनमुक्तिरूपदुःखध्वंससामानाधिकरण्यमिदानीन्तनसंसारिपुरुषीयदुःखप्रागभावस्य तथाविधदुःखस्य च तादृशपुरुषीयदुःखध्वंससामानाधिकरण्यमित्येवंरीत्येति भावः।

"**अव्यावर्तकतापत्तेरि**"ति। तथाहि पुरुषान्तरीय दुःखप्रागभावस्य पुरुषान्तरीयदुःखस्य च व्यावर्त्तनार्थमेव मुक्तिलक्षणे दुःखप्रागभावे दुःखे च स्वसामानाधिकरण्यविशेषणमुपादीयते। तत्र पुरुषान्तरीयदुःखप्रागभावस्तथा पुरुषान्तरीयदुःखं यदि निरुक्तरीत्या स्वसमानाधिकरणे स्यातां तदा किमनेन व्यावर्तनीयमिति व्यावर्तनीयाभावेन स्वसमानाधिकरणविशेषणस्याव्यावर्तकत्वं तेनास्य विशेषणस्य वैयर्थ्यञ्च। तथा मुक्तिदशायां स्वसमानाधिकरणदुःखप्रागभावत्वादिना मुक्तात्मवृत्तिदुःखप्रागभावादेरिव पुरुषान्तरीयदुःखप्रागभावादेरपि शक्योपादानतया मुक्तिरूपदुःखध्वंसस्य तत्समानकालीनत्वेनासम्भवोऽव्याप्तिर्वा। तदेवं प्रकृते स्वपदस्य दुःखध्वंससामान्यपरत्वं न शक्यमभ्युपगन्तुमिति भावः।

"**एवञ्चे**"ति। स्वपदस्य दुःखध्वंससामान्यपरत्वे निरुक्तदोषप्रसङ्गात् तस्य तत्तद्दुःखध्वंसरूपविशेषपरत्वे सति चेत्यर्थः। "**इत्यादी**" ति। तत्तद्दुःखध्वंससमानाधिकरणदुःखप्रागभावासमानकालीनत्वं तत्तद्दुःखध्वंससमानाधिकरणदुःखासमानकालीनत्वञ्चेत्यर्थः। "**पर्यवसितमि**"ति। निरुक्तमात्यन्तिकत्वमिति शेषः। "**तथाचाननुगम**" इति। निरुक्तरीत्या सर्वेषामेव मुक्तिलक्षणानां प्रत्येकं तत्तद्दुःखध्वंसात्मकैकैकमात्रगतत्वेन नोक्तलक्षणस्य सकलमुक्तिसाधारणसामान्यलक्षणत्वं सम्भवतीति भावः।

किञ्च लक्षणं द्विविधं भवति व्यवहारौपयिकमितरभेदानुमापकञ्च। तत्र लक्षणस्य व्यवहारौपयिकत्वकल्पे प्रकृतलक्षणस्य व्यवहारप्रयोजकता खल्वनायत्या तावदन्यान्यत्वेनैव स्वीकार्या। एवञ्च सुमहद् गौरवं प्रयोजकतावच्छेदकस्य। मुक्त्यात्मकतावद्दुःखध्वंसव्यक्तीनामेव तावदन्यान्यत्वघटकतया युगसहस्रेणापि तदज्ञानेन तद्घटिततावदन्यान्यत्वज्ञानाभावाद् व्यवहारानुपपत्तिः। इतरभेदानुमापकलक्षणकल्पे हेतुभूतलक्षणज्ञानेन लक्ष्येतरभेदस्य साधनीयतया तत्रापि अन्यतमत्वेन हेतुता वक्तव्या विशेषविशेषैकैकलक्षणस्य हेतुत्वाभ्युपगमे भागासिद्धेः। अतस्तत्रापि पूर्वोक्तरीत्यैव हेतुज्ञानानुपपत्त्या इतरभेदानुमित्यसिद्धिरित्यादयो दोषा लक्षणस्य अननुगतत्वेऽनुसन्धेयाः॥

"**तत्तद्दुःखध्वंसानां**" मुक्त्यात्मकदुःखध्वंसव्यक्तीनाम्। "**विशिष्योपादाने**" तत्तद्दुःखध्वंसत्वरूपविशेषधर्मपुरस्कारेणोपादाने। दुःखध्वंसत्वरूपसामान्यधर्मपुरस्कारेण तदुपादाने तद्रूपेण संसारकालीनदुःखध्वंसानामप्युपादातुं शक्यतया तत्रातिप्रसङ्गवारकतयैव असमानकालीनान्तविशेषणस्य सार्थक्यं स्यादिति **विशिष्ये**त्युक्तम्।

"**असमानकालीनान्तविशेषणं व्यर्थमि**"ति। तथाहि दुःखध्वंसे तावदसमानकालीनान्तविशेषणं संसारकालीनदुःखध्वंसातिव्याप्तिवारणायेति ग्रन्थकृतैव निरुक्तमधस्तात्। किन्तु मुक्तिलक्षणे यदि तत्तद्दुःखध्वंसत्वादिमुक्तिमात्रवृत्तिधर्मरूपेण मुक्त्यात्मकदुःखध्वंसव्यक्तीनामेव निवेशः क्रियते तदा संसारकालीनदुःखध्वंसातिव्याप्त्यसम्भवेन तत्तद्दुःखध्वंसमात्रस्यैव निर्दोषमुक्तिलक्षणत्वं भवितुमर्हति। तदलमनेनासमानकालीनान्तविशेषणेनेति भावः।

**यत्तु चरमदुःखध्वंसोऽपवर्गः। चरमत्वञ्च स्वसमानाधिकरणदुःखप्रागभावासमानकालीनदुःखगतो जातिविशेषः। न च तत्र मानाभावस्तत्त्वज्ञानजन्यतावच्छेदककोटिनिविष्टतयैव तत्सिद्धेः। दुःखध्वंसत्वस्य जन्यतावच्छेदकत्वे इदानीन्तनदुःखध्वंसे व्यभिचारात्, स्वसमानाधिकरणदुःखप्रागभावासमानकालीनदुःखध्वंसत्वस्य तथात्वे अननुगमेन कार्यकारणभावानन्त्यप्रसङ्गाद् विजातीयदुःखध्वंसत्वस्यैव तथात्वादिति।**

---

किञ्च असमानकालीनान्तं विशेषणं यत्र तादृशमसमानकालीनान्तविशेषणं प्रकृतलक्षणं, तद् व्यर्थम् स्वसमानाधिकरणसाध्यव्याप्यतावच्छेदकधर्मान्तरघटितत्वरूपपारिभाषिकवैयर्थ्यलक्षणाक्रान्तमित्यपि मूलार्थः। तथाहि तत्तद्दुःखध्वंससमानाधिकरणदुःखप्रागभावासमानकालीनतत्तद्दुःखध्वंसत्वरूपं तत्तद्दुःखध्वंससमानाधिकरणदुःखासमानकालीनतत्तद्दुःखध्वंसत्वरूपं धर्मञ्च स्वपदेनोपादाय तत्समानाधिकरणं यदितरभेदादिरूपसाध्यव्याप्यतावच्छेदकधर्मान्तरं तत्तद्दुःखध्वंसत्वं तत्तद्दुःखध्वंसगततत्तद्व्यक्तित्वपर्यवसितं तद्घटितत्वस्य प्रकृतलक्षणे सत्त्वात् पारिभाषिकवैयर्थ्यलक्षणसमन्वयः।

प्रागुक्तात्यन्तिकत्वघटितलक्षणद्वयस्यैव स्वत्वघटितत्वेनाननुगतत्वात् तदपेक्षया सुतरां लाघवाच्च स्वत्वाघटितमनुगतं लघु लक्षणं प्रस्तौति "**यत्तु**" इत्यादिना।

अथ "**चरमदुःखध्वंस**" इत्यत्र चरमत्वं कुत्र विशेषणम्, दुःखे दुःखध्वंसे वा? तस्य दुःखविशेषणत्वे दुःखप्रागभावासमानकालीनत्वमेव तत्स्वरूपमायाति। एवञ्च यद्दुःखोत्तरं कुत्राप्यात्मनि न दुःखोत्पादस्तस्यैव दुःखप्रागभावसामान्यासमानकालीनत्वेन तद्ध्वंस एव केवलं निरुक्तमुक्तिलक्षणसमन्वयेन मुक्त्यात्मकेषु तदितरदुःखध्वंसेष्वव्याप्तिरपरिहार्या भवति। तत्रापि दुःखप्रागभावांशे स्वसामानाधिकरण्यनिवेशेन तत्परिहारे कृते पूर्वोक्तरीत्या कथञ्चिदननुगमदोषस्य निवृत्तावपि पूर्वापेक्षया लक्षणस्यास्य लाघवानुपपत्तिः। दुःखे तद्विशेषणमनुपादाय दुःखध्वंसे तद्विशेषणोपादाने तस्यापि स्वसमानाधिकरणदुःखध्वंसप्रागभावासमानकालीनत्वरूपस्यैव तस्य वक्तव्यतया तद्घटितलक्षणे तथैव दोषापात इति निरुक्तलक्षणघटकीभूतचरमत्वस्य जातिरूपत्वं प्रतिपादयति "**चरमत्वञ्चेत्यादिना**"। चरमत्वमिति निरुक्तलक्षणघटकीभूतमिति शेषः। तदिदं दुःखांशे विशेषणं न तु दुःखध्वंसे जातेरभाववृत्तित्वस्य जातिबाधकनिरस्तत्वात्। तदेव स्पष्टमाह "**स्वसमानाधिकरणे**" त्यादिना। तस्य चरमदुःखस्य स्वसमानाधिकरणदुःखप्रागभावासमानकालीनत्वेऽपि न तद्रूपेण तस्य लक्षणे निवेशः, परं तादृशचरमत्वेनैव रूपेण, अतो न लक्षणेऽस्मिन्ननुगमो लाघवानुपपत्तिर्वेति समनुसन्धेयम्।

ननु स्वसमानाधिकरणदुःखप्रागभावासमानकालीनदुःखमेवासिद्धं यद्गतां चरमत्वजातिमङ्गीकृत्य लक्षणमिदं प्रस्तुतम्। प्रागभावस्य प्रतियोगिनाश्यत्वनियमेन प्रतियोग्युत्पत्तिकालात् पूर्वं प्रतियोगिरूपकारणासमवधानेन प्रतियोग्युत्पत्तिकाले तन्नाशासम्भवे

प्रतियोगिकाले तत्सत्त्वस्यावश्यकत्वादिति चेन्न, असमानकालीनत्वस्य समानकालीनत्वाभावरूपत्वात् निरुक्तासमानकालीनत्वस्य चरमदुःखोत्पत्तिद्वितीयक्षणावच्छेदेन चरमदुःखवृत्तित्वे बाधाभावेन न तादृशदुःखाप्रसिद्धिरिति ध्येयम्। भेदस्याव्याप्यवृत्तित्वसिद्धान्ते तादृशदुःखप्रागभावसमानकालीनान्यत्वरूपतादृशासमानकालीनत्वार्थकत्वेऽपि तथैव नाप्रसिद्धिः। अथवा स्वसमानाधिकरणदुःखप्रागभावासमानकालीनेत्यस्य स्वसमानाधिकरणदुःखसामग्र्यसमानकालीनेत्यर्थे तात्पर्यम्। सामग्री च कार्याव्यवहितपूर्वक्षण एव। तेन चरमदुःखापायस्य जन्मापायाधीनत्वाज् जन्मापायस्य च धर्माधर्मरूपप्रवृत्तिनाशाधीनत्वाच्चरमदुःखोत्पत्तिक्षणे दुःखकारणीभूताधर्मनाशस्यावश्यमभ्युपेयत्वेन चरमदुःखे तादृशदुःखसामग्र्यसमानकालीनत्वमक्षतमेवेति न तथाविधदुःखाप्रसिद्धिः। अत्र कल्पे असमानकालीनेत्यस्य समानकालीनान्यत्वरूपार्थपरिग्रहेऽपि न क्षतिः। प्रागभावस्य प्रतियोगिसामग्रीनाश्यत्वसिद्धान्ते तु न शङ्कैवेति।

ननु 'प्रमेयसिद्धिः प्रमाणाद्धि' इति नियमस्य सर्वतन्त्रसिद्धान्ततया प्रमाणमन्तरेण न वस्तुसिद्धिरभ्युपगन्तुं शक्या; तदस्य चरमत्वरूपस्य जातिविशेषस्य प्रमाणविरहे कथं सिद्धिरित्याशंकायामाह—"**नचे**"त्यादि"। "**तत्रे**"ति। चरमत्वरूपे निरुक्ततादृशदुःखगतजातिविशेषे इत्यर्थः। "**तत्त्वज्ञानजन्यतावच्छेदककोटिनिविष्टतया**" चरमदुःखध्वंसत्वरूपतत्त्वज्ञानजन्यतावच्छेदकघटकतया। "**तत्सिद्धेः।**" चरमत्वरूपजातिविशेषसिद्धेः। तथाहि चरमदुःखध्वंसत्वावच्छिन्नं प्रति तत्त्वज्ञानं कारणं, तत्र चरमदुःखध्वंसत्वं कार्यतावच्छेदकम्, तद्घटकञ्च चरमत्वं, तच्च यदि स्वसमानाधिकरणदुःखप्रागभावासमानकालीनत्वादिरूपं स्यात्, तदा महागौरवं स्यादतो लाघवानुरोधेन जातिरूपमेव तत् प्रत्येतव्यम्। इत्थञ्च अनुमानप्रमाणेनैवात्र तत्सिद्धिः। अनुमानप्रकारश्च, तत्त्वज्ञानजन्यता परम्परया चरमपदप्रवृत्तिनिमित्तनिष्ठावच्छेदकतानिरूपिता चरमपदप्रवृत्तिनिमित्तघटितधर्मावच्छिन्नत्वादिति। अनेनानुमानेन चरमपदप्रवृत्तिनिमित्तस्य जातित्वे लाघवमिति लाघवज्ञानानुगृहीतेन तत्त्वज्ञानजन्यतायां जातिरूपचरमपदप्रवृत्तिनिमित्तघटितसाध्यसिद्ध्या प्रकृतचरमत्वरूपजातिसिद्धिः।

ननु चरमदुःखध्वंसत्वस्य तत्त्वज्ञानजन्यतावच्छेदकत्वापेक्षया दुःखध्वंसत्वमात्रस्य तादृशजन्यतावच्छेदकत्वे महालाघवं भवति, तत् तन्मात्रमेव कुतो नावच्छेदकमभ्युपगम्यत इत्याकाङ्क्षायामाह "**दुःखध्वंसत्वस्येत्यादि।** चरमत्वाविशेषितदुःखध्वंसत्वस्येत्यर्थः। जन्यतावच्छेदकत्वे तत्त्वज्ञानजन्यतावच्छेदकत्वे। "**इदानीन्तनेति**—तत्त्वज्ञानानधीनसंसारकालीनेत्यर्थः। "**व्यभिचारादि**"ति तत्त्वज्ञानरूपकारणासत्त्वे दुःखध्वंसत्वावच्छिन्नरूपकार्यसत्त्वरूपव्यभिचारादित्यर्थः। अतो लाघवमिदमकिञ्चित्करमिति भावः। व्यभिचारपदोत्तरप्रकृतपञ्चम्यर्थहेतुत्वस्य, वक्ष्यमाणे विजातीयदुःखध्वंसत्वस्य तथात्वे अन्वयः। तथात्वपदोत्तरपञ्चम्यर्थस्य च प्रागुक्ततत्त्वज्ञानजन्यतावच्छेदककोटिनिविष्टतायामन्वयः प्रत्येतव्यः। उत्तरत्रापि तथा। अन्यथा प्रकृततथात्वपदोत्तरपञ्चम्यर्थस्यान्वयानुपपत्तेः।

स्वसमानाधिकरणेत्यादिविशेषणविशेषितदुःखध्वंसत्वस्य जन्यतावच्छेदकत्वमङ्गीकृत्य यदि निरुक्तव्यभिचारो वार्यते तदाप्याह "**स्वसमानाधिकरणे**"त्यादि। "**तथात्वे**" तत्त्व-

**तदसद्, दुःखनिष्ठतादृश[1]जातेर्गोवधादिजन्यतावच्छेदकजात्या संकर-प्रसङ्गात् ।**

---

ज्ञानजन्यतावच्छेदकत्वे । "**अननुगमेने**"ति सकलचरमदुःखगतस्यैकस्य स्वत्वस्याभावेन दुःखविशेषणकोटिप्रविष्टस्वत्वस्य तत्तद्व्यक्तिविश्रान्ततया तत्तद्दुःखसमानाधिकरणदुःख-प्रागभावासमानकालीनदुःखध्वंसत्वस्यैव अनायत्या तत्त्वज्ञान-जन्यतावच्छेदकत्वस्याभ्युपगन्त-व्यतया अनन्तचरमदुःखव्यक्तिभेदेन प्रत्येकमेकैककार्यकारणभावकल्पनापत्त्या अनन्तकार्य-कारणभावप्रभवमहागौरवप्रसङ्ग इति भावः । पूर्वं स्वपदेन दुःखध्वंसस्य प्रकृते च स्वपदेन दुःखस्य परिग्रहान्नात्र पौनरुक्त्यम् । **विजातीयदुःखध्वंसत्वस्यैवेति**—चरमत्वरूपवैजात्य-विशेषितदुःखध्वंसत्वस्यैवेत्यर्थः । एतेन न प्रागुक्तव्यभिचारो नापि स्वत्वाननुगमप्रयुक्त-निरुक्तकार्यकारणभावानन्त्यप्रसङ्ग इति भावः । एवञ्च चरमदुःखध्वंसो मुक्तिरिति निर्दोषमनुगतं लघुमुक्तिलक्षणं सुव्यवस्थितमिति यत्तु-कल्पाभिप्रायः ।

यत्तु-कल्पोक्तं 'चरमदुःखध्वंसो मुक्ति'रिति मुक्तिलक्षणं दूषयितुमुपक्रमते "**तदसदि**"त्यादिना । तदिति दुःखनिष्ठचरमत्वजातिघटितं मुक्तिलक्षणमित्यर्थः । तद-सदित्यत्र हेतुमाह "**दुःखनिष्ठे**"त्यादिना । "दुःखनिष्ठतादृशजाते"रिति पूर्वोक्तायाश्चरमत्व-लक्षणचरमदुःखगतजातेरित्यर्थः । "**गोवधादी**"त्यादि—अत्रेदमवधेयम् । विभिन्नप्रकारैः शास्त्रनिषिद्धकर्मभिर्विभिन्नजातीयानि पापानि जन्यन्ते, तद्द्वारेण च विभिन्नजातीयानि दुःखानि समुत्पाद्यन्ते । अत एव क्रियाविशेषप्रसूतपातकभेदेन शास्त्रे विहिताः प्रायश्चित्तभेदाः श्रूयन्ते । श्रूयते च सम्यगकृतप्रायश्चित्तविशेषस्य कृतगोवधादिकर्मणः पिपीलिकादि-वधजन्यदुःखादुत्कटं विजातीयं दुःखम् । अत एव तत्तद्विजातीयदुःखं प्रति तत्तत्कर्मणां विशिष्य हेतुता कल्प्यते । ततो गोवधादिजन्यतावच्छेदकजात्येत्यस्य गोवधादिजन्यविजातीय-दुःखगततादृशवैजात्येनेत्यर्थः ।

"**संकरप्रसङ्गादि**"ति—अत्र प्रसङ्गशब्दो नापत्तिमभिधत्ते, आपत्तौ पक्षे आपाद्य-व्यतिरेकनिश्चयस्यानुगुणतया सुतरामपेक्षितत्वेन चरमत्वरूपे निरुक्तचरमदुःखगतधर्मविशेषे पक्षीभूते प्रकृतापाद्यत्वाभिमत-सङ्कराभावनिश्चयस्यावश्यमभ्युपगन्तव्यतया तादृशे पक्षे संकरेण हेतुना सिषाधयिषितस्य जातित्वाभावस्य साधयितुमशक्यत्वेनाभिप्रेतासिद्धेरर्थान्तर-प्रसङ्गात् । किन्तु प्रमितः सङ्गः प्रसङ्ग इति व्युत्पत्त्या प्रमाविषयीभुतं सम्बन्धम् । तेन संकरप्रतियोगिकप्रमाविषयीभूतसम्बन्धादिति संकरप्रसङ्गादित्यस्यार्थः पर्यवसितः । दुःखनिष्ठजातेरिति चरमदुःखनिष्ठजातित्वेनाभिमतस्य चरमत्वलक्षणविलक्षणधर्मस्येत्यर्थः । अत्र षष्ठ्यर्थो निष्ठत्वं तस्य संकरप्रसङ्गपदार्थेऽन्वयः, तेन तादृशधर्मनिष्ठप्रमितसंकरसम्बन्धा-दिति वाक्यार्थः । अत्र तादृशधर्मनिष्ठेत्यनेन प्रमितेत्यनेन च प्रकृते निरुक्तसंकरसम्बन्धेन हेतुना चरमत्वरूपधर्मस्य जातित्वाभावसाधने स्वरूपासिद्धिशंका वारिता । तादृशधर्मनिष्ठेत्यस्य प्रमितेत्यस्य च मिथो हेतुहेतुमद्भावस्य वाक्यार्थान्तर्गतत्वाङ्गीकारेण नैकतरवैयर्थ्यम् ।

---

1 B C omit तादृश

अथवा प्रकृष्टः सङ्गः प्रसङ्गः प्रकृष्टः सम्बन्धोऽनारोपितः संसर्ग इति यावत् तस्मात्। प्रकर्षश्चात्र अनारोपितत्वरूपः। अन्यत् पूर्ववत्।

अथवा प्रसङ्गशब्द आपत्तिपर एव। संकरप्रसङ्गादित्यस्य संकरशब्दादस्त्यर्थाच्-प्रत्ययेन संकरशब्दस्यैव पारिभाषिकसांकर्यविशिष्टपरत्वेन वा विशेषलक्षणया संकीर्ण-जातिप्रसङ्गादित्यर्थः। न च संकीर्णाया जातेरप्रसिद्धया वाक्यार्थाप्रसिद्धिरिति वाच्यम्; 'जातित्वे साङ्कर्यसामानाधिकरण्यप्रसङ्गादित्यस्यैव पर्यवसितवाक्यार्थत्वोपगमात्। तथाहि यदि प्रागुक्तरीत्या तत्त्वज्ञानजन्यतावच्छेदककोटिप्रविष्टतया प्रकृतलक्षणघटकचरमत्वस्य लाघवेन जातित्वमङ्गीक्रियते, तदा तत्र गोवधादिजन्यतावच्छेदकजातिनिरूपितसांकर्यसत्त्वेन जातित्वे तादृशसांकर्यसामानाधिकरण्यापत्तिः पदं कुरुते। निरुक्तापत्तेराकारश्च,—जातित्वं यदि तत्त्वज्ञानजन्यतावच्छेदकप्रविष्टचरमपदप्रवृत्तिनिमित्तधर्मवृत्ति स्याज् जातिसांकर्य-समानाधिकरणं स्यात्। तादृशापत्तेस्तत्त्वज्ञानजन्यतावच्छेदकप्रविष्टचरमपदप्रवृत्तिनिमित्त-धर्मवृत्तित्वरूपापादकवत्ताबुद्धिविरोधितया जातित्वे तादृशधर्मवृत्तित्वबुद्धिर्नास्पदं प्रपद्यत इति तादृशधर्मस्य फलतो जातित्वाभावः सिध्यति। तथा च निरुक्तधर्मघटितलक्षणानु-सरणेन शक्यो लक्षणाननुगमदोषः परिहर्तुमिति भावः।

प्रकृतलक्षणघटकतत्त्वज्ञाननाश्यतावच्छेदकत्वाभिमतचरमत्वरूपधर्मे प्रकृतं साङ्कर्य-मुपपादयति तथाहीत्यादिना समावेशादित्यन्तेन। एतेन परस्परात्यन्ताभावसमानाधिकरण-योरेकत्र समावेशः सङ्कर इत्येवं सङ्करस्वरूपं सूचितम्। तेन स्वाभाववद्वृत्तिस्वसमानाधि-करणधर्माभाववद्वृत्तित्वं स्वनिष्टसङ्कर इति पर्यवस्यति। वस्तुतस्तु लाघवेन स्वसामानाधि-करण्य-स्वव्यभिचारित्व-स्वाव्यापकत्वैतत्त्रितयसम्बन्धेन जातिविशिष्टत्वं धर्मविशिष्टत्वं वा, तदर्थश्च स्वसामानाधिकरण्य-स्वाभाववद्वृत्तित्व-स्वसमानाधिकरणाभावप्रतियोगित्वैतत्त्रि-तयसम्बन्धेन जातिविशिष्टत्वं किञ्चिद्धर्मविशिष्टत्वं वा। भूतत्वमूर्तत्वयोरुभयोरेव जातित्वा-भावमभ्युपगच्छतां मते तादृशत्रितयसम्बन्धेन किञ्चिद्धर्मविशिष्टत्वं। तयोर्मध्ये मूर्तत्वस्य जातित्वं न भूतत्वस्येति वदतान्तु मूर्तत्वे व्यभिचारवारणाय किञ्चिद्धर्मविशिष्टत्वमित्यनुक्त्वा जातिविशिष्टत्वमेव साङ्कर्यं वक्तव्यम्। तेन चानेन जातिसङ्कीर्णधर्मे जातित्वाभावः सिध्यति। मिथोविरुद्धजात्योः परस्पराभावसामानाधिकरण्यात् स्वाभाववद्वृत्तित्व-स्वसमा-नाधिकरणाभावप्रतियोगित्वैतदुभयसम्बन्धेन प्रत्येकमेव जातिविशिष्टत्वस्य सत्त्वाद् व्यभिचारः स्यादिति स्वसामानाधिकरण्यघटितत्रितयसम्बन्धनिवेशः। घटत्वादिजातिषु स्वसामानाधि-करण्य-स्वसमानाधिकरणाभावप्रतियोगित्वैतदुभयसम्बन्धेन पृथिवीत्वादिरूपजातिविशिष्टत्व-सत्त्वाद् व्यभिचार इत्यतः स्वाभाववद्वृत्तित्वसम्बन्धनिवेशः। पृथिवीत्वादिजातिषु स्वसामानाधिकरण्य-स्वाभाववद्वृत्तित्वैतदुभयसम्बन्धेन घटत्वादिरूपजातिविशिष्टत्वसत्त्वाद् व्यभिचार इत्यतः स्वसमानाधिकरणाभावप्रतियोगित्वदलम्। निरुक्तजातिविशिष्टत्व-गर्भे जातीनां तत्तद्व्यक्तित्वेन निवेशस्तत्तज्जातिनिरूपितसाङ्कर्यस्य पृथक् पृथगेव च जातित्वाभावसाधने हेतुभावः प्रत्येतव्यः। अतएव 'उपेक्षात्वं हि न जातिश्चाक्षुषत्वादिना सङ्करप्रसङ्गादांशिकत्वोपगमा' च्चेति दीधितिव्याख्याने गदाधरः—'तत्तज्जातिनिरूपित-सङ्करस्यच पृथगेव हेतुता बोध्या ननु मिलितस्य वैयर्थ्यात्। तज्जात्यव्यापकत्वे सति

तज्जातिव्यभिचारित्वे सति तज्जातिसामानाधिकरण्यं तत्संकर' इति प्राह।

जातिविशिष्टत्वरूपसांकर्यकल्पे स्वसामानाधिकरण्यघटकमधिकरणत्वं समवायेन वृत्तित्वञ्च समवायदैशिकस्वरूपान्यतरसम्बन्धेन, अन्यथा मिथोविरुद्धजात्योरप्येकतरजातौ कालिकेनापरजात्यधिकरणनिरूपितवृत्तित्वस्य समवायेनापरजात्यधिकरणे कालिकेन वृत्तित्वस्य च सत्त्वाद् व्यभिचारप्रसङ्गात्। स्वाभाववद्वृत्तित्वघटकाभावीयप्रतियोगित्वं समवायसम्बन्धावच्छिन्नवैशिष्टयव्यासज्यवृत्तिधर्माद्यनवच्छिन्नं स्वाभाववत्त्वं दैशिकस्वरूप-सम्बन्धावच्छिन्नं वृत्तित्वञ्च समवायदैशिकस्वरूपान्यतरसम्बन्धावच्छिन्नं ग्राह्यम्, अन्यथा व्यधिकरणसंयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकपृथिवीत्वादिसामान्याभाव–पटत्वादिविशिष्टपृथिवीत्वाद्यभाव –जलत्वपृथिवीत्वोभयत्वाद्यवच्छिन्नप्रतियोगिताकाभावानां घटादौ वर्तमानतया तत्र च घटत्वादेः समवायेनैव सत्त्वेन समवायसम्बन्धावच्छिन्नप्रतियोगिताक-पृथिवीत्वादिसामान्याभाववति जलादौ तस्य कालिकसम्बन्धेन वर्तमानत्वेन घटत्वादौ व्याप्यजातावपि व्यापकपृथिवीत्वादिजातिनिरूपितसांकर्यसमन्वयेन व्यभिचारापत्तेः। स्वाभाववत्त्वस्य दैशिकस्वरूपसम्बन्धावच्छिन्नस्यानिवेशे कालिकेन सम्बन्धेन पृथिवीत्वाद्य-भावस्य घटादावपि सत्त्वेन तत्र च घटत्वस्य वर्तमानत्वेन तथैव तत्र सांकर्यसमन्वयाद् व्यभिचारापातः। वृत्तितावच्छेदकसंसर्गतया समवायसम्बन्धमात्रस्योपादाने चाक्षुषत्वादि-निरूपितसाङ्कर्येण हेतुना उपेक्षात्वादौ, प्रकृते गोवधादिजन्यतावच्छेदकजातिनिरूपित-साङ्कर्येण हेतुना तत्त्वज्ञाननाश्यतावच्छेदकत्वाभिमत–प्रकृतलक्षणघटक–चरमपदप्रवृत्ति-निमित्तधर्मे च चरमत्वलक्षणे जातित्वाभावसाधने हेतोः स्वरूपासिद्धिप्रसङ्गात्। उपेक्षात्वा-देरुपाधिस्वरूपत्वादिना दैशिकस्वरूपेणैव वृत्तिमत्त्वात्। वृत्तितायां दैशिकस्वरूपावच्छिन्न-त्वमवश्यं निवेश्यम्। उपेक्षात्वादेर्जातित्वमभिमन्यमानानां मते तस्य समवायेनैव वृत्तिमत्त्वात् स्वरूपसम्बन्धावच्छिन्नवृत्तित्वघटितसाङ्कर्यहेतोरसिद्धिदोषोद्भावननिषेधाय समवायस्यापि तदवच्छेदकसंसर्गत्वमुपेयमतोऽन्यतरत्वेनोभयोरुपादानम्।

स्वसमानाधिकरणाभावप्रतियोगित्वमित्यत्र सामानाधिकरण्यघटकमधिकरणत्वं सम-वायसम्बन्धावच्छिन्नं, वृत्तित्वं दैशिकस्वरूपावच्छिन्नं, प्रतियोगित्वञ्च समवायदैशिक-विशेषणतान्यतरसम्बन्धावच्छिन्नं तथा वैशिष्टयव्यासज्यवृत्तिधर्मानवच्छिन्नं ग्राह्यम्। अन्यथा तत्रापि कालिकसम्बन्धेन घटत्वादिव्याप्यजात्यधिकरणे जलादौ दैशिकस्वरूपेण वर्तमानस्य समवायसम्बन्धावच्छिन्नपृथिवीत्वादिरूपव्यापकजातिसामान्याभावस्य समवायसम्बन्धा-वच्छिन्नवैशिष्टयाद्यनवच्छिन्नप्रतियोगितायाः, समवायेन घटत्वाद्यधिकरणे घटादौ जलादिगत-तादृशपृथिवीत्वादिसामान्याभावस्य कालिकेन सम्बन्धेन वर्तमानस्य तादृश्या एव प्रति-योगितायाः, समवायेन घटत्वाद्यधिकरणे घटादौ संयोगसम्बन्धावच्छिन्नप्रतियोगिताक-पृथिवीत्वादिसामान्याभावस्य वैशिष्टयाद्यनवच्छिन्नप्रतियोगितायाः समवायसम्बन्धावच्छिन्न-विशिष्टपृथिवीत्वाद्यवच्छिन्नाभावस्य वैशिष्टयाद्यवच्छिन्नायाः समवायसम्बन्धावच्छिन्नाया एव प्रतियोगितायाश्च पृथिवीत्वादौ सत्त्वेन तत्र घटत्वादिनिरूपितसांकर्यापातेन प्रोक्त-रीत्यैव व्यभिचारप्रसङ्गः।

नचैवमपि समवायदैशिकविशेषणत्वान्यतरसम्बन्धावच्छिन्नाया एव प्रतियोगितायाः

**तथाहि गोवधजन्यतावच्छेदिका[1] जातिस्तत्त्वज्ञानानाश्य[2] दुःखे, तत्र न[3] तत्त्वज्ञाननाश्यतावच्छेदिका जातिः,[4] सा च तत्त्वज्ञाननाश्यब्राह्मणवधादि-**

---

प्रकृते सांकर्यघटकत्वेनोपादानात् समवायेन सम्बन्धेन घटत्वादिमति घटादावपि समवाय-दैशिकस्वरूपान्यतरसंसर्गात्मकेन दैशिकस्वरूपेण पृथिवीत्वादिसामान्याभावसत्त्वात्तथैव दोष इति वाच्यम्; तादृशान्यतरसम्बन्धावच्छिन्नप्रतियोगित्वमित्यस्य तादृशान्यतरत्वाव-च्छिन्नसांसर्गिकावच्छेदकतानिरूपितप्रतियोगित्वार्थकत्वात्। दैशिकस्वरूपेण पृथिवीत्वं नास्तीत्यादिरूपस्य पृथिवीत्वादिसामान्याभावीयतत्रत्यप्रतियोगितायास्तादृशान्यतरनिष्ठ-सांसर्गिकावच्छेदकतानिरूपितत्वेऽपि तत्रत्यसांसर्गिकावच्छेदकताया दैशिकस्वरूपत्वमात्रा-वच्छिन्नत्वान्न दोषः। समवायदैशिकविशेषणत्वान्यतरसम्बन्धेन पृथिवीत्वं नास्तीत्याद्य-भावप्रतियोगितैव तादृशान्यतरत्वावच्छिन्नसांसर्गिकावच्छेदकतानिरूपिता, सा चात्र नास्ति; अन्यतरसम्बन्धघटकसमवायेन पृथिवीत्वाद्यधिकरणे घटादौ तादृशान्यतरसम्बन्धेन पृथिवीत्वं नास्तीत्याद्यभावस्यासत्त्वात्। अन्यतरत्वस्याव्यासज्यवृत्तितयैकतरसम्बन्धमात्रेण पृथिवी-त्वाद्यधिकरणेऽपि तत्रान्यतरत्वावच्छिन्नसांसर्गिकावच्छेदकतानिरूपितपृथिवीत्वत्वावच्छिन्ना-धेयतानिरूपिताधिकरणतायास्तादृशाभावविरोधिन्या वर्तमानत्वादिति।

केचित् स्वसमानाधिकरणाभावप्रतियोगित्वमित्यत्र स्वसमानाधिकरणभेदप्रतियोगिता-वच्छेदकत्वं निवेशयन्ति। तन्मते पूर्वकल्पे प्रतियोगितायामिवात्र कल्पे प्रतियोगितावच्छेदक-तायामेव समवायदैशिकविशेषणत्वान्यतरसम्बन्धावच्छिन्नत्व-वैशिष्ट्याद्यनवच्छिन्नत्वविशेषणं देयम्, अन्यथा घटादावपि विषयितया पृथिवीत्ववान् न, पटवृत्तित्वविशिष्टपृथिवीत्ववान् न इत्यादिभेदमादाय प्रागुक्तदोषापातात्। अन्यत् सर्वं प्रायेण तुल्यमेवेति।

ननु निरुक्तसाङ्कर्यस्य जातिबाधकत्वे किं मानमिति चेत्, स्वसामानाधिकरण्य-स्वाभावसामानाधिकरण्योभयसम्बन्धेन जातिविशिष्टजातित्वावच्छेदेन स्वसमानाधिकरणा-भावप्रतियोगित्वाभाव इति व्याप्तेः, यज्जात्यव्यापकत्वे सति यज्जातिव्यभिचारि यत् तन्न तज्जातिसमानाधिकरणजातिरिति सामान्यतो व्याप्तेर्वा भङ्गप्रसङ्ग एव सांकर्यस्य जातिबाधकत्वे मानमिति प्राञ्चः। तादृशतादृशव्याप्तौ मानाभावान्न सांकर्यस्य जाति-बाधकत्वमिति नव्याः प्राहुः। अत्रापरविचित्रविचारविस्तरो गदाधरीयानुमितिदीधिति-व्याख्याने मदीयजातिबाधकविचारग्रन्थादौ चानुसन्धेयः।

गोवधेत्यादिना नाश्यतावच्छेदिकेत्यन्तेन स्वसमानाधिकरणाभावप्रतियोगित्वं, सा चेत्यादिना जन्यतावच्छेदिकेत्यन्तेन स्वाभाववद्वृत्तित्वम्, तत्त्वज्ञानेत्यादिना उभयसमावेश इत्यन्तेन च स्वसामानाधिकरण्यमुपपादितम्। तेन तत्त्वज्ञाननाश्यतावच्छेदकीभूतचरमत्वरूप-धर्मे साङ्कर्येण जातित्वाभावसिद्धिरुपपन्ना भवतीति ध्येयम्। "**तत्त्वज्ञानानाश्यदुःख**" इति। चरमदुःखभिन्नसंसारकालीनगोवधजन्यदुःख इत्यर्थः। **तत्त्वज्ञाननाश्यतावच्छेदिकेति** चरमत्व-

1 A जन्यतावच्छेदक 2 D भोगनाश्य (for तत्त्वज्ञानानाश्य) 3 A omits न
4 A omits जातिः

**जन्यदुःखे, तत्र न गोवधादिजन्यतावच्छेदिका जातिः[1], तत्त्वज्ञाननाश्यगोवधजन्यदुःखे तयोः समावेशादि[2]ति।**

**यत्तु[3] गोवधादिजन्यतावच्छेदकजातीनां तादृशजातिव्याप्यविरुद्धभेदा[4]न्नानात्वम्, अतो न संकरः[5]।**

---

जातिरित्यर्थः। एवञ्च गोवधजन्यतावच्छेदकजातेरधिकरणे चरमदुःखभिन्ने इदानीन्तनगोवधजन्यदुःखे वर्तमानस्य तादृशचरमत्वाभावस्य प्रतियोगित्वादुक्तचरमत्वे स्वसमानाधिकरणाभावप्रतियोगित्वसमन्वयः।

"**सा चे**"ति तत्त्वज्ञाननाश्यतावच्छेदिका निरुक्तचरमत्वलक्षणाभिमता जातिरित्यर्थः। "**ब्राह्मणवधादिजन्ये**"ति गोवधभिन्ननिषिद्धकर्मजन्येत्यर्थः। एतेन तत्र गोवधजन्यतावच्छेदकजात्यभाव उपपादितः। तत्त्वज्ञाननाश्येत्यनेन तत्र तत्त्वज्ञाननाश्यतावच्छेदकनिरुक्तचरमत्वलक्षणधर्मस्य सत्त्वमुपपादितम्। एवञ्च गोवधजन्यतावच्छेदकजात्यभाववति गोवधभिन्नकर्मजन्यचरमदुःखविशेषे निरुक्तचरमत्वलक्षणधर्मस्य विद्यमानत्वेन तत्र स्वाभाववद्वृत्तित्वलक्षणस्वव्यभिचारित्वसमन्वयः।

"**तयो**"रिति। तत्त्वज्ञाननाश्यतावच्छेदिकाया गोवधजन्यतावच्छेदिकायाश्च जातेरित्यर्थः। तत्त्वज्ञाननाश्येत्यनेन गोवधजन्येत्यनेन च तत्त्वज्ञाननाश्यतावच्छेदकगोवधजन्यतावच्छेदकधर्मयोरेकत्र समावेश उपपादितः, गोवधजन्यतावच्छेदकजात्यधिकरणे गोवधजन्यचरमदुःखे तत्त्वज्ञाननाश्यतावच्छेदकस्य तादृशचरमत्वधर्मस्य विद्यमानत्वात्।

निरुक्तसाङ्कर्यदोषं परिहर्तुमाह "**यत्त्वि**"त्यादि। "**तादृशजातौ**"ति-तत्त्वज्ञाननाश्यतावच्छेदककोटिनिविष्टनिरुक्तचरमत्वलक्षणजातीत्यर्थः। "**व्याप्यविरुद्धभेदेने**"त्यादि। तथाहि गोवधजन्यतावच्छेदकसामान्यं नाना तादृशचरमत्वजातिव्याप्यविरुद्धभेदादित्यनुमानेन गोवधजन्यतावच्छेदकजातेर्नानात्वसिद्धिः। एवं ब्राह्मणवधादिजन्यतावच्छेदकजातीनामपि नानात्वं साधनीयम्। अयं भावः,—गोवधजन्यतावच्छेदकजातेर्नानात्वे एका गोवधजन्यतावच्छेदकजातिरुक्तचरमत्वलक्षणजातिव्याप्या, सा गोवधजन्यचरमदुःख एव वर्तते, नान्यत्र। अपरा च या तादृशचरमत्वलक्षणजातिविरुद्धा सा चरमदुःखभिन्ने संसारकालीनगोवधजन्यदुःख एव, न तु चरमदुःखेऽपि। अतः साङ्कर्यलक्षणे स्वपदेन यदि तादृशचरमत्वव्याप्यगोवधजन्यतावच्छेदकजातिरुपादीयते, तदा चरमत्वे स्वाभाववद्वृत्तित्वलक्षणस्वव्यभिचारित्वस्वसामानधिकरण्यरूपसम्बन्धद्वयसमन्वयेऽपि स्वाव्यापकत्वलक्षणसम्बन्धाभावान्न साङ्कर्योपपत्तिः। यदि तादृशचरमत्वविरुद्धा गोवधजन्यतावच्छेदकजातिः स्वपदेनोपादीयते, तदा चरमत्वे स्वाव्यापकत्वस्वव्यभिचारित्वयोः समन्वयेऽपि स्वसामानाधिकरण्यसम्बन्ध-

---

1 A B C D omit जातिः, जातिरित्येतादृशपाठस्यासार्वत्रिकत्वेऽपि सुखबोधाय तदुपादानम्। 2 B reads उभयोः समावेश 3 A omits यत्तु, 4 A B C D भेदेन 5 A C read स्वीक्रियते before अतः। व्याप्यजाते र्न परस्परात्यन्ताभावसमानाधिकरणत्वं, विरुद्धजातेर्नैकाधिकरणवृत्तित्वमतो न सङ्कर इति भावः।

**न च[1] विनिगमनाविरहः[2], तत्त्वज्ञानजन्यता[3]वच्छेदकजातेर्नानात्वे तु दुःखनाशं प्रति तत्त्वज्ञानकारणताबाहुल्यम्, गोवध[4]जन्यतावच्छेदकजातेर्नानात्वे तु दुःखं प्रति तेषां कारणताबाहुल्यम्[5], तत्र च तत्त्वज्ञानकार्यतावच्छेदकस्य गुरुतया तत्कारणताबाहुल्यापेक्षया गोवधादिकारणताबाहुल्यौचित्येन तज्जन्यतावच्छेदकजातेर्नानात्वस्य न्याय्यत्वादिति[6]।**

---

विरहात्तथैव साङ्कर्यानुपपत्तिः। अतः प्रोक्तचरमत्वजातिघटितलक्षणं निर्दोषमेवेति स्थितम्।

**अथ** तत्त्वज्ञाननाश्यतावच्छेदकजातेरेव विनिगमनाविरहेण नानात्वाशङ्कया जायमानां प्रकृतलक्षणाननुगमशङ्कां निरसितुमाह "**नचे**"त्यादि। पूर्ववदत्रापि तत्त्वज्ञाननाश्यतावच्छेदकसामान्यं नाना गोवधादिजन्यतावच्छेदकजातिव्याप्यविरुद्धभेदादिति रीत्या नानात्वं साधनीयम्। किं नोपेयत इति सङ्कराभावस्योभयत्रैव तुल्यत्वादिति शेषः।

"**विनिगमनाविरह**" इति,—तथाच प्रकृते विनिगमनाया विरहेण गोवधादिजन्यतावच्छेदकजातीनामेव नानात्वं, न तत्त्वज्ञाननाश्यतावच्छेदकजातेरिति सिद्धान्तस्याशक्यसाधनत्वेन तुल्यतयोभयत्रैव नानात्वसम्भवाच्चरमत्वघटितप्रकृतमुक्तिलक्षणाननुगम इतिभावः।

लाघवरूपविनिगमकेन गोवधादिजन्यतावच्छेदकजातीनामेव नानात्वं, न तत्त्वज्ञाननाश्यतावच्छेदकजातेरिति व्यवस्थाप्य तद्दोषं निराकुरुते "**तत्त्वज्ञाने**"त्यादिना "**न्याय्यत्वादिती**"त्यन्तेन।

"**दुःखनाशं प्रती**"ति,—तादृशवैजात्यविशिष्टदुःखप्रतियोगिकनाशत्वावच्छिन्नं प्रतीत्यर्थः। "**तत्त्वज्ञानकारणताबाहुल्य**"मिति। तथाहि कतिपयदुःखमात्रगतचरमत्वविशिष्टदुःखप्रतियोगिकनाशत्वावच्छिन्नकार्यतानिरूपिता एका तत्त्वज्ञानकारणता, अपरकतिपयदुःखमात्रगतचरमत्वविशिष्टदुःखप्रतियोगिकनाशत्वावच्छिन्नकार्यतानिरूपिता अपरा तत्त्वज्ञानकारणता, इत्येवं रीत्या तत्त्वज्ञानकारणताबाहुल्यम्।

"**दुःखं प्रती**"ति विजातीयदुःखं प्रतीत्यर्थः। नचोभयत्रैव कार्यतावच्छेदककोटौ वैजात्यस्यानिवेशान्न्यूनत्वमिति वाच्यम्, वैजात्यप्रवेशस्योभयत्रैव तुल्यतया प्रकृतलाघवगौरवप्रदर्शने तयोरनुपयोगित्वेनैवानुपादानात्। समग्रं कार्यतावच्छेदकन्तु वैजात्यघटितमेव, अन्यथा व्यभिचारात्। "**तेषां**" गोवधादीनाम्। "**कारणताबाहुल्य**"मिति। तथाहि—

1 A inserts तत्त्वज्ञाननाश्यतावच्छेदकजातेरेव नानात्वं किन्नोपेयत इत्यत्र after नच 2 B विनिगमकाभाव इति वाच्यम् (for विनिगमनाविरहः) 3 A D नाश्यता (for जन्यता) 4 A B C read गोवधादि 5 A B C omit कारणताबाहुल्यम् 6 A reads ०जन्यतावच्छेदकबाहुल्यस्यैवोचितत्वादिति (for ०कारणताबाहुल्यौचित्येन तज्जन्यतावच्छेदकजातेर्नानात्वस्य न्याय्यत्वादिति)।

**तत्र तत्त्वज्ञानजन्यता[1]वच्छेदकजातेरैक्ये सा जातिरेका, तद्व्याप्य-विरुद्धभेदेन गोवध[2]जन्यतावच्छेदकजातिद्वयी[3], तथैव ब्रह्मवधजन्यतावच्छेदक-जातिद्वयी[4], इति पञ्च जातयः। तत्त्वज्ञानस्य विजातीयदुःखनाशं प्रति एकं हेतुत्वम्, गोवधजन्यतावच्छेदकजातेर्द्वैविध्येन[5] दुःखं[6] प्रति कारणताद्वयम्[7], एवं ब्राह्मणवधस्यापि कारणताद्वयमिति कार्यकारणभावाः पञ्च।**

**गोवधादिजन्यतावच्छेदकजातेरैक्यमते[8] तत्त्वज्ञाननाश्यतावच्छेदकजाति-द्वयम्[9], गोवधजन्यतावच्छेदकजातिरेका, एवं ब्रह्मवधजन्यतावच्छेदिका जातिरेकेति जातिचतुष्टयम्। गोवधब्रह्मवधयोरेकैकं दुःखकारणत्वम्, तत्त्व-ज्ञान[10]नाश्यतावच्छेदकजातेर्द्वैविध्येन दुःखनाशहेतुत्वं द्वयमिति कार्यकारण-**

---

चरमत्वजातिव्याप्यं यत् गोवधजन्यतावच्छेदकं कतिपयदुःखगतवैजात्यं तद्विशिष्टदुःख-त्वाच्छिन्नकार्यतानिरूपिता एका गोवधनिष्ठा कारणता, चरमत्वजातिविरुद्धं यद् गोवध-जन्यतावच्छेदकमपरकतिपयदुःखगतं वैजात्यं तद्विशिष्टदुःखत्वावच्छिन्नकार्यतानिरूपिता चापरा गोवधनिष्ठा कारणता, इति रीत्या गोवधादीनां कारणताबाहुल्यम्।

"**तत्रे**"ति। तादृशबाहुल्यद्वये इत्यर्थः। **तत्त्वज्ञानकार्यतावच्छेदकस्य**—विजातीयदुःख-प्रतियोगिकनाशत्वस्य। "**गुरुतया**"—गोवधादिजन्यतावच्छेदकीभूतं विजातीयदुःखत्वम-पेक्ष्य समधिकपदार्थघटितत्वरूपगुरुशरीरतया। "**तत्कारणते**"ति। तत्त्वज्ञानकारणतेत्यर्थः। "**तज्जन्यतावच्छेदकजातेः**"—गोवधादिजन्यतावच्छेदकजातेः। "**न्याय्यत्वा**"दिति। तथाच लाघवेनैव विनिगमकेन सकलचरमदुःखगतस्य तत्त्वज्ञाननाश्यतावच्छेदकस्यैकस्य चरमत्व-रूपवैजात्यस्य सिद्धया तद्घटितमनुगतं मुक्तिलक्षणं नानुपपन्नमिति भावः।

गोवधजन्यतावच्छेदकजातेरेव नानात्वं न्याय्यं न तत्त्वज्ञाननाश्यतावच्छेदकजातेरिति प्रागुक्तं प्रकृतलक्षणाननुगमदोषवारकं सिद्धान्तं सोपपत्तिकं प्रत्याचक्षाणस्तत्त्वज्ञाननाश्यता-वच्छेदकजातेरेव नानात्वमुपपादयन्नननुगमतादवस्थ्यं प्रकृतलक्षणस्य व्यवस्थापयति "**तत्रे**"त्यादिना।

तदिति गोवधादिजन्यतावच्छेदकजातेर्न्याय्यत्वमित्यर्थः। "**तत्त्वज्ञानजन्यतावच्छेदक-जाते**"रिति। तत्त्वज्ञानजन्यतावच्छेदककोटिप्रविष्टायाश्चरमत्वजातेरित्यर्थः। "**सा जातिः**"।

1 A नाश्यता (for जन्यता) 2 D वधादि 3-4 A D read जातिर्द्वयी 5 A reads गोवधस्य कार्यतावच्छेदकद्वैविध्येन 6 D तत्तद्विजातीय before दुःख 7 D गोवधस्य before कारणता 8 D reads गोवधजन्यतावच्छेदकजातिरेका, तद्व्याप्या च तत्त्वज्ञाननाश्यताव-च्छेदकजातिरप्येका, सैव च ब्रह्मवधजन्यतावच्छेदकजातिविरुद्धा एव, ब्रह्मवधजन्यतावच्छेदक-जातिरप्येका, तद्व्याप्या च तत्त्वज्ञाननाश्यतावच्छेदकजातिरेका, सैव च गोवधादिजन्यताव-च्छेदकजातिविरुद्धा इति जातिचतुष्टयम् after जातेरैक्यमते 9 A D omit तत्त्वज्ञाननाश्य-तावच्छेदकजातिद्वयम् 10 AC ज्ञानस्य च (for ज्ञान)

**भावचतुष्टयमित्येवं रीत्या कल्पनालाघवेन तत्त्वज्ञाननाश्यतावच्छेदकजातेर्नानात्वस्यैवौचित्यात्। तथाचाननुगम[1]स्तदवस्थ एवेति।**

**मैवम्, स्वसामानाधिकरण्य-स्वाधिकरणकालवृत्तित्वोभयसम्बन्धेन दुःखप्रागभाववदन्यत्वं, दुःखवदन्यत्वमेव वा आत्यन्तिकत्वम्। अत्र च[2] स्वपदं परिचायकमात्रं, न तु तदर्थोऽपि[3] निवेश्यः[4] प्रयोजनाभावात्। अन्यदीयसामानाधिकरण्यादेरन्यदीयसम्बन्धत्वाभावेनानुपपत्त्यभावात्[5]। अतो नाननुगमः।**

---

निरुक्तचरमत्वलक्षणजातिः। "**तथैवे**"ति। तद्व्याप्यविरुद्धभेदेन तादृशचरमत्वजातिव्याप्यविरुद्धभेदेनेति यावत्। "**विजातीये**"ति निरुक्तचरमत्वलक्षणवैजात्यविशिष्टेत्यर्थः। "**द्वैविध्येने**"ति। चरमत्वजातिव्याप्यविरुद्धभेदादिति शेषः। "**दुःखं प्रती**"ति तादृशैकैकजातिविशिष्टदुःखं प्रतीत्यर्थः। "**कारणताद्वयमि**"ति। विभिन्नधर्मावच्छिन्नकार्यतानिरूपितकारणताभेदादिति भावः। "**एवमिति**" ब्रह्मवधजन्यतावच्छेदकदुःखगतजातेरपि निरुक्तचरमत्वव्याप्यविरुद्धभेदाद् द्वैविध्येनेत्यर्थः। "**कारणताद्वयमि**"ति विभिन्नवैजात्यविशिष्टदुःखं प्रतीति शेषः। "**तत्त्वज्ञाननाश्यतावच्छेदकजातिद्वयमि**"ति गोवधादिजन्यतावच्छेदकजातिव्याप्यविरुद्धभेदेनेति शेषः। "**एकैकमि**"ति,—तथाहि गोवधजन्यतावच्छेदकं यद् वैजात्यं तदवच्छिन्नकार्यतानिरूपितं दुःखकारणत्वं गोवधे, एवं ब्रह्मवधजन्यतावच्छेदकं यद् वैजात्यं तदवच्छिन्नकार्यतानिरूपितं दुःखकारणत्वं ब्रह्मवधे इति। "**दुःखनाशहेतुत्वमि**"ति। विजातीयदुःखनाशहेतुत्वमित्यर्थः। **हेतुत्वं द्वयमित्यत्र** 'व्यथां द्वयेषामपि मेदिनीभृता' मित्यादिवत् द्वयशब्दस्य विशेषणपरत्वेन साधुत्वमवसेयम्। द्वाववयवौ यस्येति व्युत्पत्त्या द्विशब्दादयट्प्रत्ययेन निष्पन्नस्य द्वयशब्दस्य विशेषणपरतायाः शब्दानुशासनानुमतत्वात्। अत एव कातन्त्रपरिशिष्टकारप्रभृतीनामपि 'प्रधानशब्दस्य द्वयी गतिरिति लक्ष्यत' इत्यादयः प्रयोगाः।

"**तदवस्थ एवे**"ति पूर्वलक्षणानुरूप एवेत्यर्थः। तथाहि पूर्वलक्षणे यथा स्वत्वस्याननुगतत्वादननुगमः, तथा 'चरमदुःखध्वंसो मुक्तिरिति यत्तुकल्पोक्तमुक्तिलक्षणेऽपि सकलचरमदुःखानुगतस्यैकस्य चरमत्वस्याभावेनाननुगम इति भावः।

यत्तु-कल्पनिरुक्तं चरमदुःखध्वंसस्य मुक्तिस्वरूपत्वमननुगमदोषेण दूषयित्वा स्वलक्षणघटकात्यन्तिकत्वस्य स्वसमानाधिकरणदुःखप्रागभावासमानकालीनत्वादिरूपस्याननुगतस्वत्वघटितत्वेन स्वलक्षणे प्रतिपक्षापादितमननुगमदोषमात्यन्तिकत्वस्यान्यथा निर्वचनेन प्रतिषेधति "**मैवमि**"त्यादिना॥ **स्वसामानाधिकरण्ये**"त्यादि—अत्रापि सम्बन्धान्तर्गतस्वाधिकरणता-

1 तथाच तत्त्वज्ञानजन्यतावच्छेदककोटिप्रविष्टजातिपर्यवसन्नस्य चरमत्वस्य नानात्वादननुगम इति भावः। 2 C omits अत्र च 3 A D तत्तदर्थोऽपि (for तदर्थोऽपि) 4 All the Mss read निवेश्यते 5 B C सम्बन्धत्वाभावात् (for ०भावेनानुपपत्त्यभावात्)

**न च स्वाधिकरणकालवृत्तित्वमित्यत्र कालः क्षणः[1], अन्यथा मुक्त्यात्मकदुःखध्वंसस्यापि स्थूलकालमादाय दुःखप्रागभावसमानकालीनत्वसम्भवात्। तथाच क्षणत्वस्यानुगतस्य दुर्वचतयाऽननुगमो दुर्वार इति वाच्यम्; सम्बन्धाननुगमस्यादोषत्वात्।**

---

घटकसम्बन्धादयः प्रागुक्तात्यन्तिकत्वान्तर्गतस्वाधिकरणताघटकसम्बन्धादिवदेव निवेश्याः। अन्यथा पूर्वोक्तरीत्यैव दोषापत्तेः। सम्बन्धघटकस्वपदद्वयं दुःखप्रागभाववदन्यत्वरूपात्यन्तिकत्वकल्पे दुःखप्रागभावपरम्। दुःखवदन्यत्वरूपात्यन्तिकत्वकल्पे च दुःखपरम्।

नन्वेवमनयोरप्यात्यन्तिकत्वयोः सम्बन्धघटकस्वत्वघटितत्वेनाननुगमो दुर्वार इत्याशङ्क्याह "**अत्र चे**"त्यादि। **तदर्थं** इति स्वत्वविशिष्टरूपः स्वशब्दार्थः। "**निवेश्य**" इति। प्रकृतात्यन्तिकत्वघटकसम्बन्धांश इति शेषः। "**प्रयोजनाभावा**"दिति। ननु तादृशात्यन्तिकत्वविशेषितमुक्तिलक्षणस्यासम्भवदोषवारणमेव प्रयोजनमस्ति, तथाहि यदि स्वपदार्थविनाकृतमधिकरणवृत्तित्वम्, अधिकरणकालवृत्तित्वञ्चेत्युभयं प्रकृते संसर्गः स्यात्, तदा पुरुषान्तरीयं दुःखप्रागभावं दुःखञ्चोपादाय मुक्त्यात्मकदुःखध्वंसे तादृशोभयसम्बन्धेन दुःखप्रागभाववत्त्वदुःखवत्त्वयोः सत्त्वेन प्रकृतात्यन्तिकत्वबाधादसम्भव आपद्येत। तद्दोषवारणाय सम्बन्धांशे स्वपदार्थनिवेशे तावदननुगमो दुष्परिहर इत्युभयतःपाशा रज्जुरित्याशङ्क्याह "**अन्यवीये**"त्यादि। "**अत**" इति सम्बन्धघटकस्वपदद्वयस्य सम्बन्धप्रतियोगिपरिचायकमात्रत्वेन स्वत्वस्य लक्षणाघटकत्वादित्यर्थः। "**अन्यथे**"ति। क्षणत्वमुपेक्ष्य कालत्वमात्ररूपेण कालोपादाने इत्यर्थः। "**स्थूलकाल**"मिति। मुक्त्यात्मकदुःखध्वंससमानाधिकरणदुःखप्रागभावक्षणादारभ्य मुक्त्यात्मकदुःखध्वंसक्षणपर्यन्तस्थायिस्थूलकालमित्यर्थः। "**दुःखप्रागभावसमानकालीनत्वसम्भवा**"दिति। अत्र दुःखप्रागभावेत्युपलक्षणम्, दुःखवदन्यत्वरूपात्यन्तिकत्वघटितलक्षणे दोषसङ्क्रमनानुरोधाद्, अतो दुःखसमानकालीनत्वसम्भवादित्यपि बोध्यम्। तेन निरुक्तात्यन्तिकत्वघटितमुक्तिलक्षणस्यासम्भवदोषापत्तिरिति भावः। "**दुर्वचतये**"ति। स्ववृत्तियावद्ध्वंसवत्त्वादेरेव क्षणस्वरूपत्वस्य स्वीकर्तव्यत्वादिति भावः।

"**सम्बन्धाननुगमस्यादोषत्वा**"दिति। नन्वेवं स्वसामानाधिकरण्यस्वाधिकरणकालवृत्तित्वघटकप्रतियोगिपरस्वपदार्थस्य लक्षणाघटकत्वप्रतिपादनेन लक्षणाननुगमपरिहारार्थं कथं तावान् प्रयासो ग्रन्थकारस्य निरुक्तस्वपदार्थस्य सम्बन्धघटकत्वादेव सम्भावितस्य तत्प्रयुक्ताननुगमस्यादोषत्वसम्भवादिति चेदत्र ब्रूमः,—सम्बन्धवाचकपदान्तर्गतप्रतियोगिपरस्वपदार्थस्य स्वत्वेनाननुगतेन रूपेण सम्बन्धांशे निवेशे दुःखप्रागभाववदन्यत्वाद्यन्तर्गते दुःखप्रागभावत्वादिरूपेण धर्मविधया भासमानेऽपि दुःखप्रागभावादौ तत्तद्व्यक्तित्वमेव प्रतीयते, एवञ्च तत्तद्दुःखप्रागभावादिरूपविशेषव्यक्तीनामेव दुःखप्रागभाववदन्यत्वादि-

---

1 A C read स्वसमानकालवृत्तित्वमित्यत्र कालपदेन क्षणो निवेशनीयः (for स्वाधिकरणकालवृत्तित्वमित्यत्र कालः क्षणः)

**वस्तुतस्तु स्वसामानाधिकरण्य-कालिकविशेषणत्वोभयसम्बन्धेन दुःख-प्रागभाववदन्यत्वं दुःखवदन्यत्वं वा आत्यन्तिकत्वम्। स्वाधिकरणक्षणावृत्ति-पदार्थे च स्वनिरूपितकालिकविशेषणताविरहात्, मुक्त्यात्मकदुःखध्वंसस्य तद्घटितोभयसम्बन्धेन दुःखप्रागभावादिमदन्यत्वमिति नानुपपत्तिः।**

---

घटकता समायाति। तथा च सति स्वपदेन पुरुषान्तरीयदुःखप्रागभावमुपादाय तादृशोभय-सम्बन्धेन तद्वदन्यत्वस्य संसारकालीनापरपुरुषवृत्तिदुःखध्वंसेऽपि सत्त्वस्याबाधेनातिप्रसङ्गस्य दुरुद्धरत्वात् तादृशस्वत्वाननुगमप्रयुक्तधर्माननुगमस्य दोषतायाः परिहर्तुमशक्यत्वाच्च।

सम्बन्धाननुगमेऽपि तत्तदननुगतसम्बन्धभेदेन लक्षणादेर्भिन्नत्वेन गौरवदोषस्यापोहितुम-शक्यत्वेन सम्बन्धाननुगमस्यापि धर्माननुगमवद्दोषत्वस्यौचित्यात् सम्बन्धाननुगमस्यादोषतायां प्रयोजकाभावाच्चाह **"वस्तुतस्त्वि"**त्यादि। तथाचात्र क्षणत्वस्य सम्बन्धाघटकत्वान्नाननुगम-दोषापात इति भावः। कालिकविशेषणताघटितोभयसम्बन्धनिवेशकल्पे स्थूलकालमुपादाय प्रागुक्तदोषप्रसङ्गस्य विरहमुपपादयितुमाह **"स्वाधिकरणक्षणावृत्ती"**त्यादि। स्वनिरूपितेति स्वप्रतियोगिकेत्यर्थः। **"तद्घटितोभयसम्बन्धेन"**, कालिकविशेषणताघटितोभयसम्बन्धेन। **"दुःखप्रागभावादी"** त्यादिपदेन दुःखस्यापि परिग्रहाद् दुःखवदन्यत्वमित्यपि बोध्यम्। अन्यथा द्वितीयात्यन्तिकत्वसमन्वयाप्रदर्शनेन न्यूनत्वापत्तेः।

ननु 'प्रमेयसिद्धिः प्रमाणाद्धी'ति न्यायस्य सर्वतन्त्रसिद्धान्ततया तादृशमुक्तिरूपप्रमेयसिद्धौ प्रमाणमपेक्षणीयम्। तत् किमत्र प्रमाणमिति चेदनुमानञ्च शब्दञ्चात्र प्रमाणत्वेन गृहाण।

अनुमानप्रयोगो यथा—दुःखत्वं, देवदत्तदुःखत्वं वा स्वाश्रयासमानकालीनध्वंस-प्रतियोगिवृत्ति कार्यमात्रवृत्तित्वात् सन्ततित्वाद्वा एतत्प्रदीपत्ववदिति। स्वं कार्यमात्रवृत्ति-धर्मः। स्वाश्रयासमानकालीनत्वं साध्यघटकध्वंसविशेषणम्, तेनैवात्यन्तिकदुःखध्वंसात्मक-प्रकृतमुक्तिसिद्धिः। कार्यमात्रवृत्तित्वादित्यत्र मात्रपदस्येतरव्यवच्छेदार्थतया वृत्तित्वपदस्य च समवेतत्वपरतया कार्येतरासमवेतत्वे सति कार्यसमवेतत्वादित्यर्थः। स्वपदेन गुणत्वा-दिकमुपादाय तदाश्रयीभूतनित्यगुणाद्यसमानकालीनत्वस्य ध्वंसेऽसम्भवेन साध्याप्रसिद्धि-प्रसङ्ग इति तद्वारणाय कार्यमात्रवृत्तित्वघटकं सत्यन्तम्। तेन कार्यमात्रवृत्तित्वेनाभि-मतस्यैव साध्यान्तर्गतस्वपदार्थतयोपादानाद् गुणत्वस्य कार्यगुणसमवेतत्वे सत्यपि नित्यगुण-समवेतत्वेन कार्येतरासमवेतत्वरूपसत्यन्तदलविरहेण न स्वपदेनोपादानसम्भव इत्यदोषः। स्वरूपेण सम्बन्धेन वृत्तिमतः प्रमेयत्वादेः कार्येतरासमवेतत्वेन तथैव साध्याप्रसिद्धिः स्यादिति सत्यन्तदलमात्रनिवेशेन दोषप्रसङ्गवारणाय विशेष्यदलम्। कार्यसमवेतधर्ममात्रस्यैव विषयितया कार्येतरनित्यज्ञानवृत्तित्वेनासिद्धिनिवारणाय सत्यन्तदले कार्येतरावृत्तित्वसामान्य-मपहाय कार्येतरासमवेतत्वनिवेशः। स्वरूपेण वृत्तिमत् प्रमेयत्वादिकं स्वपदेनोपादाया-प्रसिद्धिवारणाय विशेष्यदले वृत्तित्वांशे समवायसम्बन्धावच्छिन्नत्वनिवेशः। तेन प्रमेयत्वस्य तादृशकार्यमात्रवृत्तित्वविरहेण स्वपदेनानुपादेयतया न निरुक्तदोषस्पर्शः। साध्यघटकं स्वाश्रयत्वं समवायेन विवक्षणीयम्। अन्यथा विषयित्वादिसम्बन्धेन दुःखत्वाद्याश्रयत्वस्य

नित्यज्ञानादौ वर्तमानतया तदसमानकालीनध्वंसाप्रसिद्धया साध्याप्रसिद्धितादवस्थ्यात्। साध्यघटकप्रतियोगिवृत्तित्वमपि समवायेनैव वक्तव्यम्, अन्यथा स्वाश्रयासमानकालीन-प्रलयादिवृत्तिदुःखेतरप्रतियोगिकध्वंसप्रतियोगिपदार्थान्तरवृत्तित्वेनार्थान्तरप्रसङ्गात्।

न च स्वत्वस्याननुगतत्वेन कार्यमात्रवृत्तिघटत्वादि स्वपदेनोपादाय तदाश्रयासमान-कालीनान्तिमघटध्वंसघटितसाध्येन हेतोः सहचारप्रत्यक्षस्य जीवेऽसम्भवादुक्तानुमानं व्याहतमिति वाच्यम्; तद्दोषाशङ्कयैव सन्ततित्वाद्वेति हेत्वन्तरानुसरणात्। सन्ततित्वञ्च नानाकालीनकार्यमात्रवृत्तित्वम्, तदर्थश्च एककालीनानेकावृत्तित्वे सति नानाकालीनकार्य-वृत्तित्वम्। अत एव घटत्वादिकमपहाय एतत्प्रदीपत्वस्य दृष्टान्तत्वानुसरणम्।

न च दुःखत्वस्य पक्षताकल्पे तस्य समकालीनानेकदुःखवृत्तितया तत्र निरुक्त-सन्ततित्वहेतुः स्वरूपासिद्ध इति वाच्यम्, सत्यन्ते एककालीनत्वस्यैव सामानाधिकरण्यस्याप्य-नेकांशे विशेषणत्वोपगमात्। नह्येकस्मिन्नधिकरणे समकालीनमनेकं दुःखमिति सिद्धान्त-स्वीकारात्। न च विभुविशेषगुणानां स्वोत्तरोत्पन्नविशेषगुणनाश्यत्वेन दुःखस्य क्षणद्वयाव-स्थायित्वेन एकदुःखोत्पत्तिद्वितीयक्षणे चापरदुःखोत्पत्तौ बाधकाभावेन तत्क्षणे दुःखत्वस्य तादृशानेकवृत्तित्वसत्त्वात् सन्ततित्वहेतोः स्वरूपासिद्धितादवस्थ्यमिति वाच्यम्, सत्यन्तदल-घटकस्यानेकत्वस्य बहुत्वपर्यवसितत्वात्। बहुत्वस्य त्रितयादिपर्याप्तिनियमात्। यथा-श्रुतानेकत्वस्य द्वयवृत्तित्वेऽपि बहुत्वस्य द्वयावृत्तित्वात्। अथवा दुःखत्वं देवदत्तदुःखत्वं वेति विकल्पेन द्वयोः कल्पभेदेन पक्षत्वस्य कार्यमात्रवृत्तित्वात् सन्ततित्वाद्वेति विकल्पेन द्वयोः कल्पभेदेन हेतुत्वस्य वाकारद्वयेन सूचनाद् यथासंख्यमन्वयेन न दोषाशङ्का। एकक्षणोत्पत्तिकत्वं वा एककालीनत्वं वाच्यम्।

न च स्वत्वस्याननुगतत्वेन स्वपदेन पक्षीभूतस्य दुःखत्वस्य परिग्रहे दृष्टान्ते साध्य-वैकल्यमिति वाच्यम्, सामानाधिकरण्य—कालिकविशेषणतोभयसम्बन्धेन धर्मविशिष्टत्वस्यैव स्वसमानाधिकरणैककालीनविशेषणतातात्पर्यविषयत्वात्।

न च सामान्यभूतदुःखत्वादिरूपे पक्षे हेतोः स्वरूपासिद्धिनिराकरणार्थं हेतुघटक-वृत्तित्वस्य समवायसम्बन्धावच्छिन्नस्यैव निवेशादेकमात्रगतैतत्प्रदीपत्वरूपदृष्टान्तस्य साधन-वैकल्यमिति वाच्यम्; एतत्प्रदीपत्वस्य धारावाहिकानेकशिखात्मकानेकप्रदीपवृत्तित्वेन तस्यापि चैत्रत्वादेरिव जातित्वेन समवायसम्बन्धावच्छिन्नवृत्तिमत्त्वानपायात्।

कन्दलीकारास्तु 'दुःखसन्ततिर्धर्मिन्यत्यन्तमुच्छिद्यते सन्ततित्वाद्दीपसन्ततिवदिति तार्किकाः। तदयुक्तम्, पार्थिवपरमाणुरूपसन्तानेन व्यभिचारात्। अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशत इत्यादयो वेदान्ताः प्रमाणमिति तु वय' मित्याहुः।

किरणावलीप्रजापतयस्तु निरुक्तहेतोरनैकान्तिकत्वं विचारेण परिहृत्य निरुक्तानुमानस्य अशरीरमित्याद्यागमस्य च सममेव निरुक्तमुक्तिप्रमाणत्वमाहुः। आदिपदेन 'आत्मा ज्ञातव्यो, न स पुनरावर्तते' इत्यादिश्रुतयः प्रतिपत्तव्याः। एकेनानुमानप्रमाणेनैव मुक्तेः सिद्धावपि नरकपालं शुचि प्राण्यङ्गत्वादित्यादिरूपस्य 'मलमूत्रपुरीषास्थिनिर्गतं ह्यशुचि स्मृत' मित्याद्यागमबाधितानुमानस्येव प्रकृतानुमानस्याप्यप्रामाण्यशङ्का स्यादतः प्रकृतानु-मानस्य शास्त्राविरुद्धत्वप्रतिपिपादयिषयागमोपन्यासः।

**अत्रेदं विचारयन्ति[1],– आत्यन्तिकदुःखध्वंसो न मोक्षः[2], स्वोत्तरोत्पन्नविभुविशेषगुणरूपक्लृप्तहेतुबलादेव चरमदुःखध्वंसस्यापि[3] सम्भवेन तत्त्वज्ञान[4]–हेतुत्वाभावान् मुक्तिमुद्दिश्य तत्त्वज्ञान-तदुपायादि[5] प्रवृत्त्यनुपपत्तेः।**

**न चेतरकारणबलात्तादृशकार्यनिर्वाहेऽपि[6] श्रुतिसिद्धं तत्त्वज्ञानस्य तद्धेतुत्वं[7] केनापि नापाकर्तुं शक्यत[8] इति वाच्यम्; क्लृप्तेतरकारणमात्रात्तादृश-**

---

अथेदानीं सोपपत्तिकमात्यन्तिकदुःखध्वंसस्यापवर्गस्वरूपतां प्रतिषिध्यात्यन्तिकदुःखसाधनध्वंसस्य तत्स्वरूपतां व्यवस्थापयितुमुपक्रमते "**अत्रेदं विचारयन्ती**"त्यादिना।

"**स्वोत्तरोत्पन्ने**"त्यादि—योग्यविभुविशेषगुणानां स्वोत्तरोत्पन्नविशेषगुणनाश्यत्वनियमस्य सिद्धतया योग्यविभुविशेषगुणनाशे स्वोत्तरोत्पन्नविशेषगुणानां कारणत्वं क्लृप्तम्। अत्र स्वपदं तादृशविशेषगुणनाश्यत्वाभिमतयोग्यविभुविशेषगुणपरम्। तेन च दुःखान्तरवच्चरमदुःखस्यापि मानसप्रत्यक्षयोग्यविभुविशेषगुणतया तदुत्तरोत्पन्नविशेषगुणेनैव तन्नाशनिर्वाहेण तत्र तत्त्वज्ञानस्यान्यथासिद्धत्वात् कारणत्वाभाव इति भावः।

"**मुक्तिमुद्दिश्ये**"त्यादि—तथाहि प्रवृत्तेरिष्टसाधनताज्ञानसाध्यतया मुक्तिरूपेष्टसाधनताज्ञानेन तत्त्वज्ञाने तथा तत्त्वज्ञानरूपेष्टसाधनताया ज्ञानेन तत्त्वज्ञानोपायभूतयोगाभ्यासादौ विशेषदर्शिनां प्रवृत्तिर्जायते। सा च नोपपन्ना तत्त्वज्ञाने मुक्तिरूपेष्टसाधनत्वाभावात्। उपायेच्छां प्रत्यपीष्टसाधनत्वज्ञानस्य कारणतया तत्त्वज्ञाने इष्टसाधनत्वज्ञानाभावेनेच्छाभावात् तदिच्छाप्रयुक्ता तदुपाययोगाभ्यासादिप्रवृत्तिरपि दुर्घटा भवति, अतस्तादृशं मुक्तिस्वरूपमङ्गीकार्यं येन मुक्तिं प्रति तत्त्वज्ञानस्य हेतुताव्याघातेन निरुक्तविशेषदर्शिप्रवृत्तिव्याघातदोषो न स्यादिति तादृशं स्वरूपं नात्यन्तिकदुःखध्वंस इति भावः।

प्रवृत्त्यनुपपत्तेरिति विशेषदर्शिपुरुषाणामिति शेषः। अन्येषान्तु तत्त्वज्ञाने मुक्तिसाधनत्वासत्त्वेऽपि मुक्तिसाधनत्वभ्रमेण प्रवृत्त्युपपत्तेः।

श्रुतिबलेनापि तस्य शक्यसाधनतां निराकरोति "**न चेतरेत्या**"दिना। "**इतरकारणे**"ति तत्त्वज्ञानेतरदुःखोत्तरोत्पन्नविशेषगुणरूपकारणेत्यर्थः। "**तादृशकार्ये**"ति आत्यन्तिकदुःखध्वंसरूपकार्येत्यर्थः। "**श्रुतिसिद्धमि**"ति—'तमेव विदित्वा अतिमृत्युमेति नान्यः पन्था विद्यते अयनाय', 'तरति शोकमात्मवित्', इत्यादिश्रुतिप्रमाणसिद्धमित्यर्थः। **तद्धेतुत्वं** मुक्तिहेतुत्वम्। तथा च श्रुतिसिद्धतादृशमुक्तिसाधनत्वज्ञानेनैव विशेषदर्शिनां प्रवृत्तेरुपपत्तेर्नोक्तमुक्तिस्वरूपासम्भव इति भावः।

---

1 All the Mss read चिन्तयति, 2 A B read मुक्ति 3 A C ०दुःखस्यापि नाश before सम्भवेन 4 A B ज्ञानस्य 5 All the Mss ०दुपायादौ. 6 A निर्वाहोऽपि. 7 D हेतुत्वं—(for तद्धेतुत्वं) 8 A न केचिदपाकर्तुमीशते (for न केनापि नापाकर्तुं शक्यते)

**कार्यनिर्वाहे तत्त्वज्ञानस्यान्यत्र क्लृप्तेत्याद्यन्यथासिद्धत्वेन[1] तदभावघटितकारणताया एव बाधितत्वात् तथाविधमुक्तितत्त्वज्ञानयोः कार्यकारणभावस्यैव श्रुत्या बोधयितुमशक्यत्वात् ।**

**न चेतरहेतूनामुपदर्शितोभयसम्बन्धेन दुःखवदन्यदुःखध्वंसत्वावच्छिन्नोत्पादकत्वं[2] न सम्भवति, तादृशधर्मस्य त[3]ज्जन्यतानवच्छेदकत्वादतस्तदवच्छिन्नं प्रति तत्त्वज्ञानमनन्यथासिद्धमिति वाच्यम्, यथा शुकादिदुःखवदन्यदुःखध्वंसत्वादेः स्वानन्तरोत्पन्नविभुविशेष[4]गुणादिरूपकारणजन्यतानवच्छेदकत्वेऽपि तदवच्छिन्नोत्पादनिर्वाहकत्वं[5] तादृशकारणानां[6] तथैव तेषामुपदर्शितोभयसम्बन्धेन दुःखवदन्यदुःखध्वं[7]सत्वावच्छिन्नोत्पादनिर्वाहकताया अपि सम्भवात् ।**

---

"**क्लृप्तेतरे**"त्यादि । संसारकालीनदुःखध्वंसार्थमवश्यक्लृप्तं यदितरकारणं तत्त्वज्ञानभिन्नं स्वोत्तरोत्पन्नविशेषगुणरूपं कारणं तन्मात्रात् तत्त्वज्ञाननिरपेक्षतद्घटितसामग्रीरूपकारणादित्यर्थः । "**तादृशकार्ये**"ति चरमदुःखध्वंसरूपकार्येत्यर्थः । "**अन्यत्रे**"त्यादि । अन्यत्रावश्यक्लृप्तनियतपूर्ववर्तिभिरेव कार्यसम्भवे तद्व्यतिरिक्तमन्यथासिद्धमित्यन्यथासिद्धघनुशासनसिद्धान्यथासिद्धत्वेनेत्यर्थः । "**तदभावघटितकारणताया**" इति । अनन्यथासिद्धत्वे सति नियतपूर्ववर्तित्वस्यैव कारणतालक्षणत्वादिति भावः । तथा च तत्त्वज्ञानं न तथाविधमुक्तिकारणं तथाविधमुक्तिं प्रत्यन्यथासिद्धत्वादित्यनुमानप्रमाणेन तत्त्वज्ञाने तादृशकारणताबाधसिद्धिः । "**अशक्यत्वा**"दिति श्रुतेर्बाधितार्थप्रतिपादकत्वे तस्या अप्रामाण्यप्रसङ्गादिति भावः ।

तत्त्वज्ञाने निरुक्तमुक्तिकारणतावाधकानुमाने स्वरूपासिद्धिदोषमाशङ्कते "**नचेतरहेतूना**"मित्यादिना । इतरहेतूनां तत्त्वज्ञानभिन्ननिरुक्तविशेषगुणादिरूपहेतूनाम् । "**उपदर्शितोभयसम्बन्धेन**"–स्वसामानाधिकरण्य–कालिकविशेषणत्वोभयसम्बन्धेन । **तादृशधर्मस्य** दुःखवदन्यदुःखध्वंसत्वरूपधर्मस्य । "**तज्जन्यतानवच्छेदकत्वा**"न्निरुक्तेतरकारणजन्यतानवच्छेदकत्वात् । तस्य तज्जन्यतावच्छेदकत्वे संसारदशायामपि तादृशदुःखध्वंसत्वावच्छिन्नोत्पादापत्तेः । "**तदवच्छिन्नं प्रति,**" दुःखवदन्यदुःखध्वंसत्वावच्छिन्नं प्रति । "अनन्यथासिद्धमि"ति । तथाच निरुक्ततत्त्वज्ञानधर्मिकनिरुक्तमुक्तिकारणताबाधकानुमाने न स्वरूपासिद्धिरतो निरुक्तानुमानेन तत्त्वज्ञाने तादृशमुक्तिकारणत्वाभावानुमानमक्षतमिति भावः ।

तत्त्वज्ञानेतरहेतूनां दुःखवदन्यदुःखध्वंसत्वावच्छिन्नोत्पादनिर्वाहकत्वमुपपाद्य तत्त्वज्ञानस्य तादृशमुक्तिं प्रत्यन्यथासिद्धत्वं पुनर्द्रढयति "**यथे**"त्यादिना । "**शुकादी**"त्यत्र

---

1 A D read क्लृप्तनियतपूर्ववर्तिनः कार्यसम्भवे तत्सहभूतत्वमित्याद्यन्यथासिद्धिसत्त्वेन (for तत्त्वज्ञानस्यान्यत्र क्लृप्तेत्याद्यन्यथासिद्धत्वेन) 2 A C D ०पादकता, 3 D omits तत्, 4 A C read ०तदुत्तरोत्पन्नविशेष (for स्वानन्तरोत्पन्नविभुविशेष) 5 तथाच तद्रूपेण कारणत्वाकल्पनेऽपि न दोष इति हृदयम् । 6 B D गुणानां (for कारणानां) 7 D omits दुःखध्वंस

**परन्तु[1] आत्यन्तिकदुःखसाधनध्वंस एव मोक्षः। दुःखसाधनञ्च[2] दुरितमेव। तथाच उपदर्शितोभयसम्बन्धेन[3] दुरितवदन्यो दुरितध्वंस एव मोक्ष इति निष्कर्षः।[4]**

---

शुकपदं वैयासकिशुकदेवपरम्। आदिपदेन वामदेवादिपरिग्रहः। दुःखवत्पदघटकदुःखपदेन शुकादिशब्दस्य षष्ठीतत्पुरुषसमासेन शुकादिदुःखेत्यनेन शुकाद्यात्मवृत्तिव्यतीतं दुःखं लभ्यते, तेषां चिरात् पूर्वमेव मुक्तत्वात्। तथाच श्रूयते शुको मुक्तः, वामदेवो मुक्त इत्यादि। एवञ्च सम्प्रति तावदस्मदाद्यात्मसु स्वोत्तरोत्पन्नविशेषगुणरूपकारणवशेन यो दुःखध्वंसो भवति तत्र सामानाधिकरण्य–कालिकविशेषणत्वोभयसम्बन्धेन शुकादिदुःखवदन्यत्वस्य सत्त्वेन स यथा दुःखध्वंसत्वावच्छिन्नस्तथा शुकादिदुःखवदन्यदुःखध्वंसत्वावच्छिन्नोऽपि, अतस्तादृशकारणानां जन्यतावच्छेदकस्य शुकादिदुःखवदन्यत्वाघटितत्वेऽपि यथा शुकादिदुःखवदन्यदुःखध्वंसत्वावच्छिन्नोत्पत्तिनिर्वाहकत्वं तथैव प्रकृतेऽपीति भावः। "**तेषा**"मिति तत्त्वज्ञानेतरहेतूनाम्। "**सम्भवा**"दिति—दुःखवदन्यदुःखध्वंसत्वादेस्तत्कार्यतानवच्छेदकत्वेऽपीति शेषः। तथाहि चरमदुःखध्वंसदशायां तदधिकरणात्मनि कस्यापि दुःखस्यासत्त्वेन तदानीन्तनतत्पुरुषीयदुःखध्वंसे निरुक्तोभयसम्बन्धेन सामान्यतो दुःखवदन्यत्वस्य सत्त्वादेव तादृशचरमदुःखध्वंसस्य दुःखवदन्यदुःखध्वंसत्वावच्छिन्नत्वोपपत्तिः।

तदेवं प्रागुक्तरीत्यैव तत्त्वज्ञानस्य तादृशमुक्तिकारणत्वे निरस्ते मुक्तिमुद्दिश्य विशेषदर्शिनां तत्त्वज्ञानतदुपायादौ प्रवृत्त्यनुपपत्तिप्रसङ्गेन मुक्तिस्वरूपमेवान्यथा निर्वाच्यमित्यत आह **परन्त्वि**त्यादि।

भट्टाचार्यास्तु—तत्त्वज्ञानस्य तादृशमुक्तिजनकत्वाभावेऽपि तत्त्वज्ञानेन दुरितनाशं विना दुःखधाराया अनिवृत्तिप्रसङ्गेन दुःखध्वंसे प्रागुक्तसंसर्गद्वयेन दुःखवदन्यत्वस्यैवासम्भवात्तादृशमुक्तिप्रयोजकत्वमस्त्येव, प्रवृत्तिं प्रतीष्टप्रयोजकत्वज्ञानमेव कारणं न त्विष्टजनकत्वज्ञानं, श्रुत्यादिषु तत्त्वज्ञानस्य मुक्तिसाधकत्वबोधकानि वाक्यानि मुक्तिप्रयोजकत्वपराण्येवेति च कल्पयन्तो निरुक्तमुक्तिस्वरूपस्यैव निरवद्यतां सूचयन्ति। तन्नातिसमीचीनम्, तत्त्वज्ञाने परम्परया तादृशमुक्तिप्रयोजकत्वज्ञानस्यान्तरालिकानेकज्ञानसापेक्षतया गौरवेण साक्षात्तत्त्वज्ञानजन्यं दुरितनाशमपहाय परम्परया तत्त्वज्ञानाधीने तादृशदुःखध्वंसे मुक्तित्वाभ्युपगमस्य सुतरामनौचित्येन चात्यन्तिकदुःखध्वंसो मुक्तिरिति मतस्य परिहर्तव्यत्वात्।

न च दुरितनाशं प्रत्यपि न तत्त्वज्ञानस्य साक्षाज्जनकत्वम्, 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्ग' इति पारमर्षसूत्रे तत्त्वज्ञानस्य मिथ्याज्ञानवासनादिनाशद्वारेण परम्परयैव दुरितनाशप्रयोजकत्वस्य लाभादिति चेन्न, मिथ्याज्ञाननाशकतत्त्वज्ञानस्य प्रवृत्त्यात्मकदुरितनाशप्राक्क्षणपर्यन्तं स्थित्यभावेऽपि तत्र तत्त्वज्ञानधारायां बाधकाभावाद् दुरितनाशप्राक्क्षणवर्तिना तत्त्वज्ञानान्तरेणैव साक्षाद्

1 D परे तु 2 B ०साधनत्ववत 3 A C D स्वसामानाधिकरण्य-कालिकविशेषणतोभयसम्बन्धेन 4 A omits निष्कर्षः

**अर्थैवमपि तादृशोभयसम्बन्धेन पुरुषान्तरीय[1]दुरितवदन्य-दुरित[2]-ध्वंस त्वस्यैव[3] दुरितसामान्यवदन्यदुरितध्वंसत्वरूपमुक्तित्वस्याप्यर्थसमाजग्रस्ततया तत्त्वज्ञानजन्यतावच्छेदकत्वं नोपपद्यत इति चेन्न, अर्थसमाजग्रस्तस्य कार्यतानवच्छेदकत्वे प्रमाणाभाव एव वीजम्[4],**

---

दुरितनाशस्य सम्भवात् । तत्त्वज्ञाने दुरितनाशजनकत्वस्य बहुतरश्रुतिस्मृत्यादिप्रमाणसिद्धत्वात् तत्र तत्र प्रयोजकत्वार्थकल्पनाया गौरवादिदोषपराहतत्वात् ।

"**आत्यन्तिके**"त्यादि । अत्रापि आत्यन्तिकत्वं ध्वंसविशेषणम्, न तु दुःखांशे विशेषणम्, दुःखांशे विशेषणत्वे तदात्यन्तिकत्वमौत्कट्यापरपर्यायं व्यवतिष्ठते । तथाच सति उत्कट-दुःखासम्भिन्नस्वर्गसुखकालीने उत्कटदुःखसाधनध्वंसेऽतिव्याप्तेः । अत्र दुःखसाधनपदेन दुःखकारणीभूतं दुरितं, न तु दुःखकारणीभूतमात्माद्यपि तदीयध्वंसस्याप्रसिद्धेरत एवाह "**दुःखसाधनञ्चे**"त्यादि ।

एतेन यथाश्रुते दुःखसाधनध्वंसगतात्यन्तिकत्वस्य स्वसमानाधिकरणदुःखसाधना-समानकालीनत्वरूपस्य पूर्वोक्तोभयसम्बन्धेन दुःखसाधनवदन्यत्वपर्यवसन्नस्य प्रतीत्या दुःखसाधनतावच्छेदकसम्बन्धेन सामानाधिकरण्यघटकवृत्तित्वाधिकरणत्वयोः प्रवेशसम्भा-वनया कथञ्चिद्दुःखसाधनदुःखध्वंसे आत्मसामानाधिकरण्यसम्भावनेन आत्मादिरूपं दुःखसाधनमादायासम्भवशङ्कापि निरस्ता ।

"**तथाचे**"ति प्रकृतदुःखसाधनपदस्य दुरितार्थकत्वेनेत्यर्थः । "**उपदर्शितोभयसम्बन्धेन**" स्वसामानाधिकरण्य-कालिकविशेषणत्वोभयसम्बन्धेनेत्यर्थः । "**दुरितवदन्ये**"त्यादि । तथाहि 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' । इत्यत्र कर्माणीति बहुवचनेन, 'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन' इत्यत्र सर्व-पदेन, अन्यत्रापि तथैव तत्त्वज्ञानोत्तरं निखिलादृष्टानां प्रध्वंसस्य साक्षादेव शंसनात् कारणाभावेन चोत्तरस्यानुत्पादात् तत्र सर्वस्यैव दुरितध्वंसस्य तादृशोभयसम्बन्धेन दुरितवदन्यत्वस्य लाभेन प्रकृतलक्षणसमन्वयप्रतिपत्तिः ।

तथाचोक्तं शारीरकसूत्रकारैरपि 'तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशा' दिति । अत्र भाष्यकारः—'तदधिगमे ब्रह्माधिगमे सत्युत्तरपूर्वयोरघयोरश्लेषविनाशौ भवतः, उत्तरस्याश्लेषः पूर्वस्य विनाशः । कस्मात् ? तद्व्यपदेशात्', इत्यर्थमाह ।

एवञ्च तत्त्वज्ञानस्य साक्षादेव तादृशमुक्तिजनकतया मुक्तिमुद्दिश्य तत्त्वज्ञानतदुपायावौ विशेषदर्शिनां प्रवृत्त्यनुपपत्तिर्निरस्ता ।

अत्रापि कल्पे पूर्वदोषमाशङ्क्य समाधत्ते "**अर्थैवमपी**"त्यादिना "**तथे**"त्यन्तेन । "**एवमपि**"—निरुक्तात्यन्तिकदुःरितध्वंसस्य मुक्तित्वाभ्युपगमेऽपि । "**अर्थसमाजग्रस्ततया**" —कल्प्यमानकारणभिन्नकारणप्रयोज्यधर्मघटिततया । तथाहि, अर्थसमाजग्रस्तत्वमवच्छेद-

1 D omits पुरुषान्तरीय 2 D reads दुरितध्वंसत्वरूपमुक्तित्वस्याप्यर्थसमाज० 3 B C read ध्वंसस्येव 4 A मूलम्

**अत्र चानुपपत्त्या तथात्वमावश्यकम्[1]। तथाहि तादृशदुरितध्वंसस्य क्लृप्तकारणेनानिर्वाहात् तत्र तत्त्वज्ञानस्यानन्यथासिद्धतया हेतुत्वमावश्यकम्। तस्य जन्यतावच्छेदकं न दुरितध्वंसत्वं व्यभिचारात्। अतस्तादृशोभयसम्बन्धेन दुरितवदन्यत्वविशेषितं तथेति।**

**नच दुःखध्वंसस्य मुक्तित्वानभ्युपगमे दुःखेनात्यन्तं विमुक्तश्चरतीति श्रुतिविरोध इति वाच्यम्; न ह्येतादृशश्रुत्या दुःखात्यन्तविमोक्षस्य[2] मुक्तिपदार्थत्वं बोध्यते, येन तद्विरोधः स्यादिति, किन्तु मोक्षदशायां तस्यासत्त्वं प्रत्याय्यते।**

---

कतासम्बन्धेन जन्यतां प्रति स्वरूपेण जन्यतावच्छेदकत्वं प्रति वा प्रतिबन्धकम्। अत एव तादृशप्रतिबन्धकवति निरुक्तधर्मे नावच्छेदकतासम्बन्धेन तत्त्वज्ञाननिरूपितं जन्यत्वं तदवच्छेदकत्वं वा। तेनैव हेतुना **गदाधरोऽपि** स्वीयनवमुक्तिवादग्रन्थे 'अर्थसमाजरूपबाधकग्रस्तत्वाक्रान्तस्य कार्यतानवच्छेदकत्वा'दिति प्राह। सत्प्रतिपक्षग्रन्थदीधितौ **रघुनाथोऽपि** 'संशयत्वं न जन्यतावच्छेदकं तत्तद्धर्मिकतत्तत्प्रकारकज्ञानत्वप्रयोजकसमाजप्रयोज्यत्वात् समाजस्ये'ति 'संशयान्यज्ञानत्वरूपं निश्चयत्वमपि न जन्यतावच्छेदकं तत्त्वप्रयोजकविरहादेव तत्त्वविरहाद्युपपत्ते' रिति च ग्रन्थेन तमेवार्थं समर्थयामास। तदेवमर्थसमाजग्रस्तत्वं जन्यतावच्छेदकत्वे बाधकमिति सिद्धम्। प्रकृते तदुपपत्तिरित्थं यथा,—संसारदशायां भोगप्रायश्चित्तादिना समुत्पद्यमाने दुरितध्वंसे तादृशोभयसम्बन्धेन दुरितवत्त्वं वर्तते, तस्य स्वसमानाधिकरणदुरितसमानकालीनत्वात्। तादृशदुरितवत्त्वं प्रति च दुरितध्वंसपूर्ववर्तिदुरितकारणीभूतरागद्वेषात्मकदोषघटितसामग्री दुरितध्वंसकाले दुरितोत्पादनेन प्रयोजिका, तयैव रीत्या पुरुषान्तरीयदुरितध्वंसे वर्तमाने तादृशोभयसम्बन्धेन पुरुषान्तरीयदुरितवत्त्वे पुरुषान्तरीयरागद्वेषात्मकदोषस्यैव प्रयोजकत्वम्। तदभावेनैव अस्मदाद्यात्मवृत्तिदुरितध्वंसे पुरुषान्तरीयदुरितवदन्यत्वम्। अतो दुरितनाशे क्लृप्तकारणं यद्भोगादिकं तद्व्यतिरिक्तकारणप्रयोज्यत्वात् पुरुषान्तरीयदुरितवदन्यत्वस्य तद्घटितं पुरुषान्तरीयदुरितवदन्यदुरितध्वंसत्वं कस्यापि न जन्यतावच्छेदकम्। एवमेव मुक्तित्वाभिमतदुरितध्वंसवृत्तिदुरितवदन्यत्वस्यापि दुरितकारणीभूतरागद्वेषाभावप्रयोज्यतयैव तद्घटितं दुरितवदन्यदुरितध्वंसत्वं न तत्त्वज्ञानजन्यतावच्छेदकं भवितुमर्हतीति। इत्थञ्च तत्त्वज्ञानस्य तादृशधर्मावच्छिन्नं प्रत्यजनकत्वेन तादृशमुक्त्युद्देशेन विशेषदर्शिनां तत्त्वज्ञानतदुपायप्रवृत्त्यनुपपत्तिस्तदवस्थैवेति भावः।

निरुक्तं दोषं समाधत्ते "ने"त्यादिना। प्रमाणाभाव एवेति साधकप्रमाणाभाव एव, न तु अर्थसमाजग्रस्तत्वमित्यर्थः। एतेन यत्र प्रमाणमस्ति, तत्र अर्थसमाजग्रस्तमपि कार्यतावच्छेदकं, यत्र प्रमाणं नास्ति, तत्र तु नैवेति भावः।

अत एव नवमुक्तिवादे "**गदाधरोऽपि**" 'अर्थसमाजस्थले हि साधकाभाव एव कार्यता-

1 C reads ० तया 2 A दुःखात्यन्ताभावे (for ० विमोक्षस्य)

**तच्च तादृशदुरितध्वंसस्य मोक्षत्वेऽप्यक्षतमेव, मोक्षदशायामधर्मरूपकारण-विरहेण दुःखानुत्पादादवतो न विरोधः।**

---

वच्छेदकत्वबाधकः। उपदर्शितमुक्तित्वावच्छिन्नं प्रति तत्त्वज्ञानहेतुतायाश्च श्रुतिस्मृत्यादि-साक्षिकतया न बाधः' इत्याह।

"**अनुपपत्त्ये**"ति। वक्ष्यमाणव्यभिचारदोषेण केवलस्य दुरितध्वंसत्वस्य प्रकृततत्त्व-ज्ञानजन्यतावच्छेदकत्वानुपपत्त्येत्यर्थः। "**तथात्वं**" दुरितवदन्यदुरितध्वंसत्वस्य तत्त्वज्ञान-जन्यतावच्छेदकत्वम्। "**आवश्यकम्**"—अवश्यं कल्पनीयम्। **तादृशदुरितध्वंसस्य**—दुरित-वदन्यदुरितध्वंसस्य। "**क्लृप्तकारणेन**"—भोगप्रायश्चित्तादिरूपतत्त्वज्ञानेतरकारणेन। "**अनिर्वाहा**"दिति। दुरितध्वंसत्वमात्रस्यैव तादृशकारणजन्यतावच्छेदकत्वात्। दुरितवदन्यत्व-विशेषितदुरितध्वंसत्वस्य तत्कार्यतावच्छेदकत्वे संसारकालीनदुरितध्वंसादेरपि तादृशत्वा-पत्त्या मुक्तसंसारिणोरविशेषप्रसङ्गात् मुक्तिदशायां तादृशभोगादिरूपकारणविरहेण व्यभिचारापत्तेश्च।

"**अनन्यथासिद्धतये**"ति। तादृशकार्यं प्रति निखिलान्यथासिद्धभेदकूटवत्तयेत्यर्थः। कारणलक्षणघटकनियतपूर्ववर्तित्वदलसार्थक्याय कारणलक्षणनिवेशितनियतपूर्ववर्त्यन्यथासिद्ध-भेदकूटमात्रपरिग्रहे त्वनन्यथासिद्धतयेत्यस्य अनन्यथासिद्धनियतपूर्ववर्तितयेत्यर्थः कार्यः। अन्यथा व्यभिचारात्। तदत्रैवमनुमानम्,—तत्त्वज्ञानं तादृशदुरितध्वंसहेतुः, तादृशदुरित-ध्वंसं प्रति अनन्यथासिद्धत्वाद्, अनन्यथासिद्धनियतपूर्ववर्तित्वाद्वेति।

"**दुरितध्वंसत्वमि**"ति। तादृशदुरितवदन्यत्वाद्यविशेषितमित्यर्थः। "**व्यभिचारादि**"-ति। संसारदशायां तत्त्वज्ञानाभावेऽपि भोगादिजन्यदुरितध्वंसत्वावच्छिन्नरूपकार्योत्पत्त्येति शेषः। अथवा, केवलदुरितध्वंसत्वस्य तत्त्वज्ञानाजन्ये भोगादिजन्यदुरितध्वंसेऽपि वर्तमानतया तत्त्वज्ञानजन्यतातिरिक्तवृत्तित्वरूपव्यभिचारात्। अनतिरिक्तवृत्तिधर्मस्यैवावच्छेदकत्वादिति भावः। "**तथे**"ति—तत्त्वज्ञानजन्यतावच्छेदकमित्यर्थः। "**दुःखात्यन्तविमोक्षस्ये**"ति—पूर्वोक्तोभयसम्बन्धेन दुःखवदन्यदुःखध्वंसस्येत्यर्थः। "**तस्ये**"ति दुःखसामान्यस्येत्यर्थः। "**मोक्षदशायां**"—तादृशदुरितवदन्यदुरितध्वंसरूपमुक्तिकाले। "**अधर्मरूपकारणविरहेण**"—दुःखं प्रति क्लृप्तकारणस्याधर्मसामान्यस्याभावेन। तदा तत्त्वज्ञानेन पूर्वदुरितानां निवृत्तेः रागद्वेषरूपकारणविरहेण च दुरितान्तरस्यानुत्पत्तेरिति भावः। "**न विरोध**" इति। तथाच प्रकृतदुरितध्वंसस्य मुक्तित्वाभ्युपगमो न दोषायेति भावः।

दुरितध्वंसस्य मुक्तिरूपत्वे दोषान्तरमाशङ्क्य प्रतिषेधति **अथे**त्यादिना। **सुख-दुःखाभावे**त्यादि। अत्रायमभिप्रायः,—पुरुषार्थत्वं हि पुरुषप्रवृत्तिहेत्विच्छाविषयत्वम्। तच्च द्विविधं मुख्यपुरुषार्थत्वं, गौणपुरुषार्थत्वञ्च। अन्येच्छानधीनेच्छाविषयत्वं मुख्य-पुरुषार्थत्वम्। तच्च सुखदुःखाभावयोरेव, तत्तदिच्छाया अन्येच्छां विना तत्तज्ज्ञान-मात्रेणैव जननात्। तदुक्तं **विश्वनाथेन** 'निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायत' इति। अन्येच्छाधीनेच्छाविषयत्वं गौणपुरुषार्थत्वम्। तच्च सुखदुःखाभावान्यतरसाधना-नाम्। तदुक्तं न्यायसूत्रवृत्तौ **विश्वनाथेन** 'अत्र च निरुपधीच्छाविषयत्वात् सुखदुःखा-

**अथ दुरितध्वंसस्य सुखदुःखाभावतदन्यतरसाधनान्यत्वेन[1] पुरुषार्थ[2]-त्वाभावात् कथं मोक्षरूपतेति चेन्न, यथाहि सुखदुःखाभावरूपेष्ट[3]साधनत्वादि[4] इच्छाप्रयोजकम्[5], तथा प्रतियोगिगोचरद्वेषोऽप्यभावेच्छाप्रयोजकः। एवञ्च दुरितस्य दुःखरूपद्विष्टसाधनत्वेन[6] द्वेषविषयतया ध्वंसरूपे तदभावेऽपीच्छा-सम्भवेनोपपद्यत एव तस्यापि पुरुषार्थत्वम्। अतएव पापनाशार्थितया प्राय-श्चित्ते[7] प्रवृत्तिरिति।**

---

भावयोर्मुख्यप्रयोजनत्वम्, तदुपायस्य तु तदिच्छाधीनेच्छाविषयत्वाद् गौणप्रयोजनत्वमिती' ति। प्रयोजनत्वमेव पुरुषार्थत्वम्। निरुपधीति अन्येच्छानधीनेत्यर्थः। अत एव स्वीयनवमुक्तिवादे **गदाधरेण** मुख्यपुरुषार्थापरपर्याय-स्वतःप्रयोजनपदव्याख्याने 'तत्त्वञ्च अन्येच्छाधीनेच्छा-विषयत्व' मित्युक्तम्।

नच सुखदुःखाभावयोरिच्छाया अपि स्वभिन्नपरमेश्वरेच्छाधीनत्वादुक्तमुख्यपुरुषार्थ-त्वानुपपत्तिरिति वाच्यम् स्वसमानाधिकरणान्येच्छानधीनेच्छाविषयत्वस्य विवक्षितत्वात्। अथवा निरुक्तानधीनत्वमित्यत्राधीनत्वं जन्यत्वं, तच्च प्रकृते समवायसम्बन्धावच्छिन्नं ग्राह्यम्। एवञ्च विषयितया जन्यत्वावच्छिन्नं प्रति तादात्म्यसम्बन्धेनेश्वरेच्छाया जनकत्वस्य क्लृप्ततया ईश्वरेच्छाधीनत्वस्य सुखादीच्छागतस्य विषयित्वसम्बन्धावच्छिन्नत्वादुक्तानुप-पत्तिनिरासात्। जन्यत्वानवच्छिन्नाधीनत्वस्य अन्येच्छायां जन्यत्वस्य निवेशेन वा निरुक्त-दोषवारणसम्भवात्। एवञ्च मुख्यगौणव्यतिरिक्तस्य पुरुषार्थस्याभावात् सुखदुःखाभाव-तदन्यतरसाधनभिन्नत्वेन हेतुना दुरितध्वंसे पुरुषार्थत्वाभावः सिध्यति, विशेषधर्मावच्छिन्न-भेदकूटस्य सामान्यधर्माभावसाधकतायाः सिद्धत्वात्। तेन च पुरुषार्थत्वसामान्याभावेन सिद्धस्तत्र दुरितध्वंसे मोक्षरूपताव्यतिरेकः। पुरुषार्थत्वाभाववति मोक्षरूपताङ्गीकारे मोक्षेच्छाविरहप्रयुक्तमोक्षतदुपायप्रवृत्त्यभावप्रसङ्गस्य पूर्ववल्लब्धास्पदत्वात्।

**गदाधरस्तु** स्वीयमुक्तिवादे 'तत्र स्वतःप्रयोजनं सुखं तद्भोगो दुःखाभावश्चे' ति ग्रन्थेन सुखवत् सुखसाक्षात्कारस्यापि स्वतःप्रयोजनत्वमाख्याय सुखसाक्षात्कारस्यापि पुरुषार्थत्वं सूचयामास, तन्मतानुसारेण निरुक्तपुरुषार्थत्वाभावसाधकानुमाने व्यभिचारप्रसङ्गेन मूलस्थप्रकृतसुखपदस्योपलक्षणतया सुखतत्साक्षात्कारोभयपरत्वमवगन्तव्यम्।

वस्तुतस्तु **मणिकारेण** सोपपत्तिकमीश्वरानुमानग्रन्थे सुखवत् सुखसाक्षात्कारेऽपि

---

1 A reads ०भावान्यत्वेन (for ०भावतदन्यतरसाधनान्यत्वेन)

2 यतः फलेच्छानधीनेच्छाविषयत्वं पुरुषार्थत्वमतः पुरुषार्थविशेष्यकेच्छाया नेष्टसाधनता-ज्ञानं कारणं, दुरितध्वंसस्यापुरुषार्थत्वेनेष्टसाधनताज्ञानस्यातिरिक्तकारणत्वेन तन्न सम्भवति, तस्ये (दुरितध्वंसस्य) ष्टसाधनत्वाभावादिति भावः। 3 D reads ०भावत्वेष्ट (for ०भावरूपेष्ट) 4 CD ०त्वानि (for ०त्वादि) 5 CD ०जकानि (for ०जकम्) 6 B ०साधनरूपतया (for ०साधनत्वेन) 7 A प्रायश्चित्तेऽपि

**यत्तु पापनाशार्थितया[1] न प्रायश्चित्ते प्रवृत्तिः किन्तु दुःखप्रागभावस्योत्तरकालसम्बन्धमुद्दिश्यै[2]वेति चेन्न, प्रागभावस्योत्तरकालसम्बन्धो यद्यु[3]त्तरकालस्वरूपः, तदा तत्सत्त्वसामग्रीत एव निर्वाहेण प्रायश्चित्तस्य तत्रान्यथासिद्धत्वात्, यदि च प्रागभावरूपस्तदा तस्याजन्यतया प्रायश्चित्तस्य तदजनकत्वात् तदिच्छया तत्र[4] प्रवृत्त्यनुपपत्तेः ।**

**नच प्रागभावस्यापि तत्सत्त्वेऽग्रिमक्षणे.सत्त्वं[5] तेन विना अग्रिमक्षणेऽसत्त्व[6]मित्येवंरूपयोगक्षेमसाधारणजन्यताया अक्षतत्वान्नानुपपत्तिरिति वाच्यम्, तादृशजन्यताग्रहस्य प्रवृत्तिहेतुत्वे मानाभावात् ।**

---

प्रवृत्तिहेत्विच्छाविषयत्वरूपपुरुषार्थत्वापरपर्यायस्य प्रयोजनत्वस्य निराकरणाद् यथाश्रुतमेव सम्यक् । तदुक्तमीश्वरानुमाने **मणिकारेण** 'सुखी स्यामित्युद्दिश्य प्रवर्तते, न तु सुखमहं जानीयामिति सुखमेव तथा, न तु तदवगमः, तस्यावश्यकत्वेन अन्यथासिद्धत्वाद् गौरवाच्च' । इति ।

"**इष्टसाधनत्वादी**"त्यादिपदेन कृतिसाध्यत्वादिपरिग्रहः । "**प्रतियोगिगोचरेत्यादि**" । तथाहि यदभावप्रतियोगिनि द्वेषो जायते तदभावविषयिणी इच्छा भवति । अत एव दुःखे सर्वेषामेव स्वतःसिद्धद्वेषस्य सत्त्वाद् 'दुःखं मे माभू'दित्येवं दुःखाभावविषयिणीच्छा जायत इति भावः ।

"**अत एव**"—दुरितध्वंसस्यापि निरुक्तरीत्या प्रवृत्तिहेत्विच्छाविषयत्वरूपपुरुषार्थत्वादेव । "**पापनाशार्थितया**"—दुरितध्वंसेच्छया ।

"**दुःखप्रागभावस्ये**"ति प्रायश्चित्तनाश्यदुरितसम्भाव्यदुःखप्रागभावस्येत्यर्थः । "**उत्तरकालेति**"—प्रायश्चित्तोत्तरकालेत्यर्थः । तथाच दुरितध्वंसस्य न पुरुषार्थत्वं किन्तु, दुःखप्रागभावोत्तरकालसम्बन्धस्यैवेति प्रकृततात्पर्यम् ।

प्रकृतोत्तरकालसम्बन्धस्य कालिकस्वरूपसम्बन्धरूपत्वेन तस्य प्रतियोगिप्रागभावरूपत्वं तदनुयोग्युत्तरकालरूपत्वं वा समभ्युपेयम् । तत्रोभयत्रैव दोषं प्रतिपाद्य यत्तु-मतं प्रतिषेधति "**ने**"त्यादिना । "**तत्सत्त्वसामग्रीत एव**" प्रकृतोत्तरकालरूपखण्डकालकारणकलापादेव । "**निर्वाहेणे**"ति प्रकृतोत्तरकालसम्बन्धस्येति शेषः । "**तत्र**" दुःखप्रागभावस्योत्तरकालसम्बन्धे । "**अन्यथासिद्धत्वा**"दिति ; तथाच प्रायश्चित्ते दुःखप्रागभावोत्तरकालसम्बन्धसाधनत्वाभावेन विशेषदर्शिनां तत्र प्रवृत्तिरनुपपन्नेति भावः ।

"**तस्य**"—प्रागभावस्वरूपस्योत्तरकालसम्बन्धस्य । "**तदजनकत्वात्**"—निरुक्तसम्बन्धसाधनत्वाभावात् । "**तदिच्छया**"—तादृशोत्तरकालसम्बन्धरूपफलेच्छया । अत्र

1 B D पापनाशेच्छया 2 B सम्बन्धिमुक्तिमुद्दिश्य (for सम्बन्धमुद्दिश्य) 3 A हि (for यदि) 4 B C D प्रायश्चित्ते (for तत्र) 5 B C D तत् सत्त्वं (for सत्त्वं) 6 B C D तदसत्त्वं (for असत्त्वम्)

**वस्तुतस्तु[1] कृत[2]गोवधादिप्रायश्चित्तानां[3] गोवधादिजन्यदुःखानुत्पादात् दुःखप्रागभाव एव नास्ति, दुःखप्रागभावसत्त्वे दुःखोत्पादस्यावश्यकत्वात् ।**

---

तृतीयार्थः प्रयोज्यत्वम्, तस्य प्रवृत्तौ अन्वयः। "**तत्र**" प्रायश्चित्ते। "**प्रवृत्त्यनुपपत्ते**"रिति विशेषदर्शिनामिति शेषः। एवञ्च पापनाशार्थितयैव प्रायश्चित्ते प्रवृत्तेः स्वीकर्तव्यतया पापनाशापरपर्याये दुरितध्वंसे पुरुषार्थत्वमनपवादमिति भावः।

प्रागभावेऽपि वर्तमानां योगक्षेमसाधारणजन्यतामादाय सम्भावितामुपपत्तिं निराकर्तुमाह "**नचे**"त्यादि। "**तत्सत्त्व**" इत्यत्र तत्पदं हेतुत्वाभिमतपरम्। "**अग्रिमक्षणे**" हेतूत्तरक्षणे। "**सत्त्वमि**"ति जन्यत्वाभिमतस्येति शेषः। "**तेन विने**"त्यत्रापि तत्पदं हेतुत्वाभिमतपरम्। "**असत्त्वमि**"त्यत्रापि जन्यत्वाभिमतस्येति शेषः। प्रकृते हेतुत्वाभिमतं प्रायश्चित्तम्, जन्यत्वाभिमतश्च प्रागभावरूपोत्तरकालसम्बन्धः। "**तादृशजन्यताग्रहस्ये**"ति। तादृशयोगक्षेमसाधारणजन्यतानिरूपितजनकताज्ञानस्येत्यर्थः। अथवा, यथा फलसाधने इष्टसाधनत्वबुद्धिः प्रवृत्तिप्रयोजिका तथा फले साधनजन्यत्वबुद्धिरपि प्रवृत्तिप्रयोजिका, अतो यथाश्रुतमेव सम्यक्। अथवा, तादृशजन्यताग्रहस्येति इष्टसाधनत्वघटकतया निरुक्तरूपजन्यताग्रहस्येत्यर्थः। निरुक्तजन्यतां निरूपकत्वसम्बन्धेन हेतूकृत्य प्रायश्चित्तरूपे साधने प्रकृतेष्टसाधनत्वानुमानमभिप्रेत्य तथोक्तिः, एतन्मते प्रवृत्तिहेतुत्व इत्यस्य परम्परया प्रवृत्तिं प्रति निरुक्तरूपेण प्रयोजकत्व इत्यर्थः। अत्रानुमानप्रयोगो यथा—प्रायश्चित्तं दुःखप्रागभावात्मकदुःखप्रागभावोत्तरकालसम्बन्धरूपेष्टसाधनम्, निरूपकत्वसम्बन्धेन निरुक्तोत्तरकालसम्बन्धवृत्तियोगक्षेमसाधारणतज्जन्यतावत्त्वादिति ।

"**मानाभावा**"दिति। तथाहि प्रमाणाभावेन तादृशजन्यताग्रहस्य प्रवृत्तिहेतुत्वासिद्ध्या तादृशजन्यतामादाय तादृशोत्तरकालसम्बन्धमुद्दिश्य प्रायश्चित्ते प्रवृत्तेरनुपपत्त्या पापनाशार्थितयैव प्रायश्चित्ते प्रवृत्तिरिति मतं सुस्थितमिति भावः।

ननु क्षेमसाधारणतादृशजन्यताग्रहस्य प्रवृत्तिहेतुत्वानङ्गीकारे विशेषदर्शिनां क्षेमसाधनगोचरप्रवृत्तेरनुपपत्त्या क्षेमानुपपत्तिः। प्रभाकरमते—विशिष्टदुःखप्रागभावस्य मुक्तित्वेन तादृशमुक्तिमुद्दिश्य तत्साधनतत्त्वज्ञानादौ प्रवृत्त्यनुपपत्तिरित्यतस्तत्तदनुपपत्तिरेव तादृशजन्यताग्रहस्य प्रवृत्तिहेतुत्वे मानं स्यादित्यत आह **वस्तुतस्त्विति**।

"**कृतगोवधादिप्रायश्चित्ताना**"मिति—कृतानि गोवधादिप्रायश्चित्तानि गोवधादिजन्यदुरितनाशकप्रायश्चित्तानि यैस्तथाभूतानाम्। "**गोवधादिजन्यदुःखानुत्पादा**"दिति कृतैः प्रायश्चित्तैरेव गोवधादिजन्यदुःखकारणीभूतदुरितानां नाशादिति शेषः।

न च कृतगोवधादिप्रायश्चित्तानामपि पुनर्गोवधादिनिषिद्धकर्मानुष्ठानेन दुरितोत्पत्त्या गोवधादिजन्यदुःखोत्पादादिदमसङ्गतमिति वाच्यम्, प्रायश्चित्तानन्तरं पुनर्निषिद्धकर्माननु-

1 नन्वन्वयव्यतिरेकानुविधायित्वज्ञानमेव हेतुत्वग्राहकं भविष्यतीत्यत आह वस्तुतस्त्विति। 2 C inserts कृत before गोवध० 3 C reads प्रायश्चित्तेन

**किञ्च, तत्प्रतियोगि नातीतं दुःखम्[1] [2]प्रागभावस्यातीताप्रतियोगिकत्वात्। नाप्यन्यदीयं भाविदुःखं (ख ?) प्रागभावस्य प्रतियोगिसमानदेशत्वात्[3]।**

**नापि तत्पुरुषीयं[4] तादृशभाविदुःखम[5]प्रसिद्धेः। तस्मात्तदर्थितया कथं**

---

ष्ठायिनामित्यनेनापि विशेषणात्। तथा च अतीतकर्मजनितदुरितानां कृतेन प्रायश्चित्तेन नाशात् पुनर्निषिद्धकर्मानुष्ठानविरहेण दुरितान्तरानुत्पादात् प्रायश्चित्तानन्तरं दुःखानुत्पादः सुसङ्गत एवेति भावः।

"**दुःखप्रागभाव एव नास्ती**"ति। प्रायश्चित्तोत्तरकाले इति शेषः। तथाहि सम्बन्धस्य सम्बन्धिद्वयसापेक्षतया प्रकृतसम्बन्धानुयोगिन उत्तरकालस्य सत्त्वेऽपि प्रतियोगिनो दुःख-प्रागभावस्यासत्त्वेन प्रकृतदुःखप्रागभावोत्तरकालसम्बन्धस्यानुपपन्नतया तदुद्देशेन विशेष-दर्शिप्रवृत्तिर्नोपपद्यत इति भावः।

अत्रेदमवधेयम्—प्रकृते दुःखोत्पादो व्यापकः, दुःखप्रागभावश्च व्याप्यः। तेन व्यापकाभावेन दुःखानुत्पादेन व्याप्यभूतदुःखप्रागभावाभावसिद्धिरभिप्रेता। अग्रेऽपि तत एव दुःखप्रागभावरूपव्याप्यसत्त्वे व्यापकीभूतदुःखोत्पादस्यावश्यं सत्त्वमावश्यकत्वादित्यन्तग्रन्थेन प्रतिपादितम्। दुःखप्रागभावस्य दुःखप्रतियोगिकत्वेन दुःखोत्पादं विना तस्य सप्रतियोगिकत्व-व्याघातादिति, एवमेव किञ्चेत्याद्युत्तरग्रन्थः सङ्गच्छते, नान्यथा।

ननु अतीतादिदुःखस्य तत्प्रतियोगित्वस्वीकारेणापि दुःखप्रागभावस्य सप्रतियोगि-कत्वोपपत्तौ किमेतदर्थं भाविकाले दुःखोत्पादस्वीकारेणेत्याशङ्क्याह "**किञ्चे**"त्यादि। "**तत्प्रतियोगि**"—प्रायश्चित्तोत्तरकालवृत्तिदुःखप्रागभावप्रतियोगि। "**अतीताप्रतियोगिक-त्वात्**"—अतीतप्रतियोगिकत्वाभावात्, अनागतमात्रप्रतियोगिकत्वादिति यावत्। तथाच अतीतेन दुःखेन न तादृशदुःखप्रागभावस्य सप्रतियोगिकत्वोपपत्तिरिति भावः।

अथ प्रागभावस्यातीतप्रतियोगिकत्वे का क्षतिरिति चेदत्र ब्रूमः,—अतीतत्वं नाम वर्तमानकालवृत्तिध्वंसप्रतियोगित्वम्। प्रकृते तु यदा यः कालः प्रकृतप्रागभावाश्रयत्वेनाभिमत-स्तदा तत्कालवृत्तिध्वंसप्रतियोगित्वमेवातीतत्वमनायत्या कल्पनीयम्। एवञ्च दुःखादि-प्रागभावाश्रयत्वाभिमतवर्तमानकालवृत्तिध्वंसप्रतियोगिनः पूर्वोत्पन्नदुःखादेरेव प्रकृतदुःखादि-प्रागभावप्रतियोगितया तेनैव प्रतियोगिनाश्यप्रागभावस्य निरस्तपूर्वत्वादुत्तरकाले तत्सत्तायाः सुतरामसम्भवाद् द्वितीयदुःखादिव्यक्तीनामुत्पत्तिर्नोपपद्येत। उत्पन्नस्य पुनरुत्पत्तिप्रसङ्ग-प्रतिरोधाय जन्यमात्रं प्रत्येव प्रागभावस्य कारणताया अवश्यमभ्युपगन्तव्यत्वादिति सुतरां पर्याकुला समुत्पादप्रक्रिया सर्वजन्यानाम्। अत एव नातीतप्रतियोगिकत्वं प्रागभावस्य शक्यमभ्युपगन्तुम्।

किञ्च प्रकृतेऽपि दुःखप्रागभावस्यातीतदुःखप्रतियोगिकत्वमङ्गीकृत्य प्रायश्चित्तो-त्तरं दुःखप्रागभावसत्त्वोपपादनाय समपेक्षितस्य दुःखोत्पादस्य प्रसङ्गे निराकृतेऽपि प्राय-

---

1 All the Mss omit दुःखम्। 2 A C D read तादृशदुःख before प्रागभावस्य 3 D देशत्वनियमात् 4 A पुरुषीय 5 A दुःखाप्रसिद्धेः

**प्रायश्चित्ते प्रवृत्तिरिति। एवञ्च पापनाशार्थितयैव प्रायश्चित्ते प्रवृत्तिरित्येवं युक्तम्। तच्च पापनाशस्यापुरुषार्थत्वमुपग (च्छ) तः कथमुपपद्यताम्।**

**नित्यसुखाभिव्यक्तिर्मुक्तिरिति भट्टाः। अभिव्यक्तिः साक्षात्कारः। अथ नित्यसुखे मानाभावः, न च नित्यं विज्ञानमानन्दं ब्रह्मेति श्रुतिस्तत्र मानमिति**

---

श्चित्तपूर्वोत्पन्नेनैव व्यतीतदुःखेन स्वप्रतियोगिना प्रतियोगिनाश्यप्रागभावस्य नाशात् तस्योत्तरकालसम्बन्धासम्भवेन सुदुर्घटा विशेषदर्शिनां तमुद्दिश्य प्रायश्चित्ते स्वोपकल्पिता प्रवृत्तिरिति। अत एव अनागतप्रतियोगिकत्वमेव प्रागभावस्येति स्थितम्। यादृशपापजन्यं दुःखं प्रायश्चित्तानुष्ठायिनः पूर्वं कदापि न जातं तादृशपापजन्यदुःखप्रागभावोत्तरकालसम्बन्धघटकप्रागभावस्यातीतप्रतियोगिकत्वं सुतरामेवानुपपन्नमित्यपि चिन्तनीयम्।

"**नाप्यन्यदीयमित्यादिना**"। अत्रान्यपदम्—अकृतप्रायश्चित्तगोवधाद्यनुष्ठातृपुरुषपरम्। तस्यैव भावितादृशदुःखसम्भवात्। भावीत्यत्र दुःखं तत्प्रतियोगीति च पूर्वोक्तमनुषञ्जनीयम्। एवञ्च दुःखप्रागभावस्येत्यत्र दुःखपदमविवक्षितार्थम्। अथवा दुःखेत्यत्र दुःखमिति पाठः, दुःखमिति पूर्वोक्तस्य च नानुषंगः।

"**प्रतियोगिसमानदेशत्वादि**"ति। स्वप्रतियोग्यधिकरणदेशवृत्तित्वनियमादित्यर्थः। प्रागभावस्य प्रतियोग्यसमानदेशत्वाङ्गीकारे प्रतियोगिप्रागभावयोः कार्यकारणभावनाश्यनाशकभावादिविप्लवापत्तेः। वैयधिकरण्येऽपि कथञ्चित् सम्बन्धविशेषावष्टम्भेन कार्यकारणभावाद्युपपादनेऽपि अप्रसङ्गातिप्रसङ्गादिदोषाणामपोहितुमशक्यत्वात्।

"**तत्पुरुषीय**"मिति प्रागुक्तकृतप्रायश्चित्तपुरुषवृत्तीत्यर्थः। एतेन प्रागभावस्य प्रतियोगिसमानदेशत्वमुपपादितम्। "**तादृशे**"ति निरुक्तगोवधादिजन्येत्यर्थः। "**भाविदुःख**"मिति। अत्रापि तत्प्रतियोगीति पूर्वोक्तमनुषञ्जनीयम्। "**अप्रसिद्धे**"रिति। तादृशदुःखकारणीभूतगोवधादिजन्यदुरितस्य प्रायश्चित्तेनैव निरस्तत्वात् प्रायश्चित्तोत्तरकाले तत्पुरुषे तादृशदुःखोत्पत्तेरसम्भवादिति भावः।

"**तस्मादिति**"। प्रायश्चित्तोत्तरकाले तादृशदुःखप्रागभावसत्त्वासम्भवेन तादृशदुःखप्रागभावोत्तरकालसम्बन्धस्यानुपपन्नतया तदुद्देशेन विशेषदर्शिनां प्रायश्चित्तप्रवृत्तेरनुपपन्नत्वादित्यर्थः। "**तदर्थितयेति,**" तादृशदुःखप्रागभावोत्तरकालसम्बन्धोद्देशेनेत्यर्थः। "**अपुरुषार्थत्वं**"—पुरुषार्थत्वाभावम्। "**उपगच्छत**" इति अभ्युपगच्छत इत्यर्थः। अतः पापनाशस्य निरुक्तयुक्त्या पुरुषार्थत्वस्य सिद्धतया प्रकृतदुरितध्वंसस्य मोक्षरूपता सुसङ्गतैवेति हृदयम्।

अथेदानीं मीमांसकभट्टाभिमतां नित्यसुखाभिव्यक्तेर्मुक्तिरूपतां निराकर्तुं तन्मतमुपन्यस्यति "**नित्यसुखेत्यादिना**"। अत्र "**भट्टाः**" तौतातितभट्टाः, मीमांसकेषु तैरेव वेदान्तिमतमनुवर्तमानैर्नित्यसुखस्य मुक्तिदशायां तत्त्वज्ञानप्रयोज्यतदभिव्यक्तेश्च मुक्तिरूपताया अभ्युपगमात्। तदुक्तं किरणावल्यां**मुदयनाचार्येण** 'तौतातितास्तु अकार्यमपीश्वरज्ञानं शरीरमन्तरेणानिच्छन्तः कार्यमेव सुखज्ञानमपवर्गेऽस्तीति वदन्तस्त्रपा विरोधो भयमिति त्रयमपि त्यक्तवन्तश्च' इति। तत्सन्दर्भव्याख्याने **प्रकाशकारेणापि** 'दुःखसाधन-

**वाच्यम्; तत्र विज्ञानानन्दब्रह्मपदानामेकधर्मिबोधकत्वलक्षण[1]सामानाधिकरण्यान्यथानुपपत्त्या विज्ञानानन्दपदयोर्धर्मिपरताया आवश्यकत्वात् तत्रैव नित्यपदार्थान्वयेन आनन्दस्य नित्यत्वाप्रतीतेः[2]।**

---

शरीरनाशे नित्यसुखाभिव्यक्तिर्मुक्तिरिति भाट्टमतं निराकरोति तौतातितास्त्वि' ति निवद्धम्। इदमेव मतं भगवता **वात्स्यायनेन** न्यायसूत्रभाष्ये 'नित्यं सुखमात्मनो महत्त्ववन्मोक्षे व्यज्यते, तेनाभिव्यक्तेन अत्यन्तं विमुक्तः सुखी भवतीति केचिन्मन्यन्त' इति ग्रन्थेन समसूचि। तत एव च भट्टा इत्यस्य कुमारिलभट्टा इत्यर्थं वदतां सुतरामनुपपन्नः पक्षः। कुमारिलभट्टैः स्वकृते मीमांसाश्लोकवार्त्तिकग्रन्थे सम्बन्धाक्षेपपरिहारप्रस्तावे प्रसङ्गतो मुक्तेः सुखसम्भोगस्वरूपत्वस्य प्रतिक्षेपात्, तदीयं मतमनुवर्तमानेन **गागाभट्टेन** भाट्टचिन्तामणिग्रन्थे 'अतो न नित्यसुखाभिव्यक्तिर्मुक्तिः, तस्मात् प्रपञ्चस्य सर्वथा विलयो मुक्ति' रिति ग्रन्थेन निरुक्तमुक्तिस्वरूपं दृढं निराकृत्यान्यथैव तत्स्वरूपस्य व्यवस्थापनाच्च।

"**नित्ये**"त्यादि—नित्यं यत् सुखं तस्याभिव्यक्तिरिति, न तु नित्या या सुखस्याभिव्यक्तिरित्यर्थः। नित्यपदार्थस्याभिव्यक्तिविशेषणत्वे तस्या अभिव्यक्तेः कृत्यसाध्यत्वेनापुरुषार्थत्वात्तदुद्देशेन तत्त्वज्ञानादिप्रवृत्त्यनुपपत्तिः, नित्यायास्तस्याः संसारदशायामपि सत्त्वस्यावश्यकतया मुक्तसंसारिणोरविशेषप्रसङ्गश्च। सुखस्य नित्यत्वन्तु स्वयमेव ग्रन्थकारेणोपरिष्टादुपपादयिष्यते।

ननु अभिव्यक्तिशब्दस्य बहुत्रैव ज्ञानसामान्यार्थस्य दृष्टत्वादत्रापि तस्य तदर्थत्वोपगमे शब्दानुमानाभ्यां संसारदशायामपि नित्यसुखाभिव्यक्तिसम्भवेन कथं मुक्तसंसारिणोरविशेषप्रसङ्गदोषप्रत्याख्यानं, कथं वा तदर्थमत्यायासकरे तत्त्वज्ञानानुकूलयोगाभ्यासादौ प्रवृत्त्युपपादनमित्यत आह "**अभिव्यक्तिः साक्षात्कार**" इति। तथाच तस्य तत्त्वज्ञानसाध्यतया संसारदशायामसम्भवान्न मुक्तसंसारिणोरविशेषप्रसङ्गः। नापि तत्त्वज्ञानानुकूलदुष्करयोगाभ्यासादिप्रवृत्तिव्याघात इति भावः।

अथैतल्लक्षणघटकनित्यसुखस्याप्रामाणिकत्वमाशङ्क्य सोपपत्तिकं तद्व्यवस्थापनं प्रस्तौति "**अथे**"त्यादिना।

"**नित्यसुखे मानाभाव**" इति,—नन्वस्य मूलप्रतीकस्य कोऽर्थः? यदि मानशब्दस्य प्रमाणपरतया नित्यसुखसाधकप्रमाणाभाव इति, तदा सिद्ध्यसिद्धिभ्यां व्याघातः, मम माता बन्ध्येतिवद् वदतो व्याघातश्च। अतः सुखे स्वप्रयोज्यनित्यत्वप्रकारतानिरूपितविशेष्यतावत्त्वसम्बन्धेन प्रमाणाभाव इति तदर्थः कल्पनीयः। उत्तरत्रापि क्वचित् क्वचित् तथा पद्धतिरनुसर्तव्या। अथवा स्वप्रयोज्यसुखनिष्ठविशेष्यतानिरूपितप्रकारतावत्त्वसम्बन्धेन नित्यत्वे प्रमाणाभाव इत्यत्र तद्वाक्यतात्पर्यं कल्प्यम्।

अथवा प्रमाणेषु नित्यसुखसाधकत्वाभाव इति तदर्थः। नित्यसुखसाधकत्वञ्च

1 D रूप (for लक्षण) 2 B नित्यताया अनुपपत्तेः (for नित्यत्वाप्रतीतेः)

नित्यत्वप्रकारकसुखविशेष्यकसिद्धिजनकत्वम्। तादृशसिद्धिश्च भ्रमरूपैव स्वमते प्रसिद्धा। प्रमाणत्वावच्छेदेन तादृशसिद्धिजनकत्वाभावकथनाच्च न सिद्धसाधनमर्थान्तरं वा।

वस्तुतस्तु नित्यत्वप्रकारतानिरूपितसुखत्वावच्छिन्नविशेष्यतात्वावच्छेदेन प्रमाणत्व-प्रयोज्यत्वाभावः प्रयोज्यतासम्बन्धेन प्रमाणत्वाभावो वा निरुक्तवाक्यार्थः। प्रमाणत्वञ्च प्रकारताविशिष्टविशेष्यताकज्ञानकरणत्वरूपमनुगतं निर्वाच्यम्। वैशिष्ट्यञ्च—स्वनिरू-पितत्व-स्वाश्रयाधिकरणवृत्तित्वैतदुभयसम्बन्धेन।

अथवा भावप्रत्ययनिष्पन्नस्य मानशब्दस्य धर्मपरतया विशेषलाक्षणिकतया च प्रमितित्वमर्थः। तदपि तथैवानुगतमेव। तस्य घटकतासम्बन्धेन नित्यत्वप्रकारतानिरूपित-सुखविशेष्यतायां सुखविशेष्यतानिरूपितनित्यत्वप्रकारतायां वा अभाव इति निरुक्तवाक्यार्थो विवक्षितः।

स्वतन्त्रास्तु प्रमाणत्वघटकीभूत सुखविशेष्यतानिरूपितप्रकारतायां नित्यत्ववृत्तित्वा-भावः, तादृशनित्यत्वप्रकारतानिरूपितविशेष्यतायां सुखवृत्तित्वाभावो वा, किंवा प्रमाणत्व-घटकनित्यत्वप्रकारतायां सुखविशेष्यतानिरूपितत्वाभावः, तादृशसुखविशेष्यतायां नित्यत्व-प्रकारतानिरूपितत्वाभाव एव तदर्थो वाच्यः। एतेन नित्यत्वप्रकारकसुखविशेष्यकभ्रम-ज्ञानस्यापि विषयान्तरप्रकारकादिप्रमात्वस्य दुरपनेयतया तत्करणस्यैव नित्यत्वप्रकारकसुख-विशेष्यकसिद्धिजनकत्वमुपादाय निरुक्तनित्यत्वप्रकारतासुखविशेष्यतयोरपि प्रमाणप्रयोज्यताया अक्षतत्वेन न निरुक्तवाक्यस्य बाधितार्थकत्वप्रसङ्ग इति पर्यवसेयम्।

नचैवं मानस्य मानत्वाभावाद्यविरोधित्वेन तत्प्रतिषेधकविधया श्रुतिरूपमानो-पन्यासमाशङ्क्य नचेत्यादिना तन्निषेधाध्यवसायो नीरुजस्य भेषजप्रयोगाध्यवसायमनुहरतीति वाच्यम्; 'तत्र श्रुतिर्मानं' मिति वाक्यघटकतत्पदस्य वैज्ञानिकनित्यसुखपरतया नित्यत्व-प्रकारकसुखविशेष्यत्वादेर्मानविशेषणतया मानत्वादेस्तत्र तत्प्रयोज्यत्वादेश्च फलबलेन प्रतीत्या दोषनिरसनात्। एवञ्च न पूर्वोक्तसिद्ध्यसिद्धिव्याघातशंकेति हृदयम्।

तत्र सम्भावितं श्रुतिप्रामाण्यमपाचिकीर्षुराह **'नचे'**त्यादि। **"तत्र"** नित्यसुखे। शाब्द-मितौ शब्दज्ञानस्यैव करणत्वेन मानमित्यस्य विषयितया मानतावच्छेदकमित्यर्थः। निषेधे हेतुमाह **"तत्रे"**त्यादिना। तत्र—नित्यमित्यादिप्रागुक्तश्रुतिवाक्ये। तत्र घटकत्वं सप्तम्यर्थः। तस्य विज्ञानानन्दब्रह्मपदेष्वन्वयः। तेन निरुक्तश्रुतिवाक्यघटकविज्ञानानन्दब्रह्मपदानामिति प्रकृतार्थः।

**"एकधर्मो"**त्यादि। सामानाधिकरण्यपदघटकाधिकरणपदस्याधाररूपार्थमुपादाय सामानाधिकरण्यपदस्य समानाधारवृत्तित्वरूपार्थ एव भूरिप्रयोगदर्शनात् 'सामानाधि-करण्यान्यथानुपपत्त्ये' त्येतन्मात्रोक्तौ विज्ञानानन्दपदयोर्धर्मपरत्वस्वीकारेऽपि विज्ञानानन्द-ब्रह्मपदानां सर्वेषामेव शब्दात्मकतया शब्दगुणकाकाशवृत्तित्वाबाधेन सामानाधिकरण्योपपत्त्या प्रकृतसामानाधिकरण्यान्यथानुपपत्त्युक्तिरसङ्गता प्रतिभायादित्यत एकधर्मिबोधक त्वलक्षणेति सामानाधिकरण्यविशेषणमुपात्तम्। तेन समानाधारवृत्तित्वलक्षणसामानाधिकरण्यव्यावृत्त्या नोक्तसामानाधिकरण्यान्यथानुपपत्त्युक्तेरसङ्गतिप्रतिभानावकाश इति भावः।

एकधर्मीत्यत्र धर्मिपदेन धर्मांशेऽपि प्रसक्तैक्याशङ्काव्यावृत्तिः कृता। तेन प्रकृते

**न च ब्रह्मणो ज्ञानसुखाभेदोपगमाद् विनैव[1] धर्मिलक्षणां[2] सामानाधिकरण्यमुपपद्यत इति वाच्यम्; ब्रह्मपदार्थस्यात्मनो ज्ञानसुखाभेदोपगमे वेदान्तमत-**

---

विज्ञानानन्दब्रह्मपदप्रतिपाद्यतावच्छेदकधर्माणामैक्याभावेन विज्ञानादिपदानां धर्मिपरत्वेऽपि न प्रकृतसामानाधिकरण्यानुपपत्तिशंकातादवस्थ्यमिति ध्येयम्। अत एव भिन्नप्रवृत्ति-निमित्तत्वे सत्येकार्थबोधकत्वं सामानाधिकरण्यमिति वैयाकरणाः प्राहुः।

सामानाधिकरण्यपदस्य तादृशार्थकत्वञ्च अधिक्रियते नियुज्यते शब्दो यस्मिन्नभिधानाय तदधिकरणमर्थः। समानं तुल्यमेकमिति यावद्, अधिकरणमर्थः, धर्मिरूपमभिधेयं वस्तु ययोस्तौ समानाधिकरणौ तयोर्भावः सामानाधिकरण्यमिति व्युत्पत्तिबललभ्यम्। एवञ्च विज्ञानपदानन्दपदाभ्यां यदि विज्ञानाश्रयानन्दाश्रयरूपधर्मिप्रतीतिर्न स्यात् तदा ब्रह्मण आत्माभिन्नस्य स्वमते विज्ञानाश्रयत्वानन्दाश्रयत्वयोरेवाभ्युपगमेनात्मधर्मभूत-विज्ञानानन्दपदार्थयोर्ब्रह्मण्यभेदान्वयानुपपत्तिः स्यादतो विज्ञानाश्रयानन्दाश्रयब्रह्मरूपधर्मिपरत्वमेव निरुक्तश्रुतिघटकविज्ञानानन्दपदयोरभ्युपेतव्यम् इत्यावश्यकत्वादित्यन्तप्रकृत-ग्रन्थतात्पर्यमवसेयम्।

"**तत्रैव**"—विज्ञानानन्दाश्रयधर्मिण्येव, न तु विज्ञानानन्दात्मकधर्मेऽपि इत्येवशब्द-घटितवाक्यार्थः। एकत्र विशेषणतयान्वितस्यान्यत्र विशेषणत्वेनान्वयायोगात् तादृशस्थलेष्वेक-देशान्वयस्यानभ्युपगमाच्च। न हि घटो नित्य इति वाक्यस्य लक्षणानुसन्धानमन्तरेण धर्मिविशेषणीभूते घटत्वे नित्यत्वान्वयाद् भवत्यवाधितार्थकत्वमिति ध्येयम्।

'**नित्यपदार्थान्वयेने**"ति—निरुक्तश्रुतिवाक्यघटकनित्यपदार्थस्य ब्रह्मण्येव अभेद-सम्बन्धावगाह्यन्वयबोधसामग्रीबलादुपजातेन नित्यपदार्थान्वयबोधेनेत्यर्थः। "**आनन्दस्य**"—प्रकृतस्थले आनन्दाश्रयरूपधर्म्यंशे गुणीभावमापन्नस्य प्रकृतलक्षणघटकीभूतनित्यत्वाभि-मतस्य सुखस्येत्यर्थः। "**नित्यत्वाप्रतीते**"रिति निरुक्तश्रुतिप्रमाणादिति शेषः। "श्रुतान्व-यादनाकांक्षं न वाक्यं ह्यन्यदिच्छती"त्यादिन्यायादिति भावः। तथाहि निरुक्तयुक्त्या "नित्य' मित्यादिप्रागुक्तश्रुतिप्रमाणस्यापि सुखे नित्यत्वासाधकतया नित्यसुखे मानाभाव-पक्ष एव व्यवस्थित इति प्रकरणार्थः।

ननु 'आनन्दो ब्रह्मेति व्यजानात्' 'रसो वै सः' 'रसं ह्येवायं लब्ध्वा आनन्दीभवति', 'को ह्येवान्यात् कः प्राण्याद् यदेष आकाश आनन्दो न स्यात्' इत्यादिश्रुतिभिः, तथा 'ब्रह्मणश्चैतन्यस्वरूपत्वमाम्नातं "विज्ञानमानन्दं ब्रह्म" "सत्यं ज्ञानमनन्तं ब्रह्म" "अनन्त-रोऽबाह्यः कृत्स्नः प्रज्ञानघन एव" इत्यादिश्रुतिषु' इति शाङ्करभाष्यादिभिश्च ब्रह्मणो ज्ञान-सुखाभेदस्य स्पष्टमेव प्रतिपादितत्वादेकधर्मिबोधकत्वलक्षणसामानाधिकरण्योपपत्त्यर्थं निरुक्त-श्रुतिघटकविज्ञानानन्दपदयोर्विज्ञानाश्रयानन्दाश्रयपरत्वकथनं श्रुत्यादिविरुद्धमतो ब्रह्मणो ज्ञान-सुखाभेद एव स्वीकार्यः, एवञ्च निरुक्तश्रुतिघटकविज्ञानानन्दपदयोर्धर्मपरत्वेऽपि न प्रकृत-सामानाधिकरण्यानुपपत्तिरित्याशंक्याह "**न च ब्रह्मण**" इत्यादि।

1 A ०गमादिनैक० (for ०गमाद्विनैव) 2 A B C read धर्मिबोधकत्वलक्षणं

**प्रवेशापत्तेः। तत् पुनरतीव मन्दम्। सुखज्ञानयोरात्माभेदोपगमे[1] अहं ज्ञानी, अहं सुखीत्याद्यबाधितप्रतीतिसिद्धस्यात्मज्ञानाद्याराधाराधेयभावस्यानुपपत्तेः। अहं सुखमहं ज्ञानमित्यादिप्रतीत्यापत्तेश्च।**

**अथ[2] सुखस्वरूपात्मनो ज्ञानाभेदे ज्ञानसुखयोरभेदाज् ज्ञानस्य[3] तन्मते स्वप्रकाशतया तज्ज्ञानमेव सुखविषयकम्, तच्च नित्यतया संसारितादशायामप्य-**

---

"**ज्ञानसुखे**"त्यादि—ज्ञानात्मकत्वसुखात्मकत्वयोरभ्युपगमे इत्यर्थः। "**वेदान्तमते**"ति-वैदान्तिकैरेवात्मनो ज्ञानसुखाभेदस्य स्वीकारान्नतु मीमांसकादिभिरिति भावः। इष्टापत्तिश्चेदपसिद्धान्तप्रसङ्गः। ननु ब्रह्मणि ज्ञानसुखाभेदस्य वैदान्तिकसिद्धान्तसिद्धत्वेऽपि तस्य श्रौततया स्वसिद्धान्तेऽप्यवर्जनीयत्वेन घ्राणादीनामिन्द्रियत्वं गन्धादीनामिन्द्रियार्थत्वं पृथिव्यादीनां भूतत्वं प्रमाणैरर्थप्रतिपत्तिरित्यादिसर्वतन्त्रसिद्धान्तवत् तत्परिग्रहे कथमपसिद्धान्त इत्याशंक्य तन्मतदूषणार्थं प्रस्तौति "**तत् पुनरतीव मन्द**"मित्यादि। "**तदि**"ति आत्मनि ज्ञानसुखाभेदरूपं वेदान्तमतमित्यर्थः। अतीव मन्दमिति वक्ष्यमाणदोषादिति शेषः। पुनरित्यवधारणार्थकमव्ययम्। 'स्युरेवन्तु पुनर्वैवेत्यवधारणवाचका' इति कोषात्।

मन्दत्वमुपपादयितुमाह "**सुखज्ञानयो**"रित्यादि। भ्रमात्मकप्रतीतिसिद्धस्यावस्तुभूतस्याधाराधेयभावस्याहं रूपवानित्यादाविवानुपपत्तेरदोषत्वादबाधितेति प्रतीतिविशेषणम्। न च सुखज्ञानयोरात्माभेदोपगमेऽपि तादात्म्यसम्बन्धेनाधाराधेयभावमादाय तदुपपत्तिः शक्यसाधनेति वाच्यम्, तादात्म्यसम्बन्धस्य वृत्त्यनियामकत्वेन तेन सम्बन्धेनाधाराधेयभावस्योपपादयितुमशक्यत्वात्।

अहं सुखमहं ज्ञानमित्यादीति प्रतीतेराकारप्रदर्शनम्। "**प्रतीत्यापत्तेश्चेति**"। तथाहि आत्मा यदि ज्ञानसुखाभिन्नः स्यात् तदा अहं सुखमहं ज्ञानमिति प्रतीतिमान् स्यात्, परन्तु नैवंविधा प्रतीतिः कस्यापीति भावः।

आत्मनो ज्ञानसुखाभेदोपगमेन श्रुतिघटक-विज्ञानानन्दपदयोर्धर्मपरत्वोपपत्त्या निरुक्तश्रुत्या नित्यसुखसिद्धौ प्रकृतमुक्तिलक्षणे दोषप्रसङ्गेनान्यथापि तयोर्धर्मिपरताया एव उपगन्तव्यतया नित्यसुखासिद्धिमाह "**अथे**"त्यादिना।

"**सुखस्वरूपे**"त्यादि। तथाहि द्वयोः प्रत्येकं किञ्चिद्वृत्त्यभेदप्रतियोगित्वग्रहे द्वयोः परस्परमभेदः सिध्यति, अत एव सुखे ज्ञाने च आत्मवृत्त्यभेदप्रतियोगित्वग्रहात् सुखज्ञानयोः परस्परमभेदसिद्धिः। तथाच प्रयोगः—सुखज्ञानोभयं परस्परमभिन्नम्, आत्मवृत्त्यभेदप्रतियोगित्वादिति।

नन्वेवं ज्ञानस्य सुखस्य च मिथो भेदाभावाज् ज्ञानसुखयोरभेदादित्यत्र ज्ञानसुखपदयोर्द्वन्द्वसमासो न सम्भवति पदार्थयोर्भेदे द्वन्द्वसमासविधानात्। तदुक्तमभियुक्तैः 'पदार्थानां प्रधानत्वे परस्परविभेदतः। एकदैकक्रियायोगाद् भवति द्वन्द्वसंज्ञकः।' इति चेन्न, पदार्थ-

1 A अखण्डज्ञानयोः (for सुखज्ञानयोः) 2 B C D omit अथ, 3 C reads ज्ञानसुखस्य.

**स्तीति संसारिणोऽपि नित्यानन्दसाक्षात्कारसत्त्वेन[1] मुक्तसंसारिणोरविशेष-प्रसङ्गात् त[2]द्धर्मिपरताया[3] आवश्यकत्वाच्च तादृशश्रुत्या नित्यसुखसिद्धिः[4] ।**

**नच 'आनन्दं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठित' मिति श्रुतिरेव तत्र मानमिति वाच्यम्; तादृशश्रुत्या नित्यत्वाबोधनात् । मैवम्; आनन्दमित्यादि-**

---

भेदवत् पदार्थतावच्छेदकभेदेनापि प्रमाणप्रमेयेत्यादिन्यायसूत्रे नीलघटयोरभेद इत्यादौ च द्वन्द्वसमासदर्शनादत्रापि ज्ञानत्वसुखत्वरूपपदार्थतावच्छेदकयोर्भेदेनैव द्वन्द्वस्य साधुत्वात् । अस्य विस्तरस्तु अनुमितिलक्षणस्य गदाधरकृतमणिदीधितिव्याख्यायां मिश्रोक्तद्वन्द्वदूषण-प्रकरणे समनुसन्धेयः ।

"**स्वप्रकाशतये**"ति । स्वात्मकज्ञानविषयतयेत्यर्थः । तथाहि ज्ञानस्य स्वप्रकाशता-वादिमते विषयग्राहकसामग्र्या एव विषयपुरस्कारेण ज्ञानग्राहकत्वम् । तेन ययैव ज्ञान-सामग्र्या ज्ञानं जन्यते, तयैव ज्ञानविषयकं ज्ञानमपि जन्यते । ज्ञानद्वयस्य यौगपद्याभावाच्च विषयज्ञानं विषयपुरस्कारेण ज्ञानविषयकज्ञानञ्चैकमेव समूहालम्बनात्मकं भवति । तदा-कारश्च—अयं घट इमं घटमहं जानामीत्येवंरूपः । तत्र मितिर्माता मेयश्चेति त्रीणि वस्तूनि विषयतामापद्यन्ते । अनुमित्यादिप्रत्यक्षविजातीयज्ञानस्थलेऽपि तथैवानुमित्यादि-ज्ञानस्यानुमित्यादिविषयकप्रत्यक्षात्मकताया उपगन्तव्यतया एकांशेऽनुमितित्वमपरांशे च प्रत्यक्षत्वमित्युभयोरेकत्र समावेशस्यानायत्या स्वीकार्यत्वेन तत्र ज्ञानस्य नरसिंहाकारता जातेरांशिकता च सुतरामभ्युपेया । "**तज्ज्ञानमे**"व—नित्यसुखाभिन्नं ज्ञानमेव । "**सुख-विषयकम्**"—नित्यसुखविषयकम्, तज्ज्ञानस्य तज्ज्ञानविषयकज्ञानात्मकत्वादिति भावः । "**तच्च**"—नित्यसुखविषयकं तज्ज्ञानञ्च । "**नित्यतये**"ति । नित्यसुखात्मकत्वेन सुखनित्यत्व-साधकयुक्त्या वा साधितया नित्यतयेत्यर्थः । "**संसारिणोऽपि**" संसारदशायां वर्तमान-स्यापि । **नित्यानन्दसाक्षात्कारसत्त्वेन** निरुक्तयुक्त्या नित्यसुखाभिव्यक्तिरूपमुक्तिसत्वेन । "**अविशेषप्रसङ्गा**"दिति । अनेन प्रकृतमुक्तिलक्षणस्यातिप्रसङ्गः, मुक्त्यर्थमायासनिवृत्ति-प्रसङ्गश्च सूच्येते ।

"**तद्धर्मिपरताया**"इति । तयोर्विज्ञानानन्दपदयोर्धर्मिबोधनेच्छयोच्चार्यमाणताया इत्यर्थः । अथवा, तयोर्विज्ञानानन्दयोर्यो धर्मी विज्ञानाश्रय आनन्दाश्रयश्च तत्परताया तद्बोधनेच्छया प्रयुक्तताया इत्यर्थः । "**आवश्यकत्वा**"दिति । तथाहि निरुक्तश्रुतिघटक-विज्ञानानन्दपदयोर्धर्मिपरत्वेनैव पूर्वोक्तदोषनिरासम्भवात् तदर्थमेव तत्पदयोर्धर्मिपरताया अपेक्षणादित्यर्थः । "**तादृशश्रुत्या**"—नित्यं विज्ञानमानन्दं ब्रह्मेति निरुक्तश्रुतिवाक्येनेति । "**न नित्यसुखसिद्धि**"रिति । तथाचाप्रसिद्धनित्यसुखघटितं प्रकृतमुक्तिलक्षणमसिद्धमिति भावः ।

1 B बोधकत्वेन (for सत्त्वेन) 2 C D तस्मात् (for तत्) 3 आनन्द-पदादर्शादित्वादचि कृते धर्मिपरत्वमावश्यकमेव, अन्यथाऽऽनन्दपदस्य पुलिंगत्वापत्तेरिति विभावनीयम् । 4 A नित्यत्वसिद्धिः

**श्रुतेरानन्दस्य मोक्षदशायां[1] सत्त्वं लभ्यते; तस्य चोत्पादविनाशकल्पने गौरवाल्लाघवसहकृतात् कुतश्चिदनु[2]मानात्तस्य नित्यत्वं सेत्स्यतीति ।**

**न[3] चानन्दमित्यादिश्रुतौ ब्रह्मपदमीश्वरपरम्; तथाच तादृशश्रुतिबलादीश्वरस्यैव नित्यसुखं सिध्यति, न जीवानामिति[4] वाच्यम्; ईश्वरस्य बन्धमोक्षयोरभावेन 'तच्च मोक्षे प्रतिष्ठित' मिति श्रुत्यर्थस्यानुपपत्त्या ब्रह्मपदस्येश्वरपरत्वाभावात् ।**

---

अथान्यथापि विधित्सितां नित्यसुखसिद्धिं निराकर्तुं प्रस्तौति "**न चानन्द**"मित्यादि । "**नित्यत्वाबोधना**"दिति—आनन्दस्येति शेषः । "**मैवमि**"त्यादिना प्रागुक्तं दोषं निषिध्य निरुक्तश्रुतिप्रतिपादितस्यानन्दस्य युक्त्या नित्यतामुपपादयति "**आनन्दमित्यादी**"त्यादिना । '**उत्पादविनाशे**'ति—उत्पादविनाशसामग्र्यादेरप्युपलक्षणम् । "**लाघवसहकृता**"दिति लाघवज्ञानसहकृतादित्यर्थः । "**कुतश्चिदनुमाना**"दिति । मोक्षदशायां जीवः सुखवान् तथात्वेन वेदबोधितत्वात् सुखस्य नित्यत्वे लाघवमित्येवमनुमानादित्यर्थः । निरुक्तस्थले सुखव्याप्यप्रकृतहेतुमत्ताज्ञानमेव दर्शितलाघवज्ञानानुगृहीतं सज् जीवो मोक्षदशायां नित्यसुखवानित्यनुमितिं जनयति, इतरबाधलाघवज्ञानादिसहकारेण व्यापकतानवच्छेदकप्रकारेणानुमितेस्तान्त्रिकत्वात् । तदेवं जीवस्य मुक्तिदशायां नित्यसुखसिद्ध्या प्रकृतमुक्तिलक्षणमनपवादमिति भावः ।

अथ निरुक्तश्रुतिघटकब्रह्मपदस्येश्वरपरतया प्रकृतानुमानस्थलीयहेतौ प्रसजन्तं बाधदोषं स्वरूपासिद्धिदोषञ्च निराकरोति "**नचे**"त्यादिना । "**ब्रह्मपदमीश्वरपर**"मिति—तथाच निरुक्तश्रुत्या ईश्वर एव मुक्तिदशायां सुखवत्त्वेन बोधितो न तु जीव इति भावः । एतेन सुखवत्त्वेन वेदबोधितत्वरूपहेतोर्जीवरूपप्रकृतपक्षावृत्तित्वादिरूपस्वरूपासिद्धिदोषः सूचितः । ईश्वरस्यैव इत्येवकारव्यवच्छेद्यं स्पष्टमाह "**न जीवाना**"मिति । एतेन प्रकृतानुमानहेतौ बाधदोषः समुट्टङ्कितः । यद्यप्येवशब्दस्येतरव्यवच्छेदार्थत्वादीश्वरेतरवस्तुमात्रस्यैव सामान्यतया व्यवच्छेदः प्रदर्शयितुं युक्तस्तथापि जीवानामेव नित्यसुखवत्त्वेन प्रस्तुतत्वाच्चेतनभिन्नेषु नित्यसुखवत्त्वस्याप्रसक्तत्वाच्च जीवानामेव चेतनानां व्यवच्छेदः प्रदर्शित इति ध्येयम् ।

"**ईश्वरस्ये**"त्यादि । तथाहि बन्धो नाम मिथ्याज्ञानमूलः, स चेश्वरे मिथ्याज्ञानरूपमूलाभावात् सुतरामसम्भवी । बन्धविरहाच्च नेश्वरस्य मोक्षोऽपि, बद्धो हि मुच्यते, तत् कुतस्तरां बन्धविरहितस्य मोक्षः ? अत एवाह "**ईश्वरस्य बन्धमोक्षयोरभावेने**"ति ।

निरुक्तश्रुतौ ब्रह्मपदस्य ईश्वरपरतामपोह्य जीवपरतामाश्रित्य तद्घटितं समग्रश्रुत्यर्थमाह "**आनन्द**"मित्यादिना । आनन्दमित्यत्र क्लीवलिङ्गं छान्दसम् । "**ब्रह्मणो जीवस्य**

1 A C मोक्षतादशायां 2 B omits लाघवसहकृतान् कुतश्चित् 3 A C D insert सुखनित्यत्वसिद्धिर्निष्प्रत्यूहैवेति before नच 4 A B नच जीवात्मनामिति ।

**तादृशश्रुतेरर्थस्तु[1], आनन्दं सुखम्, ब्रह्मणो जीवस्य[2], रूपं धर्मः, तच्च सुखञ्च[3], मोक्षे मोक्षदशायाम् प्रतिष्ठितं साक्षात्कारविषय इति ।**

**अथैतादृशसाक्षात्कारो नित्यो जन्यो वा ? नाद्यः, तथा सति संसारितादशायामपि तत्प्रसङ्गान्मुक्तसंसारिणोरविशेषापातात् । नान्त्यः, मुक्तस्य शरीरविरहेण ज्ञानोत्पादासम्भवात्, जन्यज्ञानं प्रति शरीरस्य हेतुत्वादिति चेन्न; शरीरजन्यतावच्छेदकमवच्छिन्नज्ञानत्वादिकम्[4], तथाच शरीरं विनापि निरवच्छिन्नज्ञानोत्पत्तौ बाधकाभावः ।**

---

**रूपं धर्म**" इति । एतेन पूर्वोक्तानुमाने बाधस्वरूपासिद्धिदोषौ निरस्तावित्यवधेयम् । "**मोक्षे**"—मोक्षदशायामिति सावधारणम्, तेन मोक्षदशायामेव तादृशानन्दस्य साक्षात्कारविषयत्वप्रतिपादनात् प्रकृतनित्यसुखाभिव्यक्तेरदोषमुक्तिलक्षणत्वमुपपादितमित्यवधेयम् ।

अथेदानीं श्रुत्युक्तप्रकृतसाक्षात्कारस्य नित्यत्वजन्यत्वविकल्पेन दूषणमुपन्यस्य जन्यत्वपक्षमाश्रित्य समाधत्ते "**अथे**"त्यादिना बाधकाभाव इत्यन्तसन्दर्भेण । "**एतादृशसाक्षात्कार**"इति । अधस्ताद्व्याख्यातश्रुतिप्रतिपादितो जीववृत्तिनित्यसुखस्य मोक्षकालीनः साक्षात्कार इत्यर्थः । "**नाद्य**"इति न नित्य इत्यर्थः । "**तथा सति**"-तादृशसाक्षात्कारस्य नित्यत्वे सति । "**संसारितादशायामपी**"त्यत्र न केवलं मुक्तिदशायामित्यपिशब्देन समुच्चीयते । "**तत्प्रसङ्गा**"त् । तादृशसाक्षात्कारसत्त्वप्रसङ्गात्, नित्यस्य त्रैकालिकत्वादिति भावः ।

"**अविशेषापाता**"दिति । नित्यसुखसाक्षात्कारस्यैव प्रकृतसिद्धान्ते मुक्तिस्वरूपत्वेनोपन्यासादिति भावः ।

"**नान्त्यः**" न जन्यः । "**मुक्तस्ये**"ति । परां मुक्तिमुपगतस्येत्यर्थः, अपरां मुक्तिं लब्धवतोऽपि प्रारब्धकर्मक्षयपर्यन्तं शरीरावस्थानस्यापेक्षितत्वात् तस्य तावदेव चिरं यावन्न विमोक्षः अथ सम्पत्स्यते कैवल्येने'त्यादिश्रुत्या तथैव सूत्रितत्वात् । "**जन्यज्ञानं प्रती**"ति—अवच्छेदकतासम्बन्धेनेति शेषः । "**शरीरस्य हेतुत्वा**"दिति तादात्म्यसम्बन्धेनेति शेषः । एवञ्च तादृशसाक्षात्कारस्य नित्यत्वं जन्यत्वञ्चेति कल्पद्वयस्यैव पर्याकुलतया तदुभयविलक्षणस्य चासिद्धतया प्रकृतमुक्तिलक्षणमनुपपन्नमिति भावः ।

ज्ञानत्वमात्रस्य नित्यज्ञानसाधारणत्वादतिरिक्तवृत्तिधर्मस्य चावच्छेदकत्वविरहाज् जन्यत्वं ज्ञानविशेषणमित्युपरिष्टात् स्वयमेव सूचयिष्यते । न च जन्यत्वस्य तादृशजन्यतावच्छेदकत्वे आत्माश्रयः, अवच्छेद्यज्ञानं प्रति अवच्छेदकज्ञानस्य कारणत्वादिति वाच्यम्; अवच्छेद्यावच्छेदकीभूतजन्यत्वयोः प्रकृतयोरेकस्य स्वरूपसम्बन्धविशेषरूपत्वमन्यस्य च प्रागभावप्रतियोगित्वरूपत्वमित्यादिरीत्या भेदात् । अथवा, अवच्छेद्यज्ञानं प्रति अवच्छेदकतापर्याप्त्यधिकरणधर्मज्ञानस्यैव कारणत्वाभ्युपगमेन यत्र यादृशरूपावच्छिन्न-

1 B omits तादृशश्रुतेरर्थस्तु 2 D omits जीवस्य 3 D आनन्दञ्च (for सुखञ्च)
4 C ० त्वावच्छिन्नज्ञानत्वं (for ० अवच्छिन्नज्ञानत्वादिकम्)

**न च अवच्छिन्नत्वस्य कार्यतावच्छेदकत्वे[1] गौरवमिति वाच्यम्; भवतामीश्वरज्ञानव्यावृत्तये जन्यत्वस्य निवेशनीयतया साम्यात्। वस्तुतो ज्ञानत्वमेव कार्यतावच्छेदकम्, कार्यतावच्छेदकप्रत्यासत्तिरवच्छेदकता, नित्यसुखसाक्षात्कारश्चावच्छेदकतासम्बन्धेन न कुत्राप्युत्पद्यते; अतस्तदुत्पत्तौ शरीरविरहोऽकिञ्चित्करः[2]।**

---

मवच्छेद्यं तत्र तादृशरूपेणावच्छेदकत्वे सत्येव ज्ञप्तिमूलकात्माश्रयस्य सम्भवात्। प्रकृते तु अवच्छेद्यभूतं जन्यत्वं जन्यज्ञानत्वावच्छिन्नम् अवच्छेदकीभूतं जन्यत्वन्तु न तादृशमतोऽवच्छेद्यावच्छेदकयोरेकरूपावच्छिन्नत्वविरहान्नात्माश्रय इति सूक्ष्ममीक्षणीयम्। तथा तथा सूक्ष्मेक्षिकयैव क्षितिः सकर्तृका कार्यत्वादित्यादिपरमेश्वरानुमाने कर्त्रजन्यत्वसाधकेन शरीराजन्यत्वहेतुना सत्प्रतिपक्षदोषमाशङ्क्य अप्रयोजकतया तन्निरासेन स्वपक्षे प्रयोजकप्रदर्शनाय 'मम तु कर्तृत्वेन कार्यत्वेन कार्यकारणभाव एवानुकूलतर्क' इत्याद्यभियुक्तोक्तिः सुसङ्गच्छते।

प्रकृतनित्यसुखसाक्षात्कारसाधारणजन्यज्ञानत्वस्य शरीरजन्यतावच्छेदकत्वकल्पनेन समापतितं दोषं निराकर्तुमाह "**शरीरजन्यतावच्छेदक**"मित्यादि। **अवच्छिन्नज्ञानत्वादिक**मित्यादिपदेन दैशिकाव्याप्यवृत्तित्वादिपरिग्रहः। मुक्तिकालीननित्यसुखसाक्षात्कारस्यापि कालिकाव्याप्यवृत्तित्वसत्त्वेन तं प्रत्यपि शरीरस्यापेक्षणीयत्वापातेन तद्व्यावर्तनाय दैशिकेत्यव्याप्यवृत्तित्वविशेषणम्। तथाचावच्छेदकतासम्बन्धेनावच्छिन्नज्ञानं प्रति तादात्म्येन शरीरं कारणं, न तु अनवच्छिन्नज्ञानं प्रतीति भावः। अत्रेदमधेयम्;—ज्ञानं द्विविधं अवच्छिन्नज्ञानम्, अनवच्छिन्नज्ञानञ्चेति। अवच्छिन्नज्ञानं किञ्चिद्देशावच्छेदेन जायमानं ज्ञानम्, तच्च संसारितादशायां संसार्यात्मनि समुत्पद्यमानं ज्ञानमेव, तस्य तदा शरीरावच्छेदेनैवोत्पद्यमानत्वात्। अनवच्छिन्नज्ञानमपि द्विविधं नित्यं जन्यञ्च। नित्यमनवच्छिन्नज्ञानमीश्वरमभ्युपगच्छतां परमेश्वरवृत्तिज्ञानं तस्य व्याप्यवृत्तित्वेन किञ्चिद्देशानवच्छिन्नत्वात्। जन्यमनवच्छिन्नज्ञानञ्च मुक्तिदशायां नित्यसुखसाक्षात्कारमभ्युपगच्छतां तादृशसाक्षात्काररूपज्ञानं, तदा जीवस्य शरीरविरहेण तस्य तत्र शरीरावच्छेदेनोत्पत्तेरसम्भवात् शरीरतदवयवव्यतिरिक्ते ज्ञानावच्छेदकताया युक्तिप्रमाणादिप्रतिकूलत्वात्। तत्रावच्छिन्नज्ञाने शरीरघटिता तत्त्वज्ञानाघटिता सामग्री प्रयोजिका। नित्यमनवच्छिन्नज्ञानं प्रति तु न कारणापेक्षा तस्य नित्यत्वात्। जन्यं मुक्तिकालीनमनवच्छिन्नज्ञानं प्रति च शरीराघटिता तत्त्वज्ञानघटिता सामग्री प्रयोजिका। ईश्वरमनभ्युपगच्छतां मीमांसकानां नये तु अनवच्छिन्नज्ञानमेकं जन्यमेव। अत एव मुक्तिदशायां शरीरविरहेऽपि शरीराघटिततत्त्वज्ञानघटितसामग्र्या अक्षतत्वेन श्रुतिप्रमाणावेदिततादृशनित्यसुखसाक्षात्कारस्य नानुपपत्तिरिति।

अवच्छिन्नत्वस्य गौरवदोषेण शरीरजन्यतावच्छेदकत्वप्रत्याख्यानं प्रतिषेद्धुं प्रस्तौति "न

1 C D read कार्यतावच्छेदककोटिप्रवेशे

2 C reads अतः शरीरविरहेऽपि तदुत्पत्तौ बाधकविरहः

**चे**"त्यादि । **अवच्छिन्नत्वस्येति** । ज्ञानत्ववदवच्छिन्नत्वस्यापीत्यर्थः । "**कार्यतावच्छेदकत्वे**"-शरीरजन्यतावच्छेदकत्वे । "**गौरवमि**"ति केवलज्ञानत्वापेक्षयेति शेषः । "**भवतामि**"ति । ईश्वरमभ्युपगच्छतां नैयायिकानामित्यर्थः । "**ईश्वरज्ञानव्यावृत्तय**"इति । अन्यथा ज्ञानत्वमात्रस्य तन्मतसिद्धनित्येश्वरज्ञानसाधारणतया तस्य शरीरजन्यतातिरिक्तवृत्तित्वेन शरीरजन्यताया अवच्छेदकत्वस्य सुतरामभ्युपगन्तुमशक्यत्वादिति भावः ।

"**जन्यत्वस्ये**"ति शरीरजन्यतावच्छेदकतयेति शेषः ।

ननु जन्यत्वस्य ज्ञानांशे शरीरजन्यतावच्छेदकतया प्रवेशेऽपि घटभूतलसंयोगादौ व्यभिचारवारणाय ज्ञानत्वस्यापि प्रवेशनीयतया तस्य कथमवच्छेदकत्वं संगच्छते तस्य तावतापि तादृशजन्यतातिरिक्तवृत्तित्वस्यानपायादनतिरिक्तवृत्तिधर्मस्यैवावच्छेदकत्वादिति चेन्न, ज्ञानांशे तादृशजन्यतावच्छेदकतया जन्यत्वज्ञानत्वयोरुभयोः प्रवेशेन एकधर्मिपरतन्त्रतया ज्ञानत्वे जन्यत्ववैशिष्ट्यस्य सामानाधिकरण्येन भानाद् विशिष्टज्ञानत्वस्य प्रकृतजन्यतानतिरिक्तवृत्तित्वेन तस्यैव प्रकृते अवच्छेदकत्वात् । अथवा, स्वानतिरिक्तवृत्तिधर्मस्यावच्छेदकत्वमित्यस्य प्रायः सर्वत्र स्वनिरूपितावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकधर्मे स्वाभाववन्निष्ठकिञ्चिद्भेदीयप्रतियोगितावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकत्वाभावे तात्पर्यम् । अथवा, स्वनिरूपितावच्छेदकतायाः स्वविशिष्टान्यत्वे तात्पर्यम् । वैशिष्ट्यञ्च स्वाभाववन्निष्ठकिञ्चिद्भेदीयप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिताकपर्याप्तिकत्वसम्बन्धेन । क्वचित्त्वन्यथा ।

"**साम्या**"दिति तुल्यत्वादित्यर्थः । ननु जन्यत्वस्यान्यथासिद्ध्यनिरूपकत्वादिघटितत्वेनातिगुरुशरीरतया तन्निवेशे स्वरूपसम्बन्धात्मकस्यावच्छेदकतानिरूपकत्वरूपस्य वा अवच्छिन्नत्वस्य निवेशापेक्षया महागौरवस्यैव लब्धपदत्वेन तस्यैव प्रदर्शयितुमुचितत्वात् साम्योक्तिरसङ्गतेति चेन्न, जन्यत्वस्य स्वरूपसम्बन्धविशेषरूपत्वमतमाश्रित्य तथा कथनात् । गौरवग्रस्तत्वमात्रमुपादाय साम्यस्याप्यबाधितत्वादिति ।

कथञ्चित् प्रतिपक्षपर्यनुयोगपरिहारेऽपि प्रकृते गौरवदोषादपरितोषेण लाघवमभिप्रेत्याह "**वस्तुत**" इत्यादि । "**ज्ञानत्वमे**"वेति केवलं ज्ञानत्वमेव, ननु अवच्छिन्नत्वमपीत्यर्थः । "**प्रत्यासत्तिः**" सम्बन्धः । "**अवच्छेदकते**"ति दैशिकावच्छेदकतेत्यर्थः । अन्यथा कालिकावच्छेदकतामादाय व्यभिचारापत्तेः । अवच्छेदकतासम्बन्धेन ज्ञानत्वावच्छिन्नं प्रति तादात्म्यसम्बन्धेन शरीरं कारणमिति भावः । तादृशकार्यकारणभावकल्पनयैव प्रकृतनित्यसुखसाक्षात्कारे शरीरापेक्षां प्रतिषेधति "**नित्यसुखे**"त्यादिना । "**अवच्छेदकतासम्बन्धेनेति**" दैशिकावच्छेदकतासम्बन्धेनेत्यर्थः । अन्यथा कालिकावच्छेदकतामादाय प्रकृतवाक्यार्थबाधापत्तेः, प्रागुक्तव्यभिचारप्रसङ्गेन प्रकृतकार्यकारणभावकल्पनाया अनुपपत्तेश्च। नित्यसुखसाक्षात्कारस्य कालिकावच्छेदकतासम्बन्धेन काले समुत्पत्तेः शरीरस्य तादात्म्येन तत्रावर्तमानत्वात् । "**तदुत्पत्तौ**" नित्यसुखसाक्षात्कारोत्पत्तौ । "**अकिञ्चित्कर**" इति न व्यभिचारापादक इत्यर्थः । शरीरस्य निरवच्छिन्ननित्यसुखसाक्षात्कारं प्रत्यकारणत्वादिति भावः । तदेवं नित्यसुखसाक्षात्कारस्य जन्यत्वकल्पे दोषाभावेन तस्य नित्यत्वजन्यत्वविकल्पासहत्वदोषो निरस्त इति हृदयम् ।

**अथ संसारितादशायामपि मनः[1]संयुक्तसमवायादिघटितसामग्रीबलान्नित्यसुखसाक्षात्कारप्रसङ्गः[2] स्यात् । न च तद्धेतुभूततत्त्वज्ञानविरहान्नापत्तिरिति वाच्यम्; तत्त्वज्ञानं विनापि तादृशसामग्र्या जन्यसुखे विषयतया साक्षात्कारजननात् तादृशसामग्र्या नित्येऽपि सुखे सत्त्वेन तत्र विषयतया साक्षात्कारापत्तेर्वारयितुमशक्यत्वात् ।**

**मैवम्; नित्यसुखान्यवृत्तिविषयतया प्रत्यक्षं प्रति नित्यसुखभेदत्वेन हेतुता कल्प्यते । तथा च मनः[3]संयुक्तसमवायघटितसामग्र्या[4] नित्यसुखभेदं निवेश्य एका व्याप्तिरुपेयते । अपरा च तत्त्वज्ञानं निवेश्य । तत्र प्रथमव्याप्तिबलात् संसारितादशायां नित्यसुखे विषयतया न प्रत्यक्षापत्तिः[5], तत्र तद्भेदासत्त्वेन तद्घटितसामग्रीविरहात् । नापि द्वितीयव्याप्तिबलात् तत्त्वज्ञानविरहेण[6] तद्घटितसामग्रीविरहादिति नानुपपत्तिलेशोऽपि[7] ।**

---

अथ कारणान्तरेण संसारिणोऽपि नित्यसुखसाक्षात्कारमापाद्य निरुक्तमुक्तिलक्षणस्यातिप्रसङ्गमाशङ्कते **"अथे"**त्यादिना । **"मनःसंयुक्तसमवाया"**दीत्यादिपदेन विषयतासम्बन्धेनात्मवृत्तिविशेषगुणसुखादिप्रत्यक्षे कारणत्वेन क्लृप्तानां मनोविषयादीनामुपग्रहः । **"तद्धेतुभूते"**ति । नित्यसुखसाक्षात्कारकारणीभूतेत्यर्थः । नित्यसुखसाक्षात्कारस्यानवच्छिन्नज्ञानतया तत्र तत्त्वज्ञानघटितसामग्र्या एव प्रयोजकत्वोपगमात् । **"नापत्ति"**रिति । न निरुक्तनित्यसुखसाक्षात्कारप्रसङ्ग इत्यर्थः । **"तादृशसामग्र्या"** । मनःसंयुक्तसमवायादिघटितसामग्र्या । **"जन्यसुखे"** संसारकालीन इति शेषः । **"तत्र"**-नित्यसुखे । तथाच मुक्तसंसारिणोरविशेषापातात्लक्षणमतिप्रसक्तमिति भावः ।

निरुक्तलक्षणातिप्रसङ्गसाधकं संसारितादशायामाशङ्कितं नित्यसुखसाक्षात्कारप्रसङ्गं सोपपत्तिकं प्रतिषेधति **"मैवमि"**त्यादिना । **"विषयतये"**ति तादृशविषयतासम्बन्धेनेत्यर्थः । **"नित्यसुखभेदत्वेन हेतुते"**ति । एवञ्च तत्र नित्यसुखभेदघटिता सामग्री प्रयोजिका । **"तथाचे"**ति । तादृशहेतुताकल्पनेन चेत्यर्थः । **"मनःसंयुक्ते"**त्यादि । अत्रायं भावः,—नित्यसुखविषयकप्रत्यक्षे नित्यसुखान्यविषयकप्रत्यक्षे च तुल्यमेव मनःसंयुक्तसमवायः कारणम्, विशेषकारणन्तु नित्यसुखविषयकप्रत्यक्षे तत्त्वज्ञानं, नित्यसुखान्यविषयकप्रत्यक्षे च नित्यसुखभेदः । एवञ्च मनःसंयुक्तसमवायघटिता प्रत्यक्षसामग्री द्वेधा व्यवतिष्ठते, एका नित्यसुखभेदघटिता तत्त्वज्ञानाघटिता, सा नित्यसुखान्यविषयकप्रत्यक्षप्रयोजिका । अन्या च

1 B ० दशायामात्ममनः 2 B D समवायप्रत्यासत्त्या नित्यसुखसाक्षात्कारप्रसंग इति भावः 3 C omits मनः 4 D तादृशसामग्र्यां. 5 A नित्यसुखविषयकसाक्षात्कारापत्तिः 6 D तत्त्वज्ञानरूपसहकारिविरहात् (for तत्त्वज्ञानविरहेण) 7 B omits तद्घटितसामग्रीविरहादिति नानुपपत्तिलेशोऽपि.

**अथ शरीरं विना[1] तेषां ज्ञानाभ्युपगमे भवदनभि[2]मतेश्वर सिद्धिर्निष्प्रत्यूहैवेति, अशरीरस्य न ज्ञानादिमत्त्व[3]मिति बाधकस्यानवकाशादिति चेन्न, तादृशबाधकविरहेऽपि साधकाभावरूपबाधकान्त[4]रस्य जागरूकत्वात् ।**

---

नित्यसुखभेदाघटिता तत्त्वज्ञानघटिता । सेयं नित्यसुखविषयकप्रत्यक्षप्रयोजिकेति । एतदेव सूचितं **तथाचे**त्यादिसन्दर्भेण । "**नित्यसुखभेदं निवेश्य एका व्याप्तिरि**"ति । तथाहि यत्र यदा नित्यसुखान्यवृत्तिविषयतया प्रत्यक्षं तत्र तदव्यवहितप्राक्क्षणे नित्यसुखभेद-मनःसंयुक्तसमवायघटिता सामग्री इत्येवंरूपैका व्याप्तिरित्यर्थः । एषा प्रथमव्याप्तित्वेनोपगृहीता । "**अपरा च तत्त्वज्ञानं निवेश्ये**"ति । तथाहि यत्र यदा नित्यसुखवृत्तिविषयतया प्रत्यक्षं तत्र तदव्यवहितप्राक्क्षणे तत्त्वज्ञान-मनःसंयुक्तसमवायघटिता सामग्रीत्येवंरूपा तदन्या व्याप्तिः । इयं द्वितीयव्याप्तित्वेनोपात्ता । तत्र एकैकविधसामग्री एकैकविधप्रत्यक्षव्यापिका, अतो मनःसंयुक्तसमवायेन प्रत्यक्षजनने तदन्यतरसामग्र्यास्तदव्यवहितपूर्वं सत्त्वस्यावश्यकत्वेन संसारितादशायां तादृशतादृशप्रत्यक्षव्यापकीभूतसामग्र्यभावेन व्याप्यभूततादृशतादृशप्रत्यक्षाभावस्य सिद्धतया संसारितादशायां मनःसंयुक्तसमवायादिघटितसामग्रीबलान्नित्यसुखविषयकसाक्षात्कारापत्तिः प्रतिषिद्धा । तदेव समासतः प्रतिपादितं ग्रन्थकृता "**तत्र प्रथमव्याप्तिबला**"**दित्यादिना** ।

"**तत्रे**"ति निर्धारणे सप्तमी । "**प्रथमव्याप्तिबलात्**"—नित्यसुखभेद-मनःसंयुक्तसमवायघटितसामग्र्याः प्रथमोक्तव्याप्तिबलात् । "**तत्र**"-नित्यसुखे । "**तद्भेदासत्त्वेन**"—नित्यसुखभेदासत्त्वेन । "**तद्घटितसामग्रीविरहात्**" नित्यसुखभेदघटितसामग्रीविरहात्, व्यापकाभावेन व्याप्याभावसिद्धेस्तन्त्रानुमतत्वात् ।

"**द्वितीयव्याप्तिबलात्**" तत्त्वज्ञानघटिताया मनःसंयुक्तसमवायादिघटितसामग्र्याः पूर्वोक्तव्याप्तिबलात् । "**तत्त्वज्ञानविरहेणे**"त्यत्र संसारितादशायामिति प्रागुक्तमनुषज्यते । "**तद्घटितसामग्रीविरहात्**" तत्त्वज्ञानघटितसामग्रीविरहात् । एवञ्च मनःसंयुक्तसमवायादिघटितयोः प्रागुक्तसामग्र्योः संसारितादशायां नित्यसुखे प्रत्येकमभावसत्त्वेन न नित्यसुखसाक्षात्कारस्तदेति भावः ।

शरीरं विना ज्ञानस्वीकारे मीमांसकसिद्धान्तव्याहतिमुपन्यस्य मीमांसकनयेन तामुद्धरति "**अथे**"त्यादिना । "**तेषा**"मिति मुक्तात्मनामित्यर्थः । "**भवदनभिमते**"ति । मीमांसकानभिमतेत्यर्थः । **तदुक्तमुदयनाचार्येण** किरणावल्याम्,—'तौतातितास्तु अकार्यमपीश्वरज्ञानं शरीरमन्तरेणानिच्छन्तः कार्यमेव सुखज्ञानमपवर्गे अस्तीति वदन्तस्त्रपा विरोधो भयमिति त्रयमपि त्यक्तवन्तश्चे'ति । तत्रैव प्रकाशव्याख्यायाम्,—'शरीरं विनापि ज्ञानसत्त्वेन अनभिमतेश्वरसिद्धिप्रसक्त्या भय' मिति भयहेतुविवरणमपि तमेवार्थमनुवदति ।

1 B C D read विनापि 2 B C ०दभिमत. 3 C D read ज्ञानादिकमनुपपन्नमित्येतादृश (for न ज्ञानादिमत्त्वमिति) 4 A omits अन्तर

"**अशरीरस्ये**"त्यादि। तथाहि यद्यदशरीरं तन्न ज्ञानादिमदिति व्याप्त्या अशरीरत्वेन हेतुना अशरीरे परमेश्वरत्वाभिमते ज्ञानाद्यभावस्य सिद्धेः सर्वज्ञत्वेन ईश्वरसिद्धिर्दुर्घटा, किन्तु अशरीरस्यापि ज्ञानवत्त्वोपगमे अशरीरत्वस्य ज्ञानाद्यभावव्यभिचारित्वेन तेन हेतुना दर्शितरीत्या ज्ञानाद्यभावसाधनासम्भवेन सर्वज्ञत्वेन नित्यज्ञानवत्त्वादिना वा परमेश्वरस्याशरीरस्यापि सिद्धिरबाधिता स्यादिति भावः। "**तादृशबाधकविरहेऽपि**"। अशरीरस्य न ज्ञानादिमत्त्वमिति बाधकविरहेऽपि। "**साधकाभावे**"त्यादि। तथाहि मीमांसकप्रस्थाने सतो भावस्य ग्राहकाणि प्रत्यक्षानुमानोपमानशब्दार्थापत्तिसमाख्यानि पञ्च प्रमाणानि अभावग्राहकञ्चानुपलब्धिप्रमाणमिति षट्प्रमाणान्यङ्गीक्रियन्ते। यत्र पूर्वोक्तप्रमाणपञ्चकमर्थं न साधयति तत्रैवानुपलब्धिप्रमाणप्रवृत्तेरभावप्रमाणमिति पर्यायान्तरमस्य। तत्र साधकानां पञ्चानां प्रमाणानामभाव एव साधकाभावः।

स चायमभावग्राहकतया बाधक इति। साधकविरहेऽपि वस्तुनः सत्त्वाभ्युपगमे शशविषाणादीनामपि प्राप्तः सत्त्वप्रसङ्गः। तथाचाह—तौताततिमीमांसकनये ईश्वरस्य साधकाभावमधिकृत्य सर्वदर्शनसंग्रहार्हतप्रकरणे **माधवाचार्यः**,—'ननु नहि कश्चित् पुरुषविशेषः सर्वज्ञपदवेदनीयः प्रमाणपद्धतिमध्यास्ते, सद्भावग्राहकस्य प्रमाणपञ्चकस्य तत्रानुपलम्भात्। तथाचोक्तं **तौतातितैः**,—

सर्वज्ञो दृश्यते तावन्नेदानीमस्मदादिभिः।
दृष्टो न चैकदेशोऽस्ति लिङ्गं वा योऽनुमापयेत्।
न चागमविधिः कश्चिन्नित्यसर्वज्ञबोधकः।
न च तत्रार्थवादानां तात्पर्यमपि कल्प्यते।
सर्वज्ञसदृशं कञ्चिद् यदि पश्येम सम्प्रति।
उपमानेन सर्वज्ञं जानीयाम ततो वयम्। इत्यादि

तदेवं प्रमाणपञ्चकाभावरूपबाधकेन ईश्वराभावसिद्ध्या न मीमांसकसिद्धान्तव्याहतिरिति भावः।

न च क्षितिः सकर्तृका कार्यत्वादित्याद्यनुमानमेव तत्साधकमस्ति तत् कुतः साधकाभाव इति वाच्यम्, कर्त्रजन्यत्वसाधकेन शरीराजन्यत्वेन हेतुना प्रकृतस्थलीयकार्यत्वहेतोः सत्प्रतिपक्षितत्वेन निरुक्तानुमानस्यासाधकत्वात्। यदि च व्यभिचारशङ्कानिवर्तकतर्काभावेन शरीराजन्यत्वहेतोरप्रयोजकत्वान्नोक्तस्थले सत्प्रतिपक्षदोषस्तथापि कार्यत्वस्य हेतोरसिद्धत्वान्न तद्धेतुकानुमानस्य तत्साधकत्वम्। अत एवार्हतदर्शनप्रकरणे **माधवाचार्यः**, —'नन्वनादेः क्षित्यादिकार्यपरम्परायाः कर्तृत्वेन तत्सिद्धिः। तथाहि क्षित्यादिकं सकर्तृकं कार्यत्वाद् घटवदिति तदप्यसमीचीनं कार्यत्वस्यैवासिद्धे' रिति प्राह। सावयवत्वहेतोः कार्यत्वसाधकत्वमपि विविधविकल्पासहत्वदोषेण निराकृतं तेन तत्रैव। श्लोकवार्त्तिके **कुमारिलभट्टेनापि** 'सामर्थ्यं नानुमानादेर्लिङ्गादिविरहिते क्वचित्'। 'सर्वज्ञो दृश्यते तावन्नेदानीमस्मदादिभिः।' इत्यादिवचनैरीश्वरे सर्वज्ञे साधकाभावस्य समर्थनं कृतमिति ध्येयम्।

**अथ 'अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशतः'। इति श्रुत्या मुक्तस्य सुखदुःखसम्बन्धा[1]भावः प्रत्याय्यते। तत् कथमुपपद्यतां नित्यसुखाभिव्यक्ते-र्मुक्ति-त्वमते ? न च तादृशश्रुत्या सुख-दुःखोभयाभाव एव प्रत्याय्यते, स च सुखसत्त्वेऽपि दुःखासत्त्वादेवाक्षत इति वाच्यम्; उभयाभावपरत्वे सुखोपादानवैयर्थ्यापत्तेः, सर्व[2]मुक्तात्मनां सुखसत्त्वेन दुःखाभावप्रयुक्तस्यैवोभयाभावस्य[3] सत्त्वात्**

---

नित्यसुखाभिव्यक्तेर्मुक्तित्वमते प्रसक्ता'मशरीरं वाव सन्त'मित्यादिश्रुत्यर्थानुपपत्तिं निराचिकीर्षुराशङ्कामुपन्यस्यति "**अथे**"त्यादिना। "**मुक्तस्ये**"त्यादि फलकथनमिदम्। प्रकृतश्रुतिवाक्यार्थबोधस्तु न तथा।

तथाहि स्पृश्धातोरर्थोऽनुयोगित्वावच्छिन्नः सम्बन्धः, आख्यातार्थः प्रतियोगित्वं, तत्र निरूपितत्वसम्बन्धेन धात्वर्थस्य सम्बन्धस्यान्वयः, तस्य चाख्यातार्थप्रतियोगित्वस्यानुयोगितया नञर्थाभावेऽन्वयः, नञर्थाभावस्य स्वरूपेण प्रियाप्रिययोरन्वयः। "**अशरीर**"मिति द्वितीयार्थः कर्मत्वं, तच्चानुयोगितारूपम्। प्रकृतधात्वर्थतावच्छेदकीभूतानुयोगितावत्त्वेनाशरीरस्य कर्मत्वात् तदुपपत्तिः। एवञ्चाशरीरानुयोगिकसम्बन्धप्रतियोगित्वाभाववती प्रियाप्रिये इति समग्रवाक्यार्थबोधः। मुक्तात्मनि सुख-दुःखसम्बन्धाभावमन्तरेण सुखदुःखयोस्तादृशप्रतियोगित्वाभावासम्भवादाक्षेपतस्तादृशसम्बन्धाभावप्रतीतिः।

अथवा मुक्तस्येति षष्ठ्यर्थोऽनुयोगित्वम्, तस्य सम्बन्धरूपार्थेऽन्वयः, सम्बन्धपदं सम्बन्धप्रतियोगित्वपरम्, समासघटकीभूतसुखदुःखपदार्थः सम्बन्धाभावपदार्थे सम्बन्धप्रतियोगित्वाभावेऽन्वेति, तेन सुखदुःखसम्बन्धी मुक्तानुयोगिकसम्बन्धप्रतियोगित्वाभावः प्रत्याय्यत इति मुक्तस्येत्यादिवाक्यार्थस्य पर्यवसितत्वात् प्रकृतग्रन्थसङ्गतिः। अस्माकन्तु सुखदुःखेत्यत्र समाहारद्वन्द्वनिष्पन्नं सप्तम्यन्तं सुखदुःखे इति पदं समीचीनं भाति। तथा च तत्र सप्तम्या विशेष्यत्वार्थकत्वेन सुखदुःखपदार्थविशेष्यकमुक्तानुयोगिकसम्बन्धप्रतियोगित्वाभावप्रकारकबोध एव मुक्तस्येत्यादिनोक्तः। भट्टमते स सर्व एव कल्पोऽनुपपन्नः, प्रतियोगिमति व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिकाभावासिद्ध्यादिदोषादिति।

निरुक्तश्रुत्यर्थासङ्गतिं निराकर्तुमाह "**नचे**"त्यादि। **सुखदुःखोभयाभाव एवेति,** न तु प्रत्येकाभाव इत्यर्थः, निरुक्तश्रुतेः प्रत्येकाभावपरत्वे वाक्यभेदप्रसङ्गात् 'सम्भवत्येकवाक्यत्वे वाक्यभेदो हि नेष्यते' इत्यस्य तन्त्रसिद्धत्वात्। "**स चे**"ति सुखदुःखोभयाभाव इत्यर्थः। "**दुःखासत्त्वादेवे**"ति। न च निरुक्तोभयाभावः सुखाभावाद् दुःखाभावाद्वेत्यत्र विनिगमनाविरह इति वाच्यम्, 'दुःखेनात्यन्तं विमुक्तश्चरती' त्यादिश्रुतेरेव दुःखाभावविनिगमकत्वात्। "**वैयर्थ्यापत्ते**"रिति निष्प्रयोजनकत्वापत्तेरित्यर्थः। व्यावर्तनीयाभावादिति भावः। अन्यथा अखण्डाभावघटकतया सार्थक्यात्। वैयर्थ्यमेवोपपादयति "**सर्वमुक्तात्मना**"मित्यादिना।

---

1 B C read **सुखदुःखाभावः** 2 B C read **सर्वत्र** 3 D ०**प्रयुक्तस्यैवाभावस्य**

**तदभाव[1]कथनमात्रस्यैवोचितत्वादिति चेन्न, स्पृश्धातोरुत्पत्त्यर्थकत्वात् सुख-दुःखोत्पत्त्यभावस्यैव प्रतीतेर्नित्यसुखसत्त्वेऽपि सुखोत्पत्त्यभावसत्त्वेनानुपपत्त्य-भावात्। न चैवं लक्षणाप्रसङ्ग इति वाच्यम्[2]; स्पृशेः सम्बन्धार्थकत्वेऽपि लक्षणाया आवश्यकत्वात्,—स्पार्शन[3]साक्षात्कार एव तस्य शक्तेः।**

**अत्रेदं चिन्तनीयम्,—आनन्दं ब्रह्मणो रूपमित्यत्रानन्दपदस्य धर्मपरत्वे [4]नपुंसकलिङ्गता नोपपद्यते। सुखवाचिनस्तस्य पुंलिङ्गत्वात्[5]। न च श्रुतौ लिङ्गस्य त्यागः; वक्ष्यमाणरीत्या विनैव लिङ्गत्यागमुपपत्तौ तत्कल्पनाया अनुचितत्वात्। तस्मान्मत्वर्थीयप्रत्ययान्ततया आनन्दपदमानन्दाश्रयपरम्, रूपपदञ्च स्वरूपपरम्, मोक्ष इति निमित्तसप्तम्यन्तम्[6]। तथाचानन्दाश्रयो**

---

सर्वमुक्तात्मनां सुखसत्त्वेनेति प्रकृतमीमांसकसिद्धान्त इति शेषः। "**तदभावकथने**"ति दुःखाभावकथनेत्यर्थः।

"**वैयर्थ्यापत्तेरित्युपलक्षणम्,**" तेन निरुक्तश्रुतेरुभयाभावपरत्वे सुखदुःखोभयाभाव-स्यैकत्वेन श्रुतिघटकाख्यातार्थद्वित्वस्य तत्रान्वयायोगादित्यपि द्रष्टव्यम्।

न च **नवमुक्तिवादे** गदाधरप्रदर्शितदिशा स्पृश्धातुरत्र सत्तार्थकः, तथाच घटपटौ न स्त इत्यत्र यथा घटपटोभयाभावेऽस्तित्वं प्रतीयते, तथा प्रकृतेऽपि सुखदुःखोभयाभावेऽस्तित्वं प्रतीयत इति वाच्यम्; तथा सति धातोरकर्मकतया अशरीरमित्यत्र द्वितीयानुपपत्तेरनुयोगिनि सप्तमीं विना प्रातिपदिकार्थाभावप्रत्याय-नायोगाच्चेति तेनैव समाहितत्वात्। तावतापि वैयर्थ्यापत्तिदोषस्याशक्यनिरासत्वात्। "**उत्पत्त्यर्थकत्वा**"दित्यादि। उत्पत्तिरत्र न आद्यक्षणानुयोगिकसम्बन्धः किन्तु आद्यक्षणाव-च्छिन्नसम्बन्धः, तेन जनिप्रभृतिवन्नात्र स्पृशेरकर्मकता। तदुक्तं "**भट्टाचार्येण**" 'न च धातो-रुत्पत्तिरूपसम्बन्धार्थकत्वे जन्यादिवदकर्मकता स्यादिति वाच्यम्; आद्यक्षणानुयोगिक-सम्बन्धार्थकतया जनिप्रभृतीनामकर्मकत्वात्। अत्राद्यक्षणावच्छिन्नसम्बन्धस्य धात्वर्थतया तदनुयोगितया आत्मनः कर्मतासम्भवा' दिति। एवञ्च उत्पत्तिरूपसम्बन्धो धात्वर्थः, आख्यातार्थः प्रतियोगित्वमित्यादिरीत्या कल्पेऽस्मिन्नशरीरमुक्तात्मानुयोगिकाद्यक्षणावच्छिन्न-सम्बन्धात्मकोत्पत्तिप्रतियोगित्वाभाववती प्रियाप्रिये इति प्रकृतबोधः। "**सुखदुःखोत्पत्त्य-भावस्यैव प्रतीते**"रिति मूलार्थोपपत्तिश्च पूर्वोक्तरीत्या कर्तव्या। "**सम्बन्धार्थकत्वेऽपि**" पूर्वोक्तसमवायरूपसम्बन्धार्थकत्वेऽपि। "**लक्षणाया आवश्यकत्वा**"दिति। तथाच उभयत्रैव लक्षणागौरवस्य तुल्यतया 'यत्रोभयोः समो दोष' इत्याद्यभियुक्तोक्त्यनुसारेण नात्र पर्यनुयोगावसर इति भावः।

---

1 B दुःखाभाव (for तदभाव) 2 A C D omit वाच्यम् 3 B स्पार्शनरूप
4 D inserts आनन्दपदस्य—before नपुंसक 5 C नपुंसकत्वाभावात् (for पुंलिङ्गत्वात्)
6 D inserts प्रतिष्ठितं साक्षात्कारविषयः (after निमित्तसप्तम्यन्तम्)

**ब्रह्मणः स्वरूपं मोक्षनिमित्तीभूतसाक्षात्कारविषय इत्यानन्दमित्यादिश्रुतेरर्थः। एवञ्च तादृशश्रुतेर्नित्यसुखासाधकतया नित्यसुखमप्रामाणिकमेवेति कथं नित्यसुखाभिव्यक्तिर्मुक्तिरिति।**

**अथात्यन्तिकदुःखनिवृत्तेरात्यन्तिकतत्साधनध्वंसस्य वा[1] मुक्तित्वमते तादृशमुक्तित्वं तत्त्वज्ञानजन्यतावच्छेदकं वाच्यम्, तस्य च स्वसामानाधिकरण्य-कालिकविशेषणतोभयसम्बन्धेन तादृशदुःखादिमदन्यदुःखादिध्वंसत्वरूपतया नित्यसुखसाक्षात्कारत्वापेक्षया गुरुशरीरतया नित्यसुखसाक्षात्कारो मुक्ति-रित्येष एव कल्पः समीचीनः, तन्मते लघोर्नित्यसुखसाक्षात्कारत्वस्य जन्यता-वच्छेदकत्वात्। नित्यत्वञ्च प्रकृते निरवच्छिन्नत्वम्।**

---

आनन्दं ब्रह्मणो रूपमित्यादिश्रुतावानन्दपदस्य सुखरूपधर्मपरतया मुक्तिदशायां सुखसत्त्वमुपपाद्य तस्य लाघवतो नित्यत्वं प्रसाध्य निरुक्तश्रुत्यैव नित्यसुखं प्रमापितं, सम्प्रति तस्यानन्दपदस्य धर्मपरतायां दोषमाख्याय तदनुपपत्तिं सूचयितुमुपक्रमते **"अत्रेदं चिन्तनीय"**-मित्यादिना। **"धर्मपरत्वे"** प्रागुक्तरीत्या सुखपरत्वे। **"तस्ये"**ति आनन्दपदस्येत्यर्थः।

नन्वनादिर्निरङ्कुशा च श्रुतिर्न लौकिकलिङ्गानुशासननियन्त्रणामर्हति तत्तत्र लिङ्गत्यागो न दोषायेत्यत आह **"न चे"**त्यादि। **"वक्ष्यमाणरीत्या"**-मत्वर्थीयप्रत्ययान्ततया आनन्दपदस्यानन्दाश्रयपरत्वं रूपपदस्य स्वरूपपरत्वमित्यादिरीत्या। **"तत्कल्पनाया"**-लिङ्गत्यागकल्पनायाः। **"तस्मा"**दिति। आनन्दपदस्य धर्मपरत्वे आनन्दमित्यत्र नपुंसक-लिङ्गतानुपपत्तिरूपदोषादित्यर्थः। **"निमित्तसप्तम्यन्त"**मिति—एतेन मोक्ष इत्यस्य मोक्ष-दशायामित्यर्थकत्वे तदानीमानन्दाश्रयस्य साक्षात्कारविषयस्य विशेषणतया आनन्दस्यापि साक्षात्कारविषयत्वस्यावश्यकतया असतः साक्षात्काराविषयत्वेन तदानीं तत्सत्त्वोपपत्त्या लाघवेन शक्यं नित्यसुखं प्रमापयितुमित्याशङ्का निरस्ता भवति। मोक्षनिमित्तीभूत-साक्षात्कारस्य मोक्षदशायामनपेक्षितत्वात्। **"तादृशश्रुतेः"** 'आनन्दं ब्रह्मणो रूप' मित्यादि-पूर्वोक्तश्रुतेः। **"अप्रामाणिकमे"**वेति—'नित्यं विज्ञानमानन्दं ब्रह्मे' ति श्रुतेस्तु पूर्वमेव नित्यसुखसाधकताया निरस्तत्वादिति भावः।

न च विशिष्टान्वयस्थले बाधकविरहे विधेयस्य विशेषणविशेष्योभयान्वितत्व-नियमेन 'नित्यं विज्ञानमानन्दं ब्रह्मे'ति श्रुतावानन्दविशिष्टे विशेष्यभूते ब्रह्मणीव विशेषणीभूते आनन्देऽपि नित्यत्वात्मकविधेयान्वयस्याबाधितत्वेन निरुक्तश्रुतिरेव नित्यसुखे प्रमाणतामर्हति। अत एव न्यायकुसुमाञ्जलौ 'कार्यायोजनधृत्यादे'रिति कारिकायां 'साध्यो विश्वविदव्यय' इत्यंशव्याख्यानावसरे **हरिदासेन** 'विश्वविदव्यय इति विशिष्ट-स्याव्ययत्वं तेन नित्यसर्वविषयकज्ञानसिद्धि' रिति व्याहृतम्। युज्यते चैतद् विशेषणस्य नित्यतां विना विशिष्टस्य नित्यत्वानुपपत्तेरिति। एवञ्च कथं नित्यसुखमप्रामाणिक-

1 B दुःखध्वंसस्यात्यन्तिकदुःखसाधन दुःखध्वंसस्य वा

**वस्तुतस्तु एतन्मते अवच्छेदककोटौ सुखविषयत्व[1]मपि न निवेश्यते, निरवच्छिन्नसाक्षात्कारत्वस्यैव [2]जन्यतावच्छेदकतयोपपत्तेः। एवञ्चैतादृशलाघव[3]सहकृतमनुमानमेव नित्यसुखसाधकमिति चेन्न; आत्यन्तिकदुरितध्वंस एव मोक्षः। तादृशध्वंसे च तत्त्वज्ञानजन्यत्वं[4] भट्टेनाप्यङ्गीकार्यम्। अन्यथा मुक्तस्याधर्मसत्त्वेन दुःखोत्पादप्रसङ्गात्। एवञ्च नित्यसुखसाक्षात्कारं प्रति तत्त्वज्ञानस्य हेतुताकल्पनं तेषामधिकमिति गौरवम्।**

---

मेवेत्युक्तिरुपपद्यत इति वाच्यम्; नित्यमित्यादिश्रुतौ तथा विशिष्टान्वयपरतामभ्युपगम्यानन्दरूपविशेषणेऽपि नित्यत्वान्वयोपगमे तथैव रीत्या विज्ञानेऽपि तदन्वयसम्भवेन नित्यज्ञानसिद्धया स्वसिद्धान्ताननुमतेश्वरसिद्धिप्रसङ्गात्। अतः स्वमते तत्र तादृशविशिष्टान्वयपरतायाः स्वीकर्तुमशक्यत्वेन तस्याः श्रुतेरुक्तरीत्यापि नित्यसुखसाधनाक्षमतया नित्यसुखमप्रामाणिकमेवेत्युक्तिः सूपपन्नेति भावः।

अथ मुक्तितत्त्वज्ञानयोः कार्यकारणभावे परमतसिद्धतत्त्वज्ञानजन्यतावच्छेदकापेक्षया स्वमतसिद्धजन्यतावच्छेदकलाघवेन नित्यसुखं साधयितुमाह "**अथे**"त्यादि। "**आत्यन्तिकतत्साधनध्वंसस्य**" आत्यन्तिकदुरितध्वंसस्य। "**तादृशमुक्तित्वं**" कल्पभेदेन वक्ष्यमाणोभयसम्बन्धेन दुःखवदन्यदुःखध्वंसत्वं दुरितवदन्यदुरितध्वंसत्वं वा। "**तस्य**" तादृशमुक्तित्वस्य। "**तादृशदुःखादी**"त्यादि। उभयत्रैव दुःखादीत्यादिपदेन दुरितपरिग्रहः। तेन दुःखवदन्यदुःखध्वंसत्वरूपतया दुरितवदन्यदुरितध्वंसत्वरूपतया च। "**गुरुशरीरतया**" अधिकपदार्थघटिततया। गुरुशरीरतयेत्यनन्तरं तन्मतइत्यादि जन्यतावच्छेदकत्वादित्यन्तं वाक्यं तदनन्तरञ्च नित्यसुखेत्यादि समीचीन इत्यन्तं वाक्यं योजनीयम्। "**लघो**"रित्यादि। तथाहि तत्त्वज्ञानजन्यत्वं किञ्चिद्धर्मावच्छिन्नं जन्यतात्वात्, नित्यसुखसाक्षात्कारत्वस्य जन्यतावच्छेदकत्वे लाघवमित्येवं लाघवज्ञानानुगृहीतानुमानेन नित्यसुखसाक्षात्कारत्वस्यैव तत्त्वज्ञानजन्यतावच्छेदकत्वसिद्धया तदवच्छिन्नस्य नित्यसुखसाक्षात्कारस्यैव मुक्तित्वं सुसङ्गच्छत इति भावः।

ननु निरुक्तनित्यसुखसाक्षात्कारत्वघटकनित्यत्वस्य ध्वंसाप्रतियोगित्वे सति प्रागभावाप्रतियोगित्वरूपतया ध्वंसाप्रतियोगित्व—प्रागभावाप्रतियोगित्वयोर्विशेष्यविशेषणभावविनिगमनाविरहप्रयुक्तकार्यकारणभावबाहुल्यादिप्रसङ्गेन च गौरवग्रस्ततया कुतः प्रकृते लाघवमित्याशङ्कामपनेतुमाह "**नित्यत्वञ्चे**"ति। तथा च तादृशनिरवच्छिन्नत्वरूपनित्यत्वघटितस्य तादृशसाक्षात्कारत्वस्य न समर्थितलाघवानुपपत्तिरिति भावः।

नित्यत्वस्य प्रकृते निरवच्छिन्नत्वरूपत्वे नित्यसुखसाक्षात्कारत्वापेक्षयापि लाघवमुपपादयन्नाह "**वस्तुतस्त्वि**"त्यादि। "**एतन्मते**" प्रकृतस्थले नित्यत्वस्य निरवच्छिन्नत्वरूपतामते। "**अवच्छेदककोटौ**" तत्त्वज्ञानजन्यतावच्छेदकगर्भे।

1 D omits विषयत्व — 2 B ० त्वस्य तथात्वाद् एवञ्च before जन्यता

3 D inserts तर्क before सहकृत — 4 A C हेतुत्वं (for जन्यत्वं),

**अथ[1] भट्टमते दुरितध्वंसं प्रति तत्त्वज्ञानस्य हेतुता [2]नास्ति। क्लृप्त-भोगरूपकारणवशादेव तन्नाशसम्भवात्। न च तत्त्वज्ञान उत्पन्ने मुक्ते[3] रुत्पत्त्या भोगासम्भव इति वाच्यम्; तत्त्वज्ञानोत्पत्तावपि भोगेन दुरितक्षये सत्येव मुक्ति-स्वीकारात्।**

---

निरुक्तरूपलाघवज्ञानानुगृहीतानुमानबलेन नित्यसुखसिद्धया नित्यसुखाभिव्यक्तेरुप-पन्नमपि मुक्तित्वसिद्धान्तं गौरवान्तरेण निरस्यन्नात्यन्तिकदुरितध्वंसस्यैव मुक्तित्वं व्यवस्था-पयति "**आत्यन्तिकदुरितध्वंस एवेत्यादिना**"। **तादृशध्वंसे च**—आत्यन्तिकदुरितध्वंसे च। **भट्टेनापि**—नित्यसुखाभिव्यक्तेर्मुक्तित्वमभ्युपगच्छता तौतातितभट्टेनापि। **अन्यथा**—आत्य-न्तिकदुरितध्वंसे तत्त्वज्ञानस्य हेतुत्वानङ्गीकारे। **अधर्मसत्त्वेन**—दुःखसाधनीभूतदुरितसत्त्वेन। **दुःखोत्पादप्रसङ्गादिति**—मुक्तात्मनि केनापि दुःखोत्पादस्यानभ्युपगमादिति भावः। "**एवञ्चेति**"। निरुक्तकारणवशादात्यन्तिकदुरितध्वंसस्य मुक्तित्वमभ्युपगच्छतेव नित्यसुखा-भिव्यक्तेर्मुक्तित्वमभ्युपगच्छतापि तादृशात्यन्तिकदुरितध्वंसं प्रति तत्त्वज्ञानस्य हेतुताया अवश्यमङ्गीकर्तव्यत्वेनेत्यर्थः। "**तेषामिति**"। नित्यसुखाभिव्यक्तेर्मुक्तित्वमभ्युपगच्छतां भट्टा-नामित्यर्थः। "**अधिकमिति**"। तथाहि आत्यन्तिकदुरितध्वंसस्य मुक्तित्ववादिनां केवलमा-त्यन्तिकदुरितध्वंसं प्रत्येव तत्त्वज्ञानस्य हेतुत्वं, न तु नित्यसुखसाक्षात्कारं प्रत्यपि, तस्य तन्मते मुक्तित्वाभावेन तदनङ्गीकारेऽपि दोषासम्भवात्। नित्यसुखाभिव्यक्तेर्मुक्तित्ववादि-नान्तु मुक्त्यात्मकनित्यसुखसाक्षात्कारं प्रति तत्त्वज्ञानस्यैका हेतुता, परा चात्यन्तिकदुरित-ध्वंसं प्रतीति हेतुताद्वयकल्पनागौरवमिति। अतो लाघवेनात्यन्तिकदुरितध्वंसस्यैव मुक्तित्व-सिद्धान्तो युक्त इति भावः।

अथ 'नाऽभुक्तं क्षीयते कर्म कल्पकोटिशतैरपी' त्यादिशास्त्रेण भोगाभावे कर्मणः क्षयनिषेधात् तेनैव भुक्तस्यैव कर्मणः क्षयसूचनाच्चान्वयव्यतिरेकानुविधायितया भोगस्य कर्मक्षयहेतुता प्रतीयते। सा चेयं कर्मक्षयहेतुता क्लृप्ता। अनुगृह्यते चासौ 'अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभ'मित्यादिना कर्मत्वावच्छेदेनैव भोगविषयत्वसूचकशास्त्रेण। तत्तयैव सर्वत्र दुरितध्वंसस्य सम्भवात् तदर्थं तत्त्वज्ञाने दुरितध्वंसहेतुतायाः कल्पनस्यानाव-श्यकत्वेन कुतो नित्यसुखाभिव्यक्तेर्मुक्तित्वमते हेतुताद्वयकल्पनाप्रयुक्तं गौरवमित्याशङ्कमानः प्रस्तौति "**अथे**"त्यादि। "**भट्टमत**"इति निरुक्तरूपे भट्टमतसिद्धे नित्यसुखाभिव्यक्तेर्मुक्तित्व-सिद्धान्त इत्यर्थः। "**तन्नाशसम्भवात्**"—निरुक्तदुरितध्वंसरूपकार्यसम्भवात्। तदर्थं तत्त्व-ज्ञानस्य हेतुताया अनपेक्षितत्वादिति भावः।

"**क्लृप्तभोगरूपे**"त्यादि। क्लृप्तदुरितकर्मकभोगरूपदुरितध्वंसकारणवशादित्यर्थः। ननु भोगस्य सुखदुःखान्यतरसाक्षात्काररूपतया दुरितस्य च तदन्यतरभिन्नादृष्टविशेषरूपतया दुरितकर्मकभोग एवानुपपन्नस्तत् कथं दुरितकर्मकभोगस्य दुरितध्वंसकारणतासम्भव इति

1 B omits अथ 2 C D read कल्पनं before नास्ति 3 C D मुक्तेरेव

**न च तत्त्वज्ञानद्वितीयक्षणे मुक्तौ[1] बाधकाभाव इति वाच्यम्, मुक्तिं प्रति[2] दुरितस्य प्रतिबन्धकत्वोपगमात् तस्यैव बाधकत्वादिति चेन्न, 'ज्ञानाग्निः**

---

चेन्न, दुरितस्य भोगकर्मत्वं हि धनादेरिव गौणं भोगविषयीभूतफलोपहितत्वाद्, 'अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभ'मित्यादिबहुतरप्रामाणिकप्रयोगदर्शनात्, तत्र तत्र भोगविषयफलोपहितत्वादिमूलगौणभोगकर्मत्वं विना विषयतारूपभोगकर्मत्वमादाय वाक्यप्रामाण्यस्याशक्योपपादनत्वाद्, अतो न दुरितकर्मकभोगानुपपत्त्या भोगस्य दुरितध्वंसकारणत्वासम्भव इति भावः। भोगरूपेत्यस्य स्वजन्यफलभोगरूपेति वा प्रकृते अर्थः।

मुक्तिदशायां भोगासम्भवेन दोषमाशङ्क्य निषेधति "**नचे**"त्यादिना। तत्त्वज्ञाने 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः, एतावदरे खल्वमृतत्व' मित्यादिश्रुत्या मोक्षहेतुतया निरूपिते आत्मसाक्षात्कारे इत्यर्थः। तथा च तस्याः श्रुतेरर्थमाह **गदाधरः**—'एतावत् श्रवणादिरूपं ज्ञानममृतत्वं--अमृतत्वस्य मोक्षस्य हेतु' रिति। 'तत्र साक्षात्कारणं सवासनमिथ्याज्ञानोन्मूलनक्षमः श्रुतिस्मृत्युपदिष्टयोगविधिना चिरनिरन्तरादरसेवितनिदिध्यासनजन्ययोगजधर्मप्रयोज्यः शरीरभिन्नत्वेनात्मनः साक्षात्कार एवे'त्यपि प्राह स एव स्वीयनवमुक्तिवादे।

"**मुक्तेरुत्पत्त्ये**"ति। तादृशतत्त्वज्ञानघटितमुक्तिसामग्रीसम्बलनादिति शेषः। "**भोगासम्भव**" इति। प्रकृतदुरितध्वंसहेतुत्वाभिमतदुरितभोगासम्भव इत्यर्थः। तथाहि प्रागुक्तरीत्या दुरितस्यातीन्द्रियत्वेन साक्षात्कारात्मकभोगनिरूपितस्य विषयतात्मककर्मत्वस्य तत्रासम्भवात् स्वविषयीभूतदुःखरूपफलोपहितत्वमूलमौपचारिकं कर्मत्वमुपादायैव दुरितकर्मकभोगस्योपपादनीयतया मुक्तिदशायाम् 'अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशत' इत्यादिश्रुतिसिद्धस्य मुक्तात्मनि दुःखसम्बन्धाभावस्य सर्वसम्मतत्वेन तदानीं भोगविषयीभूतदुःखस्याभावात् स्वविषयीभूतदुःखरूपफलोपहितत्वमूलकौपचारिककर्मत्वस्यापि दुरिते विरहाद् दुरितकर्मकभोगानुपपत्तिरिति भावः।

प्रकृतदोषनिषेधमुपपादयति "**तत्त्वे**"त्यादिना। **तत्त्वज्ञानोत्पत्तावपि**—जातायामपि तत्त्वज्ञानोत्पत्तौ तत्त्वज्ञाने जातेऽपीति यावत्। भावविहितकृत्प्रत्ययस्थले तादृशार्थकत्वकल्पनायास्तान्त्रिकानुमतत्वात्। "**दुरितक्षय**" इति। तत्त्वज्ञानोत्तरमपि सतां यावतां दुरितानां नाशे इत्यर्थः। "**सत्येवे**"ति एवशब्दस्येतरव्यवच्छेदार्थतया न तु तादृशयावद्दुरितक्षये ऽसत्यपीत्यर्थः।

तथाहि यदि तत्त्वज्ञानाव्यवहितोत्तरक्षण एव मुक्तिः स्यात्, तदैव तत्काले श्रुतिविरुद्धस्य दुःखमत्त्वस्याभ्युपगन्तुमशक्यतया पूर्वोक्तरीत्या दुरितभोगानुपपत्त्या भोगेन दुरितध्वंसानुपपत्तेस्तत्त्वज्ञाने दुरितध्वंसहेतुताकल्पनं लब्धास्पदं भवति, न चैवम्, तत्त्वज्ञानोत्तरमपि वर्तमानानां यावतां दुरितानां भोगेन नाशनानन्तरमेव मुक्तेः स्वीकारेण मुक्त्युत्पत्तिकालं तत्त्वज्ञानोत्पत्तिकालञ्चान्तरा वर्तमानासु कालकलासु दुरितजन्यदुःखमत्त्वे बाधाभावेन

1 B D मुक्त्युत्पत्त्यौ 2 C omits प्रति

**सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन' इत्यादिश्रुतिभ्यः[1] [स्मृतिभ्यः], भिद्यते हृदयग्रन्थिश्छिद्यते कर्मबन्धनम् [छिद्यन्ते सर्वसंशयाः]। क्षीयन्ते चास्य कर्माणि-तस्मिन् दृष्टे परावरे।' इत्यादिश्रुतिभ्यश्च[2] तत्त्वज्ञानस्य धर्माधर्मनाशकत्वबोध सम्भवाद्[3] दुरितध्वंसे तद्धेतुताया[4] उभयवादिसिद्धत्वात्।**

---

तद्भोगादेव दुरितभोगोपपत्त्या भोगेनैव दुरितध्वंसस्य शक्यसाधनत्वेन तदर्थं तत्त्वज्ञान-हेतुत्वकल्पनमनपेक्षितमिति भावः।

तत्त्वज्ञानाव्यवहितोत्तरक्षण एव मुक्तौ बाधकाभावमाशङ्क्य निषेधति **"न चे"**-त्यादिना। **"तस्यैवे"**ति तत्त्वज्ञानोत्तरमपि सतो दुरितस्यैवेत्यर्थः। तत्त्वज्ञाने दुरिता-नाशकत्वस्य प्रकृतत्वात्। अथेत्यारभ्य 'बाधकत्वादितिचे'दित्येतत्पर्यन्तो ग्रन्थस्तत्त्वज्ञानस्य दुरितध्वंसाहेतुत्वप्रदर्शनपरः। अथ तन्निषेधमुपक्रमते **"ने"**त्यादिना।

ननु 'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन इत्यादिश्रुतिभ्य' इत्यसङ्गतार्थं ज्ञानाग्निरित्यादिश्लोकस्य महाभारतान्तर्गतश्रीमद्भगवद्गीताग्रन्थाङ्गतया श्रुतित्वाभावात्। अतः श्रुतिभ्य इत्यत्र स्मृतिभ्य इति पाठः समीचीनः प्रतिभाति। रक्षणानुकूलशीलास्तु महाभारतकारेण व्यासदेवेन स्वयमेवोपनिषदनुगतत्वेन प्रत्यध्यायान्ते गीताया उपनिषत्त्वस्य कीर्तनात्तदङ्गस्यास्य श्रुतित्वमाहुः। अन्ये तु, इतिहासस्य पञ्चमवेदस्वरूपताया अभ्यनु-ज्ञानात् श्रुतिभ्य इत्येव पाठं सङ्गमयन्ति।

'भिद्यत' इत्यादिद्वितीयश्रुतौ 'छिद्यते कर्मबन्धन' मित्यत्र 'छिद्यन्ते सर्वसंशया' इति पाठः, सर्वत्र तथैव दृष्टत्वात्, 'छिद्यते कर्मबन्धन' मिति पाठे 'क्षीयन्ते चास्य कर्माणी' त्युत्तरांशेन पुनरुक्तत्वदोषापाताच्च। केचित्तु 'छिद्यते कर्मबन्धन'मितिप्रतीकघटितेयमपरा श्रुतिरर्थान्तरेण पुनरुक्ततादोषशून्येति प्राहुः। अस्याः श्रुतेरर्थो यथा,—हृदयग्रन्थिः—देहादि-विशेष्यकात्मत्वादिप्रकारकभ्रमप्रभवः संस्कारः। भिद्यतेऽत्यन्तं नश्यति स्वसमानाधिकरण-तादृशसंस्कारप्रागभावासमानकालीनध्वंसप्रतियोगी भवतीति यावत्। अत्रेदमवधेयम्, संस्कारजनकज्ञानविपरीतनिश्चयस्य संस्कारनाशकतया परावरदर्शनप्रभवतत्त्वविज्ञानेन जनिते विपरीतविषयकसंस्कारध्वंसे प्रतिबन्धकीभूततत्त्वज्ञानसद्भावेन तादृशात्मत्वादि-प्रकारकविपर्ययस्य चानुत्पत्त्या विपरीतगोचरसंस्कारान्तरस्याप्यनुदयेन प्रागुक्तसंस्कार-ध्वंसस्यात्यन्तिकत्वं निर्वहतीति।

केचित्तु 'कामा ग्रन्थिस्वरूपेण व्याख्याता वाक्यशेषत' इति, 'न द्वेष्टि सम्प्रवृत्तानि न निवृत्तानि काङ्क्षति। उदासीनवदासीन इति ग्रन्थिभिदोच्यते' इति च पञ्चदशी-ग्रन्थनिरुक्तिं स्मरन्तः 'भिद्यते हृदयग्रन्थि' रित्यस्यार्थान्तरं निरूपयन्ति यथा;—हृदयग्रन्थिः धर्माधर्मात्मकप्रवृत्तिजनकरागद्वेषमोहात्मकदोषसमुदायः, भिद्यते सवासनमिथ्याज्ञानापाया-दपैतीति। 'छिद्यते कर्मबन्धन' मिति पाठस्य स्वीकारपक्षे कर्मणो धर्माधर्मात्मकप्रवृत्ते-

1. 2 A B श्रुतिभिः 3 B C बोधनात् (for बोधसम्भवात्)
4 D तत्त्वज्ञानहेतुताया (for तद्धेतुताया)

**न च तादृशश्रुतीनां धर्माधर्मनाशकत्वं[1] नार्थः, किन्तु तत्सम्पादकत्वम्।[2] तच्च कायव्यूहसम्पादनद्वारा[3] तन्नाश[4]निष्पादनेऽप्युपपद्यते, अतो न तज्जनकत्व-मुभयवादिसिद्धमिति वाच्यम्; विनापि तत्त्वज्ञानं तपोयोगादिप्रभावेण सौभरि-प्रभृतीनां कायव्यूहदर्शनेन[5] व्यभिचारादवश्यक्लृप्तावयवसंयोगादिरूपकारण-**

---

बन्धनं निबन्धनं कारणमितिप्रतिपत्त्या कर्मबन्धनपदेनैव रागद्वेषमोहात्मकदोषलाभात् तत्र पुनरुक्ततादोषनिवर्तकं तदेवार्थान्तरं, तत्कल्पे 'भिद्यते हृदयग्रन्थि' रित्यस्य प्रागुक्त एवार्थः। अन्यथा तेनैव पुनः पुनरुक्ततादोषापातात्।

'छिद्यन्ते सर्वसंशया' इति पाठे संशयांशे सर्वत्वविशेषणेन संशयनाशे आत्यन्तिकत्वं सूच्यते। तथाचायमर्थः—परावरे दृष्टे सति सर्वसंशयाश्छिद्यन्ते, संशये स्वसमानाधिकरण-संशयासमानकालीनध्वंसप्रतियोगित्वं निर्वहतीति। अत्रापि तत्त्वज्ञानेन मिथ्याज्ञानवासनारूप-दोषजन्यायथार्थज्ञानात्मकसंशयस्य तत्त्वज्ञानोत्तरमनुत्पाद एव नियामकः। "**कर्माणी**"ति बहुवचनेन तत्त्वज्ञानकालीनसमानाधिकरणनिखिलकर्मणामुपग्रहः। तेन तत्त्वज्ञानेन जातेन तादृशानि सर्वकर्माणि नश्यन्तीत्यर्थः। कर्मपदस्य धर्माधर्मरूपादृष्टाभिधायकतयाऽनेनैवांशेन श्रुतिरियं तत्त्वज्ञानस्य दुरितध्वंसहेतुतां बोधयतीति। "**दुरितध्वंस**"इत्यत्र सप्तम्या निरू-पितत्वमर्थः, "**तद्धेतुतायाः**"—तत्त्वज्ञाननिष्ठहेतुतायाः, तेन दुरितध्वंसनिरूपिततत्त्वज्ञान-निष्ठहेतुताया इत्यर्थः। "**उभयवादिसिद्धत्वा**"दिति—प्रकृतविचारे पक्षप्रतिपक्षाभ्यामुभाभ्या-मेव निरुक्तश्रुतिप्रतिपादितार्थस्यापरिहार्यत्वादिति भावः।

अथ तादृशश्रुतीनामर्थान्तरेण तत्त्वज्ञाने दुरितध्वंसहेतुतायामुभयवादिसिद्धत्वाभाव-शङ्कां परिहर्तुमाह "**न चे**"त्यादि। "**धर्माधर्मनाशकत्वं**" साक्षाद्धर्माधर्मरूपकर्मनाश-जनकत्वम्। "**तत्सम्पादकत्वं**" परम्परयैव तत्प्रयोजकत्वम्। "**तच्च**"—परम्परया तत्-प्रयोजकत्वञ्च। "**कायव्यूहे**"त्यादि।—तथाहि तत्त्वज्ञानं साक्षात् कायव्यूहं जनयति, काय-व्यूहोऽवच्छेदकतासम्बन्धेन स्वस्मिन् भोगं जनयति, भोगश्च दुरितध्वंसं जनयति। एवं क्रमेणैव तत्त्वज्ञानोत्तरं दुरितनाशात् परम्परया तत्त्वज्ञाने दुरितध्वंसप्रयोजकत्वोपपत्तिरिति भावः। ज्ञानाग्निः सर्वकर्माणीत्यादिगीतास्मृतौ ज्ञानस्याग्नित्वेन रूपणमेव तद्ग्राहकम्। तदुक्तं **गदाधरेण** स्वीयमुक्तिवादे—"माऽभुक्तमित्यादिवचनानुरोधेन तत्त्वज्ञानं कायव्यूह-सम्पादनद्वारा झटिति सकलकर्मभोगं निर्वाह्य तानि नाशयतीत्यत्रैव ज्ञानस्य कर्मनाशकता-बोधकवाक्यानां तात्पर्योपगमात्। यथा अग्नेरिन्धननाशे भस्मनि च परम्परयैव हेतुता, तथा ज्ञानस्यापि कर्मविनाशे इत्येतत्सूचनायैव ज्ञानस्य अग्नित्वेन रूपण'मिति। अत्र टीकायां

1 A inserts बोध before कत्वं 2 B C D read प्रयोजकत्वं (for सम्पादकत्वम्)

3 B omits सम्पादन 4 D inserts भोगेन before तन्नाश

5 B reads दर्शनात्तज्जनकताया अनावश्यकत्वात् for दर्शनेन व्यभिचारात्० etc up to प्रयोजकताया अप्यनुपपत्तेः

**वशादेव कायव्यूहनिर्वाहेण[1] अन्यथासिद्ध्या च कायव्यूहं प्रति[2] तत्त्वज्ञानस्य हेतुत्वासम्भवात् प्रयोजकताया अप्यनुपपत्तेस्त[3]ज्जनकताया आवश्यकत्वात्। कायव्यूहं[4] प्रति तज्जनकत्वे तु[5] अनन्तशरीरादेः[6] कल्पनापेक्षया धर्माधर्मनाशे साक्षात्तत्त्वज्ञानस्य हेतुताकल्पनस्यैवोचितत्वात्।**

---

**शिवरामः**—'तथाच परम्परयैव नाशकत्वरूपसाधर्म्येण रूपकमेव तदिति भाव' इति प्राह। अग्नेरिन्धननाशे भस्मनि च परम्परया हेतुत्वमेवं यथा,—आदावग्निनेन्धनावयवेष्वभिघातो जन्यते, ततस्तेषु क्रिया जायते, ततस्तया क्रियया तदिन्धनावयवानां मिथो विभागः, तस्मादिन्धनारम्भकसंयोगनाशः, ततोऽवयविन इन्धनस्य नाश इति। एवमेव प्रकृतस्थले परम्परया हेतुता; क्रमस्तु दर्शित एवाधस्तात् "**अतो न तज्जनकत्वमुभयवादिसिद्ध**"मिति। तज्जनकत्वं—तत्त्वज्ञानस्य साक्षादेव दुरितध्वंसजनकत्वम्। न उभयवादिसिद्धमिति—अतो न भट्टमते पूर्वोक्तहेतुताद्वयाभ्युपगमनिबन्धनं गौरवमिति भावः।

साक्षात्कायव्यूहजननद्वारा समुपपादितं तत्त्वज्ञानस्य परम्परया दुरितध्वंसप्रयोजकत्वं युक्त्या निषिध्य पुनस्तथैव गौरवमुपपादयति "**विनापी**"त्यादिना। अत्र 'आत्मनो वै शरीराणि बहूनि मनुजेश्वर! प्राप्य योगबलं कुर्यात् तैश्च कृत्स्नां महीं चरेत्। भुञ्जीत विषयान् कैश्चित् कैश्चिदुग्रं तपश्चरेत्। संहरेच्च पुनस्तानि सूर्यस्तेजोगणानिव।' इति **न्यायसारादिसन्दर्भाः**, 'तपःप्रभावादेव तत्त्वज्ञानानुत्पादेऽपि कायव्यूहसम्भवा'दितीश्**वरानुमानादि**सन्दर्भाश्च स्मर्तव्याः।

"**कायव्यूहदर्शनेने**"ति कायव्यूहविषयकप्रमाज्ञानेनेत्यर्थः। अन्यथा भ्रमज्ञानस्थले विषयाभावेन प्रकृतव्यभिचारस्यानुपपन्नत्वात्। प्रमाज्ञानस्य विषयनियतत्वेन कारणाभावे सति कार्यसत्त्वरूपव्यभिचारोपपत्तिः।

अथ निरतिशययोगादिप्रभावेणासाधारणयोगधर्मशालिनां सौभरिप्रभृतीनां तत्त्वज्ञानस्यापि स्वीकारे बाधकाभावः, तथाच न व्यभिचार इत्याशयेन हेत्वन्तरमाह "**अवश्ये**"त्यादिना। "**अन्यथासिद्ध्ये**"ति। कायव्यूहरूपकार्येऽवश्यक्लृप्तनियतपूर्ववर्त्यवयवसंयोगादिभिन्नतया तत्त्वज्ञानस्यान्यथासिद्धत्वेनेत्यर्थः। "**हेतुत्वासम्भवा**"दिति। अनन्यथासिद्धनियतपूर्ववर्तिन एव हेतुत्वादिति भावः।

"**प्रयोजकताया**" इति तत्त्वज्ञानस्य कायव्यूहजननद्वारा दुरितध्वंसं प्रति प्रयोजकताया इत्यर्थः। "**अनुपपत्ते**"रिति-तत्त्वज्ञाननिष्ठतत्कारणताधीनत्वात्तस्या इति भावः। "**तज्जनकताया**" इति—तस्य दुरितध्वंसस्य जनकः तज्जनकस्तस्य भावस्तज्जनकता तस्याः। अथवा तस्य तत्त्वज्ञानस्य जनकता तस्याः, तत्त्वज्ञाननिष्ठदुरितध्वंसजनकताया इत्यर्थः।

1 C reads दर्शनेन (for निर्वाहेण) 2 A omits च कायव्यूहं प्रति
3 अत्र तत्पदं दुरितनाशपरम् 4 B ० व्यूहविशेषं
5 C reads तज्जनकत्वस्य (for तज्जनकत्वे तु) 6 C inserts च before कल्पना

**न च माऽभुक्तं क्षीयते कर्म कल्पकोटिशतैरपीत्यादि[1]स्मृतिविरोधाद् भोगं विनापि तत्त्वज्ञानस्य साक्षाद्धर्माधर्म[2] नाशकत्वमनुपपन्नमिति वाच्यम्; तत्र कर्मपदस्य तत्त्वज्ञानाद्यनाश्यकर्मपरत्वात्। विनैव भोगं[3] प्रायश्चित्तादिना**

---

"**आवश्यकत्वा**"दिति—अन्यथा 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे'इति—'ज्ञानाग्निः सर्वकर्माणी'त्यादिश्रुतिस्मृत्योरप्रामाण्यप्रसङ्गात्।

तत्त्वज्ञानस्य साक्षाद्धर्माधर्मनाशजनकत्वकल्पनायां कल्पनालाघवमप्याह "**कायव्यूहं प्रती**"त्यादिना। **तज्जनकत्वे**—तत्त्वज्ञाननिष्ठजनकत्वे। "**शरीरादे**"रित्यादिपदेन तदवयवसंयोगादीनामुपग्रहः। "**धर्माधर्मनाश**" इति सप्तम्यर्थो निरूपितत्वं, तस्य हेतुतायामन्वयः, "**तत्त्वज्ञानस्ये**"ति षष्ठ्यर्थो निष्ठत्वं, तस्यापि तत्रैवान्वयः, तेन साक्षाद्धर्माधर्मनाशनिरूपिततत्त्वज्ञाननिष्ठहेतुताकल्पनस्यैवेत्यर्थः। "**उचितत्वा**"दिति तत्रैव कल्पनालाघवादिति भावः।

'माऽभुक्त'मित्यादिशास्त्रविरोधेन प्रसक्तामुक्तकल्पनानुपपत्तिशङ्कां प्रतिषेद्धुं प्रस्तौति "**न च माऽभुक्त**"मित्यादि। तथाहि 'माऽभुक्त'मित्यादिस्मृतिवाक्यात् कर्मगतनाशप्रतियोगित्वे भोगविषयताव्याप्यत्वं प्रतीयते, भोगं विना तत्त्वज्ञानस्य साक्षाद्धर्माधर्मनाशकत्वस्वीकारे भोगविषयताशून्ये कर्मणि नाशप्रतियोगित्वापातादुक्तस्मृतिविरोधः। अथवा निरुक्तस्मृतिवाक्येनाभुक्तकर्मत्वावच्छेदेन क्षयप्रतियोगित्वाभावविषयकस्य शाब्दस्य जननात्, तदेव शाब्दं विज्ञानं भोगं विनापि तत्त्वज्ञानस्य कर्मनाशजनकत्वकल्पनां विरुणद्धि तस्या एव कल्पनायास्तुल्यवित्तिवेद्यतया अभुक्तकर्मत्वसामानाधिकरण्येन क्षयप्रतियोगित्वावगाहित्वादवच्छेदावच्छेदेनाभावावगाहिनिश्चयस्य सामानाधिकरण्येन भावबुद्धिविरोधितायाः सर्वानुभवसिद्धत्वात्।

प्रतिषेधे हेतुमुपन्यस्यति "**तत्रे**"त्यादिना। तत्र माऽभुक्तमित्यादिस्मृतौ। घटकत्वं सप्तम्यर्थः। "**तत्त्वज्ञानाद्यनाश्ये**त्यादि। अत्रादिपदं भोगं विनैव दुरितनाशकप्रायश्चित्तादिपरम्, अन्यथा तादृशस्मृतिविरोधादेव भोगं विना प्रायश्चित्तादौ दुरितनाशकत्वस्यानुपपत्तेः प्रायश्चित्तादिवैफल्यापातेन तद्बोधकवेदाद्यप्रामाण्यप्रसङ्गात्। न च प्रायश्चित्तादिस्थलेऽपि कर्मणां भोगः स्वीक्रियते, तस्य भोगस्य झटिति समुत्पत्त्यर्थमेव प्रायश्चित्तानुष्ठानमतो न तस्य वैफल्यमिति वाच्यम्, प्रायश्चित्तादिमतामपि दुरितजन्यदुःखभोगस्यावश्यम्भावित्वे तस्य झटितिसमुत्पादविलम्बसमुत्पादयोरविशेषेण प्रायश्चित्तादिप्रवृत्त्यनुपपत्तेरनिष्टस्य दुरितजन्यदुःखभोगस्य तावताप्यनिवृत्तेः। तत्रापि भोगेन दुरितनाशस्वीकारे प्रायश्चित्तस्यान्यथासिद्धया कारणत्वापायेन स्वरूपहान्यापत्तेः। तथाच निरुक्तस्मृतिघटककर्मपदस्य तत्त्वज्ञानाद्यनाश्यकर्मपरत्वेन तत्त्वज्ञानाद्यनाश्याभुक्तकर्मत्वावच्छेदेनैव क्षयप्रतियोगित्वाभावस्य निरुक्तस्मृत्या बोधनाद्भोगं विना तत्त्वज्ञानेन दुरितस्य नाशकल्पनायां न विरोध इति। "**विनैव भोग**"मिति। प्रायश्चित्तादिना अधर्मनाशस्थले भोग-

---

1 D inserts **अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्** before इत्यादि 2 B reads **भोगं विना साक्षात्तत्त्वज्ञानस्य धर्माधर्मं** 3 B inserts **तत्त्वज्ञानं** before **भोगं**

**अधर्मनाशा[1]त्तत्र सङ्कोचस्यावश्यकत्वात्। न चैवं भोगनाश्य[2]तावच्छेदककोटौ तत्त्वज्ञानाद्य[3]नाश्यत्वं व्यभिचारवारणाय निवेश्यमिति गौरवमिति वाच्यम्; अनन्तानामप्रामाणिकानां शरीरादीनां [4]कल्पनामपेक्ष्य तादृशगौरवसहिष्णुताया एव न्याय्यत्वात्।**

**वस्तुतस्तु प्रायश्चित्तजन्यधर्मनाशे[5] व्यभिचारवारणाय प्रायश्चित्ता-**

---

स्वीकारे दोषस्तु प्रागेवोक्तः। **तत्र** निरुक्तस्मृतिवाक्ये। **सङ्कोचस्य** कर्मपदस्य कर्मसामान्यरूपार्थं परित्यज्य लक्षणया प्रायश्चित्तानाश्यकर्मरूपविशेषपरत्वकल्पन**स्यावश्यकस्यावश्यं** अपेक्षितत्वात्। अन्यथा भोगं विना प्रायश्चित्तेनाधर्मनाशे निरुक्तस्मृतिविरोधतादवस्थ्यात्। एवञ्च प्रायश्चित्तस्थलानुरोधेन तत्र प्रायश्चित्तानाश्यकर्मरूपविशेषार्थस्य विशेषलक्षणया प्रतिपादनस्यानायत्यैवावश्यकत्वे तत्त्वज्ञानस्थलानुरोधेन लक्षणयैव तत्त्वज्ञानाद्यनाश्यकर्मपरत्वाभ्युपगमोऽपि न दोषायेति भावः।

अथैवं स्मृतिविरोधपरिहारेऽपि भोगकर्मनाशयोः कार्यकारणभावे व्यभिचारवारणाय भोगनाश्यतावच्छेदककोटौ तत्त्वज्ञानाद्यनाश्यत्वनिवेशनिबन्धनगौरवदोषेण प्रकृतसिद्धान्तस्य परिहार्यत्वशङ्कां निराकरोति **"न चे"**त्यादिना। **"व्यभिचारवारणाये"**ति। तत्त्वज्ञानेन प्रायश्चित्तेन च भोगं विनैव कर्मध्वंसस्थले भोगरूपकारणाभावेऽपि सामान्यतया कर्मध्वंसरूपकार्योत्पत्त्या समापतितस्य व्यभिचारस्य वारणायेत्यर्थः। व्यभिचारग्रहस्य कारणताग्रहविघटकत्वादिति भावः। अथवा, भोगजन्यतावच्छेदकतापर्याप्त्यधिकरणधर्मस्य भोगजन्यतातिरिक्तवृत्तित्वरूपभोगजन्यताव्यभिचारपरिहारायेत्यर्थः। अन्यथा स्वानतिरिक्तवृत्तिधर्मस्यैव स्वाच्छेदकत्वनियमेन केवलकर्मध्वंसत्वस्यावच्छेदकत्वासम्भवादिति भावः। प्रामाणिकं गौरवं न दोषायेत्यत आह **"अप्रामाणिकानामि"**ति। **"शरीरादीना"**मित्यादिपदेन शरीरारम्भकावयवसंयोगादीनामुपग्रहः। शरीरादीनामिति तत्त्वज्ञानस्थलेऽपि भोगार्थमवश्यमपेक्षितानामिति शेषः। **"तादृशगौरवे"**ति। भोगनाश्यतावच्छेदककोटौ तत्त्वज्ञानाद्यनाश्यत्वनिवेशनिबन्धनभोगजन्यतावच्छेदकगौरवेत्यर्थः। फलसन्देहे सत्यपि पक्षयोरुभयोरेव गौरवदोषग्रामे तारतम्येनाधिकगौरवस्यैव पक्षस्य परिहार्यत्वादितरस्य चानायत्यैवोपादेयत्वादिति। तदेव सूचितं **"न्याय्यत्वादित्यन्तेन"**। तदेवं भोगं विनैव तत्त्वज्ञानस्य साक्षाद्दुरितध्वंसजनकत्वं प्राप्तमिति भावः।

गौरवमात्रस्यैव कल्पनाविरोधितामाशङ्क्य भोगजन्यताच्छेदककोटौ तत्त्वज्ञानाद्यनाश्यत्वनिवेशनिबन्धनगौरवमपि परिहरन्नाह **"वस्तुतस्त्वि"**त्यादि। **"प्रायश्चित्तजन्यधर्मनाश"** इति—प्रायश्चित्तात् जनिरुत्पत्तिर्यस्य तथाभूताधर्मनाश इत्यर्थः। अत्र प्रायश्चित्तजन्याधर्मनाश इति मूलपाठः सम्भाव्यते, तत्पुरुषमपहाय बहुव्रीहिगौरवाश्रयणे कारणा-

1 C D Read कर्मनाशात् 2 A Reads नच भोगस्य जन्यता 3 C omits द्य
4 B inserts हेतुता before कल्पना 5 B omits धर्मनाशे and C D read कर्मनाशे

**नाश्यादृष्टनाशत्वं भवतापि भोगजन्यतावच्छेदकं वाच्यम्; एवञ्च जनकत्वप्रतियोगित्वादिघटितसामानाधिकरण्य[1]—कालिकविशेषणतोभयसम्बन्धेन भोगवददृष्टनाशत्वस्यैव भोगजन्यतावच्छेदकत्वमुपेयते। [2]दशवर्षभोगं जनयित्वा विश्वेश्वरदर्शनादिना विनष्टशतवर्षभोगनाश्यतायोग्यादृष्टनाशस्य तादृशसामानाधिकरण्यसम्बन्धेन भोगवत्त्वाद् भोगाजन्यत्वाच्च तत्र व्यभिचारवारणाय कालिकविशेषणता विशेषणम्। एवञ्च तत्त्वज्ञानजन्यादृष्टनाशेऽपि तत एव व्यभिचारवारणात् तत्त्वज्ञानानाश्यत्वस्य[3] भोगजन्यतावच्छेदककोटिनिवेशं विनैवोपपत्तिः।**

---

भावात्। धर्मेत्यत्र कर्मेति क्वाचित्कः पाठस्तु निरायासः। "**भवतापी**"ति। तत्त्वज्ञानस्य दुरितध्वंसहेतुत्वमनङ्गीकुर्वता भट्टमीमांसकेनापि इत्यर्थः। "**एवञ्चेति**"। भवन्मते प्रायश्चित्तानाश्यादृष्टनाशं प्रति भोगः कारणमित्येवं कार्यकारणभावस्य वाच्यत्वादेवेत्यर्थः। "**जनकत्वे**"त्यादि। तथाहि सामानाधिकरण्यं नाम स्वाधिकरणवृत्तित्वं, तत्र स्वपदेन प्रकृते भोगस्य परिग्रहात् तज्जनकेऽदृष्टे जनकत्वसम्बन्धेन स्वाधिकरणत्वं, प्रतियोगित्वसम्बन्धेन तत्रादृष्टनाशस्य वृत्तित्वमिति, अदृष्टनाशे भोगसामानाधिकरण्यस्योपपत्तिः। "**उपेयत**" इति। दुरितध्वंसस्य मुक्तित्ववादिना भट्टप्रतिपक्षेणेत्यर्थः। "**दशवर्षभोगं जनयित्वे**"ति। जनकत्वसम्बन्धस्य प्रकृते सम्पत्त्यर्थम्। प्रतियोगित्वसम्बन्धेन तत्रत्यादृष्टनाशस्य वृत्तित्वसम्पत्त्यर्थञ्च "**विनष्टशतवर्षभोगनाश्यतायोग्यादृष्टे**"ति। **तादृशसामानाधिकरण्येति** जनकत्वप्रतियोगित्वघटितसामानाधिकरण्येत्यर्थः। "**भोगाजन्यत्वाच्चे**"ति व्यभिचारोपपादकम्। "**कालिकविशेषणता विशेषणमि**"ति—तथाहि तादृशादृष्टनाशस्य भोगासमानकालीनतया तादृशकालिकविशेषणताघटितोभयसम्बन्धेन भोगवत्त्वाभावाद् भोगाजन्यत्वेऽपि न व्यभिचार इति भावः। "**एवञ्चे**"ति, तादृशोभयसम्बन्धेन भोगवददृष्टनाशत्वस्य भोगजन्यतावच्छेदकत्वे चेत्यर्थः। "**तत एव**"। तादृशधर्मस्य भोगजन्यतावच्छेदकत्वादेव। **तत्त्वज्ञानजन्यादृष्टनाशेऽपी**"त्यपिशब्दः प्रायश्चित्तजन्यादृष्टनाशसमुच्चयार्थः। "**व्यभिचारवारणा**"दिति। भोगं विना तत्त्वज्ञानेनादृष्टनाशस्थले तादृशादृष्टनाशस्य निरुक्तोभयसम्बन्धेन भोगवत्त्वाभावाद्भोगकार्यतावच्छेदकानाक्रान्ततया भोगं विनापि तदुत्पत्त्या व्यभिचाराभावादिति भावः। "**उपपत्तिरि**"ति—भोगदुरितध्वंसयोः कार्यकारणभावस्येति शेषः। एवञ्च तत्त्वज्ञानस्य साक्षादेव दुरितध्वंसजनकत्वे बाधाभावेन दुरितध्वंस एव मोक्ष इति स्थितम्।

अथैवं तत्त्वज्ञानस्य साक्षादेव धर्माधर्मरूपकर्मनाशकत्वे सिद्धेऽपि तस्य दुरितनाशत्वा-

1 B C D read जन्यतादिघटितगुरुतया तदपेक्षया लघोः स्वसामानाधिकरण्य (for जनकत्वप्रतियोगित्वादिघटितसामानाधिकरण्य)

2 B C D omit from दशवर्षभोगं जनयित्वा up to कालिकविशेषणं

3 D reads ॰नाश्यत्वमपि (for नाश्यत्वस्य)

**अथास्तु[1] तत्त्वज्ञानस्य साक्षादेव धर्माधर्मनाशकत्वम्, एवमप्यधर्मनाशस्थले स्वातन्त्र्येण न हेतुता कल्प्यते, धर्मनाशस्थलीयकार्यकारणभावेऽदृष्ट[2] नाशत्वस्यैव जन्यतावच्छेदकत्वोपगमेन तादृशकारणतयैव निर्वाहादिति[3] भवतामप्युपदर्शितदुरितनाशत्वरूपमुक्तित्वावच्छिन्नं प्रति तत्त्वज्ञानस्य हेतुताकल्पनमधिकमेवेति[4] चेन्न, मयापि तादृशदुरितनाशत्वरूपमुक्तित्वावच्छिन्नं प्रति तत्त्वज्ञानस्य हेतुता न कल्प्यते, त्वन्मतसिद्धोपदर्शितकार्यकारणभावबलादेव तदवच्छिन्नोत्पादनिर्वाहात्, मुक्तिसाधारणस्य यस्य कस्यचित् धर्मस्य तत्त्वज्ञानजन्यताव[5] च्छेदक-**

---

वच्छिन्नजन्यतानिरूपकत्वाभावेन दोषमाशङ्कते "**अथे**"त्यादिना। "**एवमपि**" तत्त्वज्ञानस्य निरुक्तरीत्या धर्माधर्मनाशकत्वे सत्यपि। "**अधर्मनाशस्थल**" इति। तथाहि तत्त्वज्ञानस्य धर्माधर्मनाशकत्वसिद्धान्ते धर्मनाशं प्रति तत्त्वज्ञानस्यैका कारणता, अधर्मनाशं प्रति चापरेत्यापाततः प्रतीयते। तत्राधर्मनाशस्थले कारणता अधर्मनाशत्वावच्छिन्नकार्यतानिरूपिता सैव स्वातन्त्र्येण हेतुतेति भावः। "**धर्मनाशस्थलीयकार्यकारणभावे**" धर्मनाशतत्त्वज्ञानयोर्जन्यजनकभावे। "**अदृष्टनाशत्वस्यै**"वेति। धर्मनाशाधर्मनाशोभयसाधारणादृष्टध्वंसत्वस्यैव, न तु धर्मनाशमात्रवृत्तिधर्मनाशत्वस्येत्यर्थः। "**तादृशकारणतयै**"वेति। अदृष्टनाशत्वावच्छिन्नकार्यतानिरूपिततत्त्वज्ञाननिष्ठजनकतयैवेत्यर्थः। "**निर्वाहा**"दिति। तत्त्वज्ञानस्य धर्माधर्मनाशकतानिर्वाहादित्यर्थः। "**भवतामपि**" दुरितध्वंसस्य मुक्तित्वमङ्गीकुर्वतामपि। न केवलं नित्यसुखाभिव्यक्तेर्मुक्तित्ववादिनामित्यपिशब्दार्थः। तथाहि यथा अस्मन्मते भवदीयसिद्धान्ताननुमताया नित्यसुखाभिव्यक्तित्वरूपमुक्तित्वावच्छिन्नं प्रति तत्त्वज्ञानहेतुताया अतिरिक्तायाः कल्पनेन गौरवम्, तथैव भवन्मतेऽप्यस्मत्सिद्धान्ताननुमताया दुरितध्वंसत्वरूपमुक्तित्वावच्छिन्नं प्रति तत्त्वज्ञानहेतुताया अतिरिक्तायाः कल्पनेनेति गौरवस्य मतद्वये तुल्यतया नैकस्यापि पर्यनुयोगार्हतेति भावः।

समाधत्ते "**नेत्या**"दिना। "**मयापि**"। दुरितध्वंसस्य मुक्तित्वमङ्गीकुर्वाणेनापि। "**न कल्प्यत**" इत्यत्र हेतुमाह "**त्वन्मते**"त्यादिना। "**त्वन्मतसिद्धोपदर्शि**"तेति नित्यसुखसाक्षात्काररूपमुक्तिस्वीकर्तृमीमांसकानुमतप्रागुपदर्शितेत्यर्थः। "**तदवच्छिन्नोत्पादनिर्वाहा**"दिति। दुरितनाशत्वावच्छिन्नोत्पत्तिनिर्वाहादित्यर्थः। तथाहि सतो नाशनिषेधार्थं प्रतियोगित्वसम्बन्धेन नाशं प्रति तादात्म्येन प्रतियोगिनः कारणत्वस्यावश्यकत्वेन विशेषतः प्रतियोगिविशेषनियन्त्रितस्यापि तस्योपादेयतया प्रतियोगित्वसम्बन्धेन दुरितनाशत्वावच्छिन्नं प्रति तादात्म्य-

1 B reads अथास्य तत्त्वज्ञानस्य साक्षाद्धर्मनाशं प्रति हेतुत्वं एवञ्च धर्मनाशस्थले तस्य (for अथास्तु—एवमप्यधर्मनाशस्थले)    2 A reads धर्म (for अदृष्ट)
3 B reads एतादृशकार्यकारणभावनिर्वाहात् (for तादृशकाणतयैव निर्वाहात्)
4 B ०मावश्यकमिति (for ०मधिकमेवेति)
5 A कार्यता (for जन्यता)

**त्वेऽपि मुक्तिमुद्दिश्य तत्त्वज्ञानादौ प्रवृत्त्युपपत्तेर्मुक्तिपदप्रवृत्तिनिमित्तधर्मस्य तत्त्वज्ञानजन्यतावच्छेदकत्वाभावेऽपि क्षतिविरहात्। यथा हि स्वर्गकामो यजेत इत्यादौ स्वर्गत्वसामानाधिकरण्येनैव यागजन्यता प्रतीयते, तथा मुक्तितत्त्वज्ञानयोः कार्यकारणभावबोधकश्रुतेरपि[1] मुक्तिपदप्रवृत्तिनिमित्तीभूतधर्मसामानाधिकरण्यमात्रेणैव मुक्तौ[2] तत्त्वज्ञानजन्यता बुध्यते[3], न तु तदवच्छेदेनेति न तस्या (तासाम् ?) अयोग्यताप्रसङ्गः।**

**अथ तत्त्वज्ञानस्य न[4] प्रारब्धकर्मनाशकता, तथा सत्युत्पन्नतत्त्वज्ञानिनां**

---

सम्बन्धेन दुरितत्वावच्छिन्नस्य कारणत्वं प्राप्तम्, अन्यथा भोगादिना धर्मनाशस्थलेऽपि प्रतियोगितया तदुत्पत्त्यापत्तेः। एवञ्च यत्र तत्त्वज्ञानेनाधर्मनाशस्तत्र तस्याधर्मरूपादृष्टनाशत्वावच्छिन्नस्यापि निरुक्तविशेषकारणसमवधानेन दुरितनाशत्वावच्छिन्नत्वनियमेन न दुरितनाशत्वावच्छिन्नोत्पादानुपपत्तिरिति भावः। न च दुरितनाशगततत्तद्व्यक्तित्वावच्छिन्नं प्रति तत्तद्दुरितव्यक्तित्वेन कारणत्वाङ्गीकारस्याप्यावश्यकतया तादृशकार्यकारणभावेनैव निरुक्तदोषवारणसम्भवाद् दुरितनाशत्वेन दुरितत्वेनोपदर्शितकार्यकारणभावो न प्रामाणिक इति वाच्यम्, यद्विशेषे यद्विशेषस्य तत्सामान्ये तत्सामान्यस्येति नियमेन दुरितनाशरूपकार्याभावप्रयोजकतावच्छेदकलाघवानुरोधेन च निरुक्तकार्यकारणभावस्यावश्यमभ्युपगन्तव्यत्वादिति।

अथवा अदृष्टनाशस्य धर्मनाशाधर्मनाशान्यतरस्वरूपत्वनियमात् तत्त्वज्ञानेन धर्माधर्मात्मकादृष्टनाशत्वावच्छिन्नस्य जननेऽधर्मनाशत्वावच्छिन्नस्यापि समुत्पादः सिध्यति।

नन्वेवं युक्तिबलात् तत्त्वज्ञानोत्तरं दुरितनाशत्वावच्छिन्नोत्पादस्य निर्वाहे सत्यपि दुरितध्वंसत्वावच्छिन्नं प्रति तत्त्वज्ञानस्याजनकत्वेन कथं निरुक्तमुक्तित्वावच्छिन्नसाधनताज्ञानाधीना तत्त्वज्ञाने विशेषदृशां प्रवृत्तिरित्याशङ्क्याह "**मुक्तिसाधारणस्ये**"त्यादि। मुक्तिसाधारणस्य मुक्तित्वसमानाधिकरणस्य। यस्य कस्यचिद्धर्मस्य मुक्तित्वेतरस्यापीत्यर्थः। "**प्रवृत्त्युपपत्ते**"रिति—फलनिष्ठजन्यतानिरूपितजनकताज्ञानस्यैव प्रवर्तकत्वोपगमेन मुक्तिनिष्ठतादृशजन्यतानिरूपितजनकत्वज्ञानादेव तत्त्वज्ञानादौ प्रवृत्तिसम्भवादिति भावः। "**मुक्तिपदे**"त्यादि—निरुक्तदुरितध्वंसत्वरूपमीमांसकप्रतिपक्षमतसिद्धमुक्तित्वधर्मस्येत्यर्थः।

मुक्तितत्त्वज्ञानयोः कार्यकारणभावबोधकश्रुतेरयोग्यत्वशङ्कां निराकर्तुमाह "**यथाहि**"-त्यादि। "**स्वर्गत्वसामाधिकरण्येनै**"वेति। न तु तदवच्छेदेनेत्यर्थः। न च स्वर्गकामो यजेतेत्यादावपि यागजन्यतायाः स्वर्गत्वावच्छिन्नत्वबोधे किं बाधकमिति वाच्यम्; तथा सति तादृशविधिवाक्यानामयोग्यत्वापातात् स्वर्गत्वस्य यागेतरकर्मजन्यस्वर्गेष्वपि वर्तमानत्वेन स्वर्गत्वस्य यागजन्यतावच्छेदकत्वस्याभ्युपगन्तुमशक्यतया कर्मभेदभिन्नस्वर्गेषु कल्पितस्य

1 C श्रुतिस्मृतिभ्यामपि (for श्रुतेरपि) 2 A omits मुक्तौ
3 B ०जन्यतां बोधयति 4 B C omit न

**मन्वादीनां भोगानुपपत्तेः, अतः प्रारब्धकर्मणां भेदस्तत्त्वज्ञानजन्यतावच्छेदककोटावश्यं निवेशनीयः। तथा च तत्त्वज्ञानादाहत्यैवा[1]त्यन्तिकदुरितनाशो[2] न सम्भवति, तदव्यवहितोत्तरक्षणोत्पत्तिकस्य[3] प्रारब्धान्यदुरितध्वंसस्य[4]**

---

तत्तद्वैजात्यविशेषस्यैव व्यभिचारवारणाय यागादिजन्यतावच्छेदकत्वकल्पनात्। नचैवं 'स्वर्गकामो यजेतेत्यादितः स्वर्गादिसाधनत्वमेव प्रतीयते, न तु तात्पर्यभ्रमादपीष्टान्तरसाधनत्वमिति समभिव्याहृतपदोपस्थापितकामनाविषयतावच्छेदकावच्छिन्नसाधनत्वे विधिप्रत्ययशक्तिः स्वीकार्ये'ति **गदाधरसन्दर्भादेः** का गतिरिति वाच्यम्, तत्रावच्छिन्नपदस्य विशिष्टमात्रपरतया जन्यतायास्तादृशकामनाविषयतावच्छेदकस्वर्गत्वसामानाधिकरण्यमात्रपरत्वात् स्वर्गत्वे यागजन्यतावच्छेदकत्वस्य तात्पर्याविषयत्वात्। एवमन्यत्रान्यत्रापि बोध्यम्। "**तस्याः**"—मुक्तितत्त्वज्ञानयोः कार्यकारणभावबोधकश्रुतेः। आदर्शग्रन्थे तस्या इत्यत्र तासामित्यपपाठः, एकवचनान्तश्रुतिपदेनैकत्वप्रकारेण प्रतिपादितायां श्रुतौ तासामिति बहुवचनान्ततत्पदप्रतिपाद्यबहुत्वान्वयायोगात्।

अथान्यथापि तत्त्वज्ञानस्यात्यन्तिकदुरितध्वंसे हेतुतां विघटय्य तस्य मुक्तिस्वरूपत्वानुपपत्तिमाशङ्कते "**अथे**"त्यादिना। "**तथा सति**"—तत्त्वज्ञानस्य प्रारब्धकर्मनाशकत्वे सति। "**उत्पन्नतत्त्वज्ञानिनां**"। वक्ष्यमाणभोगात् पूर्वतरमुपजाततत्त्वज्ञानशालिनाम्। ननु 'न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेदर्थप्रतिपत्तिकर' इत्यनुशासनविरोधे जाग्रत्यपि कथमुत्पन्नतत्त्वज्ञानिनामित्यत्र कर्मधारयोत्तरं मत्वर्थीयप्रत्यय इति नाशङ्कनीयम् 'भूमनिन्दाप्रशंसास्वि'त्यादिविशेषार्थपरत्वे बहुव्रीहेस्तादृशार्थप्रतीतिकरत्वाभावेन प्रकृतेऽपि तादृशस्य कस्यचिदर्थस्य विवक्षणान्मत्वर्थीयप्रत्ययस्य साधुतायाः सम्भवात्। तादृशार्थाविवक्षायान्तु उत्पन्नतत्त्वज्ञानानामित्येव पाठो युक्तः। "**मन्वादीनां**"। मन्वन्तराधिपतिप्रभृतीनां, तेषां मन्वन्तराधिपतित्वादिना भोगस्य शास्त्रेषु संकीर्तनात्। "**भोगानुपपत्ते**"रिति। शरीराद्यारम्भकप्रारब्धकर्मणोऽपि तत्त्वज्ञानेन नाशे कृते भोगावच्छेदकीभूतशरीराद्यभावादिति भावः। "**प्रारब्धकर्मणामित्या**"दि—तथाहि प्रारब्धकर्मेतरकर्मनाशत्वेन तत्त्वज्ञानत्वेन कार्यकारणभाव इति भावः। तथा च—तत्त्वज्ञानजन्यतावच्छेदककोटौ प्रारब्धकर्मणां भेदस्य निवेशे च। "**आहत्यै**"वेति। अविलम्बेन साक्षादेव तत्त्वज्ञानाव्यवहितोत्तरक्षण एवेत्यर्थः। "**प्रारब्धभोगानन्तरमेवे**"ति। भोगेन प्रारब्धदुरितस्य नाशान्निरुक्तोभयसम्बन्धेन तदानीन्तनदुरितध्वंसस्यैव दुरितवदन्यत्वरूपात्यन्तिकत्ववत्त्वादिति भावः। "**क्लृप्तकारणेन**" क्लृप्तभोगरूपकारणेन। "**हेतुता नास्ती**"ति। आत्यन्तिकदुःखध्वंसमिवात्यन्तिकदुरितध्वंसं प्रतीति शेषः। नन्वेवं भोगादेव प्रारब्धस्य क्षयो नान्यस्मादिति सिद्धान्ते सिद्धे 'पूर्वजन्मकृतं पापं व्याधिरूपेण बाधते। तच्छान्तिरौषधैर्दानैर्जपहोमार्चनादिभि' रित्यादिवचनव्याकोपस्तस्मात्

1 B D तत्त्वज्ञानादात्यन्तिक (for तत्त्वज्ञानादाहत्यैव आत्यन्तिक)
2 C D ध्वंसो (for नाशो) 3 B C D ०त्पन्नस्य (for ०त्पत्तिकस्य)
4 D reads अप्रारब्धदुरितध्वंसस्य (for प्रारब्धान्यदुरितध्वंसस्य)

**सामानाधिकरण्य[5]-कलिकविशेषणतोभयसम्बन्धेन [6]दुरितवत्तया आत्यन्तिकत्व-विरहात्, किन्तु प्रारब्ध[7] भोगानन्तरमेव। एवञ्चात्यन्तिकदुःखध्वंस इव आत्यन्तिकदुरितध्वंसेऽपि क्लृप्तकारणेनान्यथासिद्धतया तत्त्वज्ञानस्य हेतुता नास्तीति आत्यन्तिकदुःख[8] ध्वंसादिकस्य न मुक्तिपदार्थतोपपद्यत इत्यनायत्या नित्यसुखसाक्षात्कारो मुक्तिरित्येव स्वीकरणीयमिति चेन्न, तत्त्वज्ञाने जातेऽपि यावत् प्रारब्धकर्मणां भोगादिना न क्षयस्तावत् [9]प्रारब्धान्यकर्मणामपि न नाशः स्वीक्रियते, परन्तु भोगेन प्रारब्धकर्मनाश [10]एव तदितरदुरितानां नाशः, स एवात्यन्तिकतया मुक्तिपदार्थः। तत्र च क्लृप्तकारणेन तत्त्वज्ञानस्य नान्यथासिद्धिः, तादृशदुरितेन भोगाजननाद् भोगादिघटिततन्नाशकसामग्र्या अभावात्। अतस्तत्र तत्त्वज्ञानहेतुता निराबाधैव।**

---

प्रारब्धं हेत्वन्तरेणापि निवर्त्यमिति स्वीकार्यम्। अत एव हि रोगिणां प्रायश्चित्तविधानमिति केचित्। तन्न, **पराशरमाधवेन**—'नास्त्येवारब्धफलस्य प्रायश्चित्तम्, कुनखित्वादिनिवृत्त्यदर्शनात्। यद्यारब्धफलं प्रायश्चित्तान्निवर्तते, तदा नैसर्गिकमपि कुनखित्वादिकं प्रायश्चित्तान्निवर्तेत, नत्वेवमुपलभामहे। यथा मुक्तस्येषोर्लक्ष्यवेधोऽप्रतिसमाधेयः, तथा प्रारब्धफलं न प्रतिसमाधातुं शक्यम्।' इत्यादिना प्रकृतवस्तुतत्त्वस्य विपरीतस्य सिद्धान्तितत्वात् 'तच्छान्ति' रित्यादिवचनव्याकोपस्य सोपपत्तिकं परिहृतत्वाद् 'अनारब्धकार्य एव तु पूर्वे तदवधे' रित्यादिना शारीरकसूत्रकारादीनामपि तत्रैव सम्मतिलाभात्। "**आत्यन्तिकदुःखध्वंसादिकस्ये**"त्यादिपदादात्यन्तिकदुरितध्वंसपरिग्रहः। "**न मुक्तिपदार्थतोपपद्यत**" इति। आत्यन्तिकदुरितध्वंसस्य तादृशस्य मुक्तित्वे पूर्वोक्तरीत्यात्यन्तिकदुरितध्वंसत्वरूपमुक्तित्वसामानाधिकरण्येन तत्त्वज्ञानजन्यताया अपि निरुक्तात्यन्तिकदुरितध्वंसेऽसत्त्वेन मुक्तिमुद्दिश्य विशेषदृशां तत्त्वज्ञानप्रवृत्त्यनुपपत्तेर्मुक्तितत्त्वज्ञानयोः कार्यकारणभावबोधकश्रुतीनामप्रामाण्यप्रसङ्गाच्च। "**स्वीकरणीयमि**"ति। तन्मते तादृशतादृशदोषप्रसङ्गादिति भावः।

समाधत्ते "**ने**"त्यादिना। "**भोगादिने**"त्यादिपदेन प्रारब्धकर्मनाशकभोगघटितसामग्रीघटककारणान्तरपरिग्रहः, तेन भोगादिनेत्यस्य भोगघटितसामग्र्येत्यर्थः। "**प्रारब्धान्यकर्मणामपी**"ति। तत्त्वज्ञाननाश्यतावच्छेदकधर्माक्रान्तानामित्यादिः। **नाश** इति—तत्त्वज्ञानेनेति शेषः। तदेवं कदा तेषां नाश इत्याकाङ्क्षायामाह "**परन्त्वि**"त्यादि। "**प्रारब्धकर्मनाश**" इति सतीति शेषः। "**तदितरे**"ति प्रारब्धकर्मेतरेत्यर्थः। "**स एव**" प्रारब्धकर्मनाशोत्तरमुत्पन्नो दुरितनाश एव। आत्यन्तिकतया, तत्पूर्वमेव भोगघटितसामग्र्या प्रारब्धदुरितानां नाशेन

---

5 B reads स्वसामानाधिकरण्य

6 C D insert प्रारब्ध before दुरित

7 All the Mss read प्रारब्धकर्म०

8 B C दुरित (for दुःख)

9 D inserts कालं before प्रारब्ध

10 D reads काल एव

**अथैतदव्यवहितप्राक्क्षण[1] पर्यन्तं तत्त्वज्ञानस्यानवस्थितेः[2] कथं तत्र तत्त्वज्ञानस्य[3] हेतुतेति चेन्न, तावत्पर्यन्तं तत्त्वज्ञाना[4]सत्त्वेऽप्यदृष्टद्वारा तत्र[5] तत्त्वज्ञानहेतुतासम्भवात् ।**

**अथ तत्त्वज्ञानोत्पत्तौ तज्जन्यादृष्टविशेषोत्पत्ति[6]काले प्रारब्धान्यदुरितध्वंससामग्रीसमवधानात् कथं तदुत्पत्तौ विलम्बः[7] ? प्रारब्धकर्मणां प्रतिबन्धकत्वात्**

---

तदानीं सामानाधिकरण्येत्यादिप्रागुक्तोभयसम्बन्धेन दुरितवदन्यत्वरूपात्यन्तिकत्ववत्त्वेन । "**तत्र**" तादृशात्यन्तिकत्वविशिष्टदुरितध्वंसरूपमुक्तिपदार्थे । निरूपितत्वं सप्तम्यर्थः । तस्यान्यथासिद्धावन्वयः । "**क्लृप्तकारणेन**" भोगरूपकारणेन । "**तादृशदुरितेने**"ति । प्रारब्धनाशोत्तरसमुत्पन्ननाशप्रतियोगिना दुरितेनेत्यर्थः । "**भोगाजनना**"दिति । प्रारब्धनाशेन भोगकारणीभूतशरीरविरहादिति भावः । "**तत्तन्नाशके**"ति—तत्तद्दुरितनाशप्रयोजकेत्यर्थः । "**अत**" इति । यतो नान्यथासिद्धिरत इत्यर्थः । "**तत्रे**"ति । आत्यन्तिकदुरितध्वंसे इत्यर्थः । अत्र निरूपितत्वं सप्तम्यर्थः । तस्य च तत्त्वज्ञानहेतुतायामन्वयः । "**निराबाधैवे**"ति । अनन्यथासिद्धनियतपूर्ववर्तित्वस्यैव हेतुतास्वरूपत्वादिति भावः ।

एवञ्चात्यन्तिकदुरितध्वंस एव मोक्ष इति सिद्धान्ते नित्यसुखसाक्षात्कारस्य मुक्तित्ववादिना भट्टेनापादितस्य दोषस्य समुद्धरणादात्यन्तिकदुरितध्वंस एव मोक्ष इति स्थितम् ।

अथान्यथापि निरुक्तदुरितध्वंसे तत्त्वज्ञानहेतुतानुपपत्तिमाशङ्क्य निषेधति "**अथे**"-त्यादिना । "**एतदव्यवहिते**"ति । तत्त्वज्ञाने जातेऽपि भोगेन प्रारब्धकर्मनाशोत्तरं जायमाननिरुक्तदुरितध्वंसाव्यवहितेत्यर्थः । "**अनवस्थिते**"रिति । ज्ञानस्य द्विक्षणस्थायित्वेन तृतीयक्षण एव नाशादिति भावः । न च तत्त्वज्ञानस्यापेक्षाबुद्धिरूपत्वे तस्य त्रिक्षणस्थायितायामविवादेन निरुक्तदुरितध्वंसाव्यवहितप्राक्क्षणपर्यन्तं तत्सत्त्वं सम्भवतीति वाच्यम्; बहुतरप्रारब्धकर्मणां बहुतरभोगव्यक्तिनिवर्तनीयत्वेन तदर्थं बहुतरक्षणानामपेक्षाया आवश्यकत्वेन तावतापि तत्त्वज्ञानस्य तदव्यवहितपूर्ववर्तिताया उपपादयितुमशक्यत्वात् । कायव्यूहद्वारा क्षणेनैकेनैव तावतां भोगेन नाशाङ्गीकारकल्पनायामपि तत्त्वज्ञानक्षणमारभ्य प्रारब्धनाशक्षणपर्यन्तं चतुर्णां क्षणानामावश्यकत्वाद् गौरवपराहतत्वाच्च । "**कथ**"मित्यादि । कार्याव्यवहितपूर्ववर्तिन एव कारणत्वादिति भावः । "**तत्रे**"ति । निरुक्तदुरितध्वंस इत्यर्थः । निरूपितत्वं सप्तम्यर्थः । "**तत्त्वज्ञानासत्त्वेऽपी**"ति-समवायसम्बन्धेनेति शेषः । "**अदृष्टद्वारे**"-त्यादि । तथाहि तादृशदुरितध्वंसं प्रति तत्त्वज्ञानस्य न समवायेन हेतुता किन्तु स्वजन्या-

1 A D काल (for क्षण). 2 C D ज्ञानानवस्थितेः (for ज्ञानस्यानवस्थितेः)
3 C omits स्य 4 B reads पर्यन्तासत्त्वेऽपि (for ०पर्यन्तं तत्त्वज्ञानासत्त्वेऽपि)
5 B omits तत्र 6 B omits विशेष
7 B reads सत्त्वात् कथं तदुत्पत्तिरित्यर्थः (for समवधानात् कथं तदुत्पत्तौ विलम्बः)

**सामग्र्येव नास्तीति चेत् तर्हि प्रारब्धान्यादृष्टव्यावृत्तानुगतरूपस्य[1] निर्वक्तुमशक्यतया तेषां तत्तद्व्यक्तित्वेन प्रतिबन्धकता वाच्या, तथा च भट्टमते नित्यसुखसाक्षात्कारत्वावच्छिन्नं प्रति तत्त्वज्ञानस्य हेतुताधिक्येऽपि तदेव साधीयः,- अनन्तप्रतिबन्धकतानामेतन्मते आधिक्यात् ।**

---

दृष्टवत्त्वसम्बन्धेन, अतस्तत्त्वज्ञानजन्यादृष्टस्य तावत्कालपर्यन्तस्थायित्वेन तादृशसम्बन्धेन तत्त्वज्ञानस्यापि सत्त्वान्न तत्त्वज्ञानस्य कारणत्वानुपपत्तिरिति भावः।

अदृष्टेत्यत्र संस्कारेति युक्तं तत्त्वज्ञानस्यादृष्टनाशकत्वात् कल्पनागौरवाच्च । अदृष्टपदस्यातीन्द्रियपरतया तदेव प्रकृतमिति निपुणाः ।

"**तत्त्वज्ञानोत्पत्ता**"विति। सत्यामिति शेषः। "**तज्जन्ये**"त्यादि। तत्त्वज्ञानजन्यादृष्टविशेषोत्पत्त्यवच्छेदकतत्त्वज्ञानाव्यवहितोत्तरक्षण इत्यर्थः। "**प्रारब्धान्ये**"त्यादि। प्रारब्धान्यदुरितनाशं प्रति समवायेन स्वजन्यादृष्टवत्त्वादिसम्बन्धेन वा हेतुत्वे उभयथैव तदानीमात्मनि तत्त्वज्ञानसत्त्वेन तद्घटितसामग्री निराबाधेति भावः। "**कथ**"मित्यादि। सामग्रीसमवधानस्य स्वाव्यवहितोत्तरक्षणे कार्योत्पत्तिनियतत्वादिति भावः। तत्त्वज्ञानाव्यवहितोत्तरक्षणे दुरितध्वंससामग्रीसम्वलनविघटकप्रारब्धकर्मप्रतिबन्धकताकल्पनापेक्षया नित्यसुखसाक्षात्कारे तत्त्वज्ञानहेतुताकल्पन एव लाघवमनुसन्धाय तन्मुक्तित्वस्यैव साधीयस्त्वमिति सूचयितुमाह "**प्रारब्धकर्मणा**"मित्यादि। "**सामग्र्येव नास्ती**"ति। कार्यं प्रति प्रतिबन्धकाभावस्यापि कारणत्वात् तद्घटितकारणकूटस्यैव सामग्रीत्वादिति भावः। "**प्रारब्धान्यादृष्टव्यावृत्तानुगतरूपस्ये**"ति। प्रारब्धकर्मगतनिरुक्तप्रतिबन्धकतावच्छेदकत्वोपयुक्तस्येत्यादि। अनतिरिक्तवृत्तेर्धर्मस्यैवावच्छेदकत्वौचित्यादिति भावः।

"**निर्वक्तुमशक्यतये**"ति। न च प्रारब्धकर्मत्वस्यैव तथाभूतप्रतिबन्धकतावच्छेदकत्वोपयुक्तानुगतरूपस्य शक्यनिर्वचनत्वादिदमयुक्तमिति वाच्यम्; प्रारब्धकर्मत्वस्वरूपविचारेण तस्याप्यननुगतत्वव्यवस्थितेः। तथाहि प्रारब्धकर्मत्वं नाम भोग्यदशापन्नफलजनककर्मत्वम्, स्वजन्यवस्तुकालीनकर्मत्वं वा, तयोरुभयोरेव स्वत्वतद्घटितजन्यत्वजनकत्वान्यतरादिघटितत्वादननुगमदोषस्य दुरुद्धरत्वात्। यदि च सम्बन्धाननुगमस्यादोषतया जनकत्व-कालिकविशेषणत्वोभयसम्बन्धेन फलविशिष्टकर्मत्वादिकमेव प्रारब्धकर्मत्वमितिस्वरूपनिरूपणेन तदेव तादृशमनुगतं रूपमिति विभाव्यते, तदा फलविशिष्टकर्मत्वघटकफलत्वस्य जन्यत्वस्वरूपत्वेन तस्य स्वनिष्ठान्ययासिद्धघनिरूपकत्वादिघटितत्वात्तादृशरूपस्यापि स्वत्वघटितत्वेनाननुगमात्। न च फलत्वेन फलमनिवेश्य विशेषरूपेण तन्निवेशे नोक्तदोष इति वाच्यम्, तथात्वेन फलमुपादाय मैवमित्यादिवक्ष्यमाणग्रन्थेन प्रकारान्तरमाश्रित्य विहितेन दोषसमाधानेनास्यापि कल्पस्य फलतः स्वयमेव सूचितत्वात् प्रसक्तन्यूनताभङ्गात्।

न च सकलप्रारब्धकर्मानुगतं प्रारब्धत्वलक्षणमेकं वैजात्यमङ्गीकृत्य तस्यैव तादृशस्य

1 B D प्रारब्धेतरादृष्टान्तर-व्यावृत्तानुगतरूपस्य (for प्रारब्धान्यादृष्टव्यावृत्ता०)

**मैवम्; तत्त्वज्ञानजन्यादृष्टनाशं प्रति[1] प्रारब्धादृष्टानां भोगनाश्यादृष्टत्वे-नैव[2] प्रतिबन्धकता कल्प्यते, न तु तत्तद्व्यक्तित्वेन प्रतिबन्धकता[3]। एतत्स्थलीय-**

---

निरुक्तप्रतिबन्धकतावच्छेदकता शक्यकल्पनेति वाच्यम्; सुखादिकारणतावच्छेदकधर्मत्वादि-जातिभिः साङ्कर्येण तादृशस्य वैजात्यस्य कल्पयितुमशक्यत्वात्। तथाहि यत्र धर्मः प्रारब्ध-फलस्तत्र धर्मत्वप्रारब्धत्वयोः सामानाधिकरण्यम्, यत्र ब्रह्महत्यादिजनिताधर्मः प्रारब्ध-फलस्तत्र प्रारब्धत्वे धर्मत्वाभाववद्वृत्तित्वरूपं व्यभिचारित्वम्, यत्र धर्मो न प्रारब्धफलस्तत्र प्रारब्धत्वे धर्मत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वलक्षणमव्यापकत्वम्, इत्येवं रीत्या प्रारब्धत्वे धर्मत्वादिनिरूपितसाङ्कर्योपपत्तेः। धर्मत्वादिव्याप्यविरुद्धभेदेन नानावैजात्याङ्गी-कारेण सांकर्याभावोपपादने नानाकल्पनागौरवस्य लब्धास्पदत्वात्। तदेवमनायत्या प्रारब्ध-कर्मव्यक्तिभेदभिन्ना अनन्तप्रतिबन्धकता एव स्वीकार्या इति भावः।

तदेव साधीय इति निरुक्ततत्त्वज्ञानहेतुताधिक्यमेव प्रशस्यतरमित्यर्थः। नित्यसुख-साक्षात्कारं प्रति तत्त्वज्ञानस्य हेतुताया ऐक्याद् दुरितध्वंसं प्रति प्रारब्धकर्मप्रतिबन्धकतानाञ्च अनेकत्वादिति भावः। अत एव किमपेक्षया साधीयस्त्वमित्याकांक्षायामाह "**अनन्ते**"त्यादि। अनन्तप्रतिबन्धकतानामित्युपलक्षणम्। प्रारब्धकर्मव्यक्तिभेदेन नाना प्रतिबन्धकतानां कल्पनेन तत्तत्प्रारब्धकर्मव्यक्तिरूपप्रतिबन्धकाभावत्वेन कारणताया अपि कल्पनीयतया अनन्तकारणतानामप्याधिक्यं प्रतिपत्तव्यम्।

"**एतन्मते**"––आत्यन्तिकदुरितध्वंसस्य मुक्तित्वमते। "**आधिक्या**"दिति। ल्यब्लोपे पञ्चमी, अनन्तप्रारब्धकर्मव्यक्तिभेदेन कल्पितानामनन्तप्रतिबन्धकतानामाधिक्यमपेक्ष्येत्यर्थः। अपेक्षा हेतुत्वं वा पञ्चम्यर्थ इति केचित्।

आत्यन्तिकदुरितध्वंसं प्रति प्रारब्धकर्मणां प्रतिबन्धकत्वकल्पनायां भट्टेनोपपादितं गौरवाधिक्यं प्रतिषिध्य भट्टमते नित्यसुखभेदकारणताद्यनन्तपदार्थकल्पनाया आवश्यकत्वेन तन्मत एव गौरवाधिक्यं प्रतिपादयति "**मैवमि**"त्यादिना।

"**प्रतिबन्धकता कल्प्यत**"इति। भोगनाश्यादृष्टत्वस्यैव सकलप्रारब्धानुगतस्य प्रारब्धान्यदुरितव्यावृत्तरूपस्य सम्भवादिति भावः। "**न तु तत्तद्व्यक्तित्वेने**"ति एव-शब्दार्थविवरणम्। तथा च नैतन्मते प्रागुक्तगौरवाधिक्यमिति तात्पर्यम्।

ननु तत्त्वज्ञानजन्यादृष्टनाशत्वेन भोगनाश्यादृष्टत्वेन च प्रतिबध्यप्रतिबन्धकभाव-कल्पने प्रतिबध्यतावच्छेदकप्रतिबन्धकतावच्छेदकयोरुभयोरेव स्वत्वघटितजन्यत्वघटितत्वेन तत्तद्व्यक्तिविश्रान्ततया तथैव गौरवमिति चेन्न, जन्यत्वस्य सम्बन्धविधया प्रवेशेन जन्यत्व-सम्बन्धेन तत्त्वज्ञानविशिष्टादृष्टनाशत्वेन जन्यत्वसम्बन्धेन भोगविशिष्टनाशप्रतियोग्य-दृष्टत्वेन च प्रतिबध्यप्रतिबन्धकभावे तात्पर्योपगमात्। न च नाशत्वस्य जन्याभावत्वरूप-तया तावतापि गौरवं दुष्परिहरमिति वाच्यम्; प्रकृते जन्यत्वसम्बन्धेन तत्त्वज्ञानवैशिष्ट्यस्य

1 C D read नाशं प्रारब्ध (for नाशं प्रति प्रारब्ध) 2 C omits एव
3 C omits प्रतिबन्धकता

**नित्यसुखसाक्षात्कारं[1] प्रति दुरितत्वावच्छिन्नस्य प्रतिबन्धकत्वं भट्टेनाप्यङ्गीकार्यम्, परन्तु तादृशप्रतिबध्यताप्रतिबन्धकतावच्छेदकीभूत-नित्यसुखसाक्षात्कारत्वदुरितत्वापेक्षया एतन्मते प्रतिबध्यताप्रतिबन्धकतावच्छेदकगौरवम्। तन्मते तु नित्यसुखसाक्षात्कारत्वावच्छिन्नं प्रति तत्त्वज्ञानस्य[2] हेतुतायां[3] मनःसंयुक्तसमवायघटित[4] सामग्रीवशा[5] दिदानीं नित्यसुखे विषयतया साक्षात्कारवारणाय नित्यसुखान्यवृत्तिविषयतासम्बन्धेन[6] साक्षात्कारं प्रत्युपदर्शितनित्यसुखभेदस्य[7] हेतुताया आत्मभेदेना[8] नन्तानां सुखानां साक्षात्काराणाञ्च कल्पनं महागौरवग्रस्तम्।**

**वस्तुतस्तु प्रारब्धकर्मणां नाशे सति तत्त्वज्ञानान्तरं[9] कल्प्यते, तत्रैव च तादृशदुरितनाशजनकतावच्छेदकजातिरुपेयते, अतः प्राथमिकज्ञानानन्तरमेव न**

---

भोगवैशिष्टयस्यैव चाभावान्तरव्यावर्तकतया अभावत्वावच्छिन्नमात्रस्यैव प्रकृते नाशपदार्थत्वाङ्गीकारात्। तथाच जन्यत्वसम्बन्धेन तत्त्वज्ञानविशिष्टाभावत्वावच्छिन्नं प्रति जन्यत्वसम्बन्धेन भोगविशिष्टाभावप्रतियोग्यदृष्टत्वेन प्रतिबन्धकत्वमिति भावः। सम्बन्धाननुगमस्यादोषतायाः पूर्वमेव प्रतिपादितत्वेन नास्मिन् मते गौरवाशंका तदवस्थेति। एवञ्च प्रारब्धकर्मणां प्रतिबन्धकत्वकल्पनानिबन्धनगौरवाधिक्यदोषनिर्मोकेणात्यन्तिकदुरितध्वंसस्य मुक्तित्वसिद्धान्तो न दोषावह इति भावः।

अथवा जन्यत्वमत्राखण्डस्वरूपधर्मविशेषः, तस्य च स्वत्वाघटितत्वेन नाननुगमाशंकेति सन्तोष्टव्यम्।

न च वक्ष्यमाण—'वस्तुतस्तु' कल्प-कल्पनेनैवापादितस्याननुगमदोषस्य समाधास्यमानत्वादलमत्र तद्दोषपरिहारोपायपरिचिन्तयेति वाच्यम्, तथापि तत्र न्यूनताशङ्कापरिहाराय निरुक्तपद्धतिप्रदर्शनं सफलमिति ब्रूमः।

"**एतत्स्थलीये**"ति। मतान्तरे मुक्त्यात्मकतत्त्वज्ञानजन्यदुरितध्वंसरूपादृष्टनाशस्थलाभिषिक्तेत्यर्थः। मतान्तरे तादृशात्यन्तिकदुरितध्वंसस्येव भट्टमते नित्यसुखसाक्षात्कारस्यैव मुक्तिपदाभिषेकादिति भावः।

"**भट्टेनाप्यङ्गीकार्य**"मिति। अन्यथा तत्त्वज्ञानोत्पत्तिद्वितीयक्षणे दुरितध्वंसात् प्राक् सत्येव दुरितसमाजे नित्यसुखसाक्षात्कारे बाधकाभावेन मुक्तिसम्वलनप्रसङ्गात्। मुक्तिकाले दुरितसत्त्वस्वीकारे मुक्त्यनन्तरं तत्फलीभूतदुःखोत्पत्तेरपरिहार्यत्वेन "प्रियाप्रिये न स्पृशत' इत्यादिश्रुतिविरोधापत्तेः। भट्टेनापीत्यपिशब्देनात्यन्तिकदुरितध्वंसस्य मुक्तित्ववादी समुच्चीयते। तथाहि न केवलमात्यन्तिकदुरितध्वंसस्य मुक्तित्ववादिना तत्त्वज्ञान-

1 D inserts ०कारत्वावच्छिन्नं before प्रति 2 B C omit स्य 3 C D read तायाः (for तायां) 4 B C inserts सामान्य (before सामग्री) 5 B C बलात् (for वशात्) 6 B C D read विषयतया (for विषयतासम्बन्धेन साक्षात्कारं) 7 B C D omit स्य 8 D omits आत्मभेदेन 9 B reads ०ज्ञानानन्तरं

जन्यादृष्टनाशं प्रति भोगनाश्यादृष्टत्वेन प्रारब्धादृष्टानां प्रतिबन्धकत्वमङ्गीकार्यं, किन्तु नित्यसुखसाक्षात्कारस्य मुक्तित्ववादिना भट्टेनापि नित्यसुखसाक्षात्कारं प्रति दुरितत्वेन प्रतिबन्धकत्वमङ्गीकार्यमिति भावः।

नन्वेवमुभयोरेव सिद्धान्तयोस्तुल्यरूपे प्रतिबन्धकत्वकल्पनागौरवे 'यत्रोभयोः समो दोष' इत्यादिन्यायेन कथमेकस्य परिहाणमपरस्य चोपादानमित्याकांक्षायामेकतरप्रतिबध्यप्रतिबन्धकतयोरवच्छेदकगौरवमपरयोश्चावच्छेदकलाघवं हानोपादानयोः प्रयोजकमाह **"परन्त्वि"**त्यादिना। **"एतन्मते"**—तत्त्वज्ञानजन्यादृष्टनाशं प्रति भोगनाश्यादृष्टत्वेन प्रारब्धादृष्टानां प्रतिबन्धकत्वमते। **"प्रतिबध्यताप्रतिबन्धकतावच्छेदकगौरव"**मिति। एतन्मते प्रतिबध्यतावच्छेदकीभूतस्य तत्त्वज्ञानजन्यादृष्टनाशत्वस्य भट्टमतसिद्धप्रतिबध्यतावच्छेदकीभूतनित्यसुखसाक्षात्कारत्वापेक्षया एतन्मतसिद्धप्रतिबन्धकतावच्छेदकीभूतस्य भोगनाश्यादृष्टत्वस्य च तन्मतसिद्धप्रतिबन्धकतावच्छेदकीभूतदुरितत्वापेक्षया समधिकपदार्थघटितत्वादिति भावः।

ननु प्रकृतप्रतिबन्धकतावच्छेदकीभूतभोगनाश्यादृष्टत्वस्य सत्यपि भट्टमतसिद्धप्रतिबन्धकतावच्छेदकदुरितत्वजात्यपेक्षया सर्वथैव गुरुशरीरत्वे कथं भट्टमतसिद्धनिरुक्तप्रतिबध्यतावच्छेदकनित्यसुखसाक्षात्कारत्वापेक्षया प्रकृतप्रतिबध्यतावच्छेदकीभूतस्य तत्त्वज्ञानजन्यादृष्टनाशत्वस्य गुरुशरीरत्वम्, नित्यसुखसाक्षात्कारत्वस्य गुरुतरशरीरनित्यत्वघटितत्वात् तत्त्वज्ञानजन्यादृष्टनाशत्वस्य च पूर्वोक्तरीत्या जन्यत्वसम्बन्धेन तत्त्वज्ञानविशिष्टादृष्टाभावत्वपर्यवसन्नत्वादिति चेन्न, नित्यपदस्य निरवच्छिन्नपरतायाः पूर्वमेवावेदितत्वात् सुखविषयत्वस्यापि तत्रानिवेशेन महालाघवस्योपपादितत्वाच्च।

**"तन्मते तु"**—भट्टमते तु। **"सामान्यसामग्रीवशा"**दिति। संसारदशायां जन्यसुखसाक्षात्कारार्थं तादृशसामग्र्या अवश्यं कल्पनीयत्वादिति भावः। **"इदानीं"**—संसारदशायाम्। **"सुखानां"**—नित्यसुखानाम्। **"साक्षात्काराणां"**—तादृशसुखविषयकसाक्षात्काराणाम्। **"महागौरवग्रस्त"**मिति। तथाहि नित्यसुखसाक्षात्कारस्य मुक्तित्वमनभ्युपगच्छतां निरुक्तदुरितध्वंसस्य मुक्तित्ववादिनान्तु तत्तत्कल्पनाया अनपेक्षितत्वेन महालाघवादात्यन्तिकदुरितध्वंसस्य मुक्तित्वमतमेव सुप्रतिष्ठमिति भावः।

ननु 'आनन्दं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठित'मिति श्रुत्या मोक्षदशायां साक्षात्कारविषयीभूतं सुखं सिद्धम्, तत्र च लाघवज्ञानानुगृहीतानुमानवशान्नित्यत्वसिद्धेरुपपादितत्वात् प्रामाणिकगौरवस्य चादोषत्वाद् दुरितध्वंसस्य मुक्तित्वमते पूर्वोक्तप्रतिबध्यतावच्छेदकप्रतिबन्धकतावच्छेदकगौरवमेव तस्य मुक्तित्वसिद्धान्तं निषिध्य नित्यसुखसाक्षात्कारमेव मुक्तेः सिंहासने वासयति, तत् कुतस्तत्परीहार इत्याकाङ्क्षायामाह **"वस्तुतस्त्वि"**त्यादि।

**"तत्त्वज्ञानान्तरं कल्प्यत"** इति। एवञ्च यथास्मिन् मते तत्त्वज्ञानजन्यादृष्टनाशं प्रति प्रारब्धकर्मणां प्रतिबन्धकत्वकल्पनामूलमवच्छेदकगौरवं नास्ति तथा तत्त्वज्ञानस्यादृष्टद्वारा परम्परया कारणत्वकल्पनगौरवमपि नास्तीत्यवसेयम्।

ननु प्रारब्धनाशं सति तत्त्वज्ञानान्तरकल्पनेऽपि पूर्वोपजाततत्त्वज्ञानस्य ततोऽविशेषात् पूर्वतत्त्वज्ञानोत्पत्तिद्वितीयक्षणे तादृशदुरितनाशापत्तिप्रतिषेधार्थमेव प्रारब्धकर्मप्रतिबन्धकत्व-

**तदापत्तिः। प्राथमिकतत्त्वज्ञानञ्च[1] धर्माधर्मजनकीभूतवासनोच्छेदद्वारा धर्माधर्मान्तरानुत्पाद[2] उपयुज्यते। एवञ्च[3] प्रारब्धादृष्टानां प्रतिबन्धकत्वमेव न कल्प्यत इति नोक्तगौरवावकाशः।**

**एतेन तत्त्वज्ञानजन्यादृष्टनाशं प्रति भोगजन्यादृष्टनाशत्वेन प्रतिबन्धकत्वे भोगनाश्य[4]त्वस्य भोगजन्यनाशप्रतियोगित्वरूपतया जन्यत्वस्य चाव्यवहितोत्तरवर्तित्वादिघटिततया जन्यतायाश्चाननुगमात् प्रतिबन्धकतानामानन्त्यमिति परास्तम्।**

---

कल्पनाप्रयुक्तं गौरवमपरिहार्यमित्याशंक्याह "**तत्रैव चे**"त्यादि। "**अत इति**"। तत्रैवेत्येवकारस्येतरव्यवच्छेदार्थतया कल्पिततत्त्वज्ञानान्तरभिन्ने पूर्वोपजाततत्त्वज्ञाने नादृशजात्यनभ्युपगमादित्यर्थः। "**न तदापत्तिः**"। न निरुक्तदुरितनाशरूपकार्यापत्तिः, पूर्वोपजाततत्त्वज्ञाने तादृशजात्यनभ्युपगमेन प्रकृतकारणतावच्छेदकावच्छिन्नरूपापादकाभावादिति भावः।

नन्वेवमफलं प्राथमिकतत्त्वज्ञानमित्याशंक्याह "**प्राथमिके**"त्यादि। तथाहि प्राथमिकतत्त्वज्ञानानङ्गीकारे कल्पिततत्त्वज्ञानोत्पत्तिक्षणे धर्माधर्मजनकवासनानुवृत्त्या तद्द्वितीयक्षणे धर्माधर्मोत्पत्तौ बाधकाभावेन धर्माधर्मोत्पत्त्या तत्रत्यदुरितध्वंसे आत्यन्तिकत्वस्य विघटनात्। नहि तदेव तत्त्वज्ञानं तदा तदपि नाशयितुमीष्टे, प्रतियोगितासम्बन्धेन नाशं प्रति तादात्म्येन प्रतियोगिनः कारणत्वस्य क्लृप्ततया स्वोत्पत्तिक्षणे कस्यापि नाशस्य कल्पयितुमशक्यत्वात्। प्राथमिकतत्त्वज्ञानाङ्गीकारे तु तेनैव धर्माधर्मजनकवासनानां समुच्छेदे नैष दोषः। अतो नाफलं प्राथमिकतत्त्वज्ञानमिति भावः।

"**नोक्तगौरवावकाश**" इति। भट्टमतसिद्धप्रतिबध्यता-प्रतिबन्धकतावच्छेदकीभूतनित्यसुखसाक्षात्कारत्वदुरितत्वापेक्षया पूर्वोपदर्शितन्मतसिद्धप्रतिबध्यताप्रतिबन्धकतावच्छेदकगौरवापात इत्यर्थः।

"**एतेने**"ति। विजातीयतत्त्वज्ञानान्तरं कल्पयित्वा तस्यैव तादृशदुरितनाशहेतुताकल्पनयैव प्राथमिकतत्त्वज्ञानद्वितीयक्षणे तादृशदुरितनाशापत्तिप्रतिषेधोपपत्त्या प्रारब्धादृष्टानां तत्त्वज्ञानजन्यादृष्टनाशप्रतिबन्धकत्वाकल्पनेनेत्यर्थः।

"**भोगजन्यनाशप्रतियोगित्वरूपतये**"ति। भोगनाश्येत्यत्र नश्धातूत्तरवर्तिणिच्प्रत्ययेन नश्धात्वर्थनाशान्वयिजन्यत्वस्य णिजन्तनश्धातूत्तरकर्मप्रत्ययेन प्रतियोगित्वस्य प्रत्ययेन च तदभावस्य प्रतिपादनादिति भावः।

"**जन्यतायाश्चाननुगमादिति**"। जन्यत्वस्य प्रागुक्तरीत्या सम्बन्धविधया प्रवेशे जन्यत्वस्याखण्डधर्मविशेषरूपत्वे वा नोक्तदोष इति तु प्रतिपादितमेवाधस्तात्।

ननु तत्त्वज्ञानं मुक्तिकारणमिति प्रस्तुतम्। भगवता वात्स्यायनेन न्यायसूत्र-

1 B C D तु (for ञ्च) 2 D reads धर्माधर्मानुत्पादः 3 D omits एवञ्च
4 D omits त्व.

**तत्त्वज्ञानञ्च आत्मविशेष्यकशरीरादिभेदज्ञानम्, तच्च [1]साक्षात्कारात्मकमेव मोक्षहेतुः, अन्यादृशस्य संसारिणोऽपि सत्त्वात्[2]। तस्य हेतुता च विजातीयज्ञानत्वेन लाघवात्, न तूक्तरूपेण। तन्निष्ठवैजा[3]त्यस्य कारणतावच्छेदकतयैव सिद्धिः।**

**केचित्तु[4] आत्मविषयकनिर्विकल्पक[5]मेव हेतुः[6]। तमेव विदित्वातिमृत्युमेति, नान्यः पन्था विद्यतेऽयनाय इति-श्रुतावात्मपर[7]तत्पदोत्तरमेवकारश्रवणादात्ममात्रविषयकज्ञानानन्तरं मुक्तिरित्यर्थलाभादिति।**

**तदसत्; तादृशस्यैवकारस्य विदित्वेत्यनन्तरं योजनया तद्विषयकज्ञानानन्तरमेव मुक्तिरित्यस्यैव तादृशश्रुत्या बोधनात्। नचैवं नान्यः पन्था इत्यादिकं निरर्थकम् तथाविधैवकारादेव[8] तदर्थलाभादिति वाच्यम्; एवकारार्थविवेचनपरतया तत्सार्थक्यात्[9]।**

---

(१-१-२-सू) भाष्ये 'तत्रात्माद्यपवर्गपर्यन्तप्रमेये मिथ्याज्ञानमनेकप्रकारकं वर्तते, आत्मनि तावन्नास्तीति अनात्मन्यात्मेति' इत्याद्युपक्रम्य 'तत्त्वज्ञानन्तु खलु मिथ्याज्ञानविपर्ययेण व्याख्यातम्, आत्मनि तावदस्तीति, अनात्मन्यनात्मेति, एवं दुःखे अनित्ये अत्राणे सभये जुगुप्सिते हातव्ये च यथाविषयं वेदितव्य'मित्यादिसन्दर्भेण नानाविधमेव तत्त्वज्ञानमुपदिष्टम्। प्रमेयसूत्र—(१-१-६) भाष्ये च 'अस्य तु तत्त्वज्ञानादपवर्गो मिथ्याज्ञानात् संसार इत्यत एतदुपदिष्टं विशेषेणेति' तेनैव सकलप्रमेयज्ञानस्यैव मुक्तावुपयोगः सूचितः। वृत्तिकृता "**विश्वनाथेना**"पि प्रमेयपदव्युत्पत्तिमभिदधानेन 'प्रकृष्टं मेयं प्रमेयमिति योगार्थः। प्रकर्षश्च संसारहेतुमिथ्याज्ञानविषयत्वं मोक्षहेतुधीविषयत्वं वा" इति ग्रन्थेन 'अन्यतमाज्ञानेऽपि नापवर्ग इति प्रतिपादनाय वा प्रमेयमित्येकवचनमित्यन्ये' इति सन्दर्भेण चात्मादीनां सर्वेषां प्रमेयानां तत्त्वज्ञानमेव मुक्तिहेतुरिति प्रतिपादितमुपलभ्यते, तदत्र कीदृशं तत्त्वज्ञानं मुक्तिहेतुत्वेनाभिप्रेयत इत्याकाङ्क्षायामाह "**तत्त्वज्ञानञ्चेत्या**"दि। शरीरादीत्यादिपदादिन्द्रियादिपरिग्रहः। अत्र शरीरादीनां सर्वेषामात्मेतरत्वेनानुगमो बोद्धव्यः। तथाच आत्मा आत्मेतरभिन्न इत्येवमात्मविशेष्यकमात्मेतरभेदप्रकारकं साक्षात्कारात्मकं ज्ञानमेव साक्षान्मुक्तिकारणम्। तेन निरुक्तं तत्त्वज्ञानं मुक्तौ सन्निपत्योपकारकं प्रमेयान्तरतत्त्वज्ञानमप्यारादुपकारकमिति न भाष्याद्यनुपपत्तिः। "**अन्यादृशस्ये**"ति। आत्मा आत्मेतरभिन्न इत्यादिशब्दजन्यज्ञानादेरित्यर्थः। "**कारणतावच्छेदकतयै**"वेति—मुक्तिकारणतावच्छेदकतयैवेत्यर्थः। तथाहि निरुक्ततत्त्वज्ञाननिष्ठा मुक्तिकारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वादितिप्रयोगस्थलीय-

1 B D insert लौकिक before साक्षात् 2 A B omit सत्त्वात् 3 B reads वैजात्यञ्च एतादृशकारणताया एव सिद्धम् 4 C omits केचित्तु 5 B omits निर्विकल्पक 6 B C D insert मोक्ष before हेतुः 7 B reads श्रुनेरात्मबोधक (for श्रुतावात्मपर) 8 C एवकारेण (for एवकारादेव) 9 A reads तस्य सार्थकत्वात् (for तत्सार्थक्यात्).

**न च विपर्यययोजना[1] कल्पने गौरवमिति वाच्यम्; भवन्मतेऽपि[2] मुक्तिजनकज्ञाने आत्मत्वादिभानप्रतिबन्धकताकल्पने गौरवात्। तदकल्पने तु[3] तत्र मनःसंयुक्तसमवाय[4] घटित[5] सामग्रीबलादात्मत्वादिभाने बाधकाभावात्[6]।**

---

सामान्यपरामर्शस्यैवावच्छेदकस्य जातित्वे लाघवमिति लाघवज्ञानानुग्रहेण तादृशमुक्तिकारणतायाः वैजात्यविशेषावच्छिन्नत्वसाधकत्वादभीष्टसिद्धिः।

"**उक्तरूपेण**"। आत्मविशेष्यकात्मेतरभेदप्रकारकसाक्षात्कारत्वेन। वैजात्यस्य कारणतावच्छेदकत्वे कारणतावच्छेदककोटौ ज्ञानत्वमपि न निवेश्यं कारणीभूतनिरुक्तज्ञान एव तादृशवैजात्यस्य सत्त्वात्।

"**निर्विकल्पकमेवे**"ति। प्रकारताविशेष्यताशून्यं ज्ञानमेवेत्यर्थः। न तु पूर्वोक्तमात्मविशेष्यकशरीरादिभेदप्रकारकं ज्ञानमित्येवकारार्थः। "**हेतु**"रिति—मोक्षहेतुरित्यर्थः।

"**आत्ममात्रे**"त्यादि। एवशब्दस्येतरव्यवच्छेदार्थत्वेन तत्पदस्य चात्मपरत्वेन आत्मेतराविषयकात्मविषयकेत्यर्थस्य तमेवेत्यतो लाभात् समुदायात् तादृशार्थलाभः। "**तथाविधैवकारादेवे**"ति। 'विदित्वैव' इत्येवं विदित्वेत्यनन्तरमेव योजितैवकारादित्यर्थः। "**तदर्थलाभात्**"। नान्यः पन्था इत्यादिवाक्यप्रतिपाद्येतरोपायनिषेधरूपार्थलाभात्। "**विवेचनपरतया**"—विवरणपरतया। "**तस्य**"-नान्यः पन्था इत्यादिभागस्य। "**विपर्यये**"त्यादि। विपर्ययश्च योजना च विपर्ययययोजने तयोः कल्पन इति व्युत्पत्त्या विपर्ययस्य तमेवेति द्वितीयान्ततत्पदसमभिव्याहृतैवकारस्य ततो वियोजनस्य, एवशब्दं विना पठितस्य विदित्वेतिपदस्य तेन सह योजनायाश्च प्रयासस्य स्वीकरणीयतया गौरवमिति बोध्यम्, अन्यथाभिमतप्रकृतार्थप्रतीत्यसम्भवात्। निरुक्तयोजनावियोजनाकृतसमभिव्याहारस्यैव तथार्थे तात्पर्यग्राहकत्वसम्भवाद्, अन्यथा अर्थान्तरे तात्पर्यग्रहस्य प्रतिषेद्धुमशक्यत्वात्। न च विपर्ययययोजनेति द्वन्द्वे योजनाशब्दस्याल्पस्वरतया कथं न पूर्वपातित्वमिति वाच्यम्; तमित्यतो वियोजनं विना विदित्वेत्यनन्तरमेवकारस्य योजनाया असम्भवेन वियोजनार्थकविपर्ययस्यैवाधिकाभ्यर्हितत्वेन कालकृतपौर्वापर्याधिकारेण वा विपर्ययशब्दस्य पूर्वमुपादानात्। अथवा विपर्ययेण योजनेति तत्पुरुषेणाप्यभीष्टसिद्धिः।

"**भवन्मतेऽपि**"—द्वितीयान्ततत्पदार्थेनैव एवकारार्थस्यान्वयमाश्रित्य विदित्वेत्यन्तभागस्य आत्ममात्रविषयकज्ञानानन्तरमित्यर्थस्वीकर्तृनिर्विकल्पकहेतुतावादिमतेऽपि। "**मुक्तिजनकज्ञाने**"—मुक्तिजनकतयाभ्युपगते आत्ममात्रविषयकनिर्विकल्पकज्ञाने। "**आत्मत्वादी**"-त्यादि। "**बाधकाभावा**"दिति—तथाच बाधकाभावेनात्मत्वादेरपि तत्र भानेन तस्यात्ममात्रविषयकनिर्विकल्पकत्वव्याघातेन स्वाभिमतश्रुत्यर्थबाधप्रसङ्गस्य वारयितुमशक्यत्वात्। एवं स्थिते निरुक्तश्रुतिवाक्यस्य द्वितीयान्ततत्पदोत्तरैवकारसमभिव्याहारमाश्रित्यैव आत्म-

1 B omits योजना 2 C omits अपि 4 B C D omit तु 4 C D read समवायादि 5 A inserts सामान्य before सामग्री 6 D प्रतिबन्धकाभावात् (for बाधकाभावात्)

**केचित्[1] ईश्वरात्मविषयक[2]-साक्षात्कार एव मोक्षहेतुः। 'वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्ता'दित्येतादृशपूर्वप्रतीकेन ईश्वरात्मानमुपक्रम्य 'तमेव विदित्वे'त्यत्र तच्छब्देन[3] ईश्वरात्मपरामर्शादीश्वरात्मसाक्षात्कारस्यैव तादृशश्रुत्या बोधनात्। 'द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च तत्। शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।' इत्यादि[4] परमब्रह्मप्रतिपाद्येश्वरवेदनस्यैव**

---

मात्रविषयकज्ञानानन्तरं मुक्तिरित्यर्थप्रतीत्यवलम्बनेनात्मविषयकनिर्विकल्पकस्य मुक्तिहेतुतावादो निरस्तः, मुक्तिहेतुतया स्वाभिमतज्ञाने आत्ममात्रविषयकत्वस्य निर्विकल्पकत्वस्य च कथमप्युपपादयितुमशक्यत्वात्। गौरवप्रसङ्गेन तत्रात्मत्वादिभानप्रतिबन्धकताकल्पनाया असम्भवादिति ध्येयम्।

अधस्तादात्मविशेष्यकशरीरादिभेदप्रकारकसाक्षात्कारस्य मुक्तिहेतुत्वं समर्थितम्, परन्तु, 'वेदाहमेतं पुरुषं महान्त' मित्यादि-'तमेव विदित्वे'त्याद्यन्त–श्रुतिवाक्यानां 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते।' 'समं पश्यन् हि सर्वत्र समवस्थितमीश्वरम्। न हिनस्त्यात्मनात्मानं ततो याति परां गतिम्।' 'ज्ञात्वा मां शान्तिमृच्छति' इत्यादिस्मृतिवाक्यानाञ्च स्वरसेन मुक्तावीश्वरज्ञानप्रभवत्वमवधारयन्तः केचिदीश्वरविज्ञानविनिर्मोकेण परमपुरुषार्थभूतस्यापवर्गस्य जनिमसहमानास्तत्पक्षं प्रत्याचक्षाणा ईश्वरसाक्षात्कारमेव तत्कारणमभ्युपगच्छन्ति; तन्मतमेवाह **केचित्त्वि**त्यादिना। ईश्वरसाक्षात्कार एवेत्यत्र एशब्दस्येतरव्यवच्छेदार्थतया ईश्वरसाक्षात्कारस्य मुक्तिहेतुत्वव्यवस्थापनवज्जीवात्मतत्त्वज्ञानस्य प्रस्तुतपूर्वस्य मुक्तिहेतुत्वप्रत्याख्यानमपि गम्यते। स्वोक्तेरप्रामाण्यशङ्कां वारयितुं श्रुतिप्रमाणमाह **'वेदाहमेत'**मित्यादि। इदमुपलक्षणम्, पूर्वोक्तरूपाः स्मृतयोऽपि तस्मिन्नर्थे प्रमाणभूता अवगन्तव्याः। 'वेदाह' मित्यादिश्रुतेरयमर्थः,—तमसः परस्तादादित्यवर्णम् एतं महान्तं पुरुषमहं वेदेति योजना। तथाच तमसः—अज्ञानात्, परस्तात्—परतोवर्तमानमिति शेषः। तस्य सर्वज्ञत्वान्नहि तत्र कस्यचित् पदार्थस्याज्ञानमिति भावः। अथवा तमसः-भ्रमज्ञानात्, परस्तात् वर्त्तमानं भ्रमसामान्यशून्यम्, ईश्वरज्ञानस्य भ्रमीयविषयतारहितत्वात् तत्र भ्रान्तिप्रयोजकदोषास्पर्शात्। आदित्यवर्णम्—सहस्रकिरणसूर्यवन्महाज्योतिर्मयस्वरूपम्। व्यक्तञ्चैतत् 'तेजोराशिं सर्वतो दीप्तिमन्त' मित्यादिगीताविश्वरूपदर्शनादौ। तथा 'न तत्र सूर्यो भाति न चन्द्रतारकं, नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्वं, तस्य भासा सर्वमिदं विभाति।' इत्यादिश्रुतिषु। अथवा, आदित्यवर्णम्-आदित्यवत् स्वप्रकाशस्वरूपम्, स्वप्रकाशस्वरूपत्वञ्चास्य स्वप्रसादमात्रोपजनितविज्ञानविषयत्वरूपम्। तदेवोक्तं 'यमेवैष वृणुते तेन लभ्य' इत्यादिशास्त्रवाङ्मयेन। अथवा 'वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णन्तु वाक्षरे' इति कोषाद् वर्णः स्तुतिः, आदित्यानां देवानां वर्णः

1 C omits केचित् 2 A C omit विषयक 3 B D तत्पदस्येश्वरपरामर्शकतया (for तच्छब्देन ईश्वरात्मपरामर्शात्) 4 C inserts अन्यापि after इत्यादि

**तथात्वबोधनात्। आत्मविषयकशरीरादिभिन्नत्वप्रकारकात्मसाक्षात्कारश्च अहं गौरः, अहं श्याम इत्याकारकमिथ्याज्ञानजन्यवासनानाशकतया[1] मुक्तावुपयुज्यते। तदनुत्पादे[2] वासनासत्त्वेन विहितनिषिद्धयोः प्रवर्तमानस्य तत्त्वज्ञानिनो-धर्माधर्मान्तरोत्[3]पादसम्भवेनानिर्मोक्षप्रसङ्गात्। [4]नत्वीश्वरविषयकसाक्षात्कार**

---

म कर्मतासम्बन्धेन यत्रास्तीत्यस्त्यर्थे अच्प्रत्ययेन ब्रह्मादिसकलदेववन्द्यमित्यर्थः। एतं-पुरोवर्तिनम्। अनेन प्रकृतवेदने साक्षात्कारत्वलाभः। महान्तं पुरुषं—परमात्मानम्। महत्त्वञ्चास्य जीवात्मापेक्षया बोध्यम्। तच्च सर्वकर्तृत्वसर्वज्ञत्वादिधर्मवत्त्वरूपम्। अहं जीवः। वेद-वेद्मि इति। **पूर्वप्रतीकेन** पूर्ववर्तिना श्रुत्येकदेशेन। **ईश्वरात्मानं** जीवात्मविलक्षण-सर्वकर्तृत्वसर्वज्ञत्वादिलक्षणैश्वर्ययुक्तमात्मानं परमेश्वरपदाभिधानं परमात्मानमित्यर्थः। **तादृशश्रुत्या**–'तमेव विदित्वे'त्यादिश्रुत्या। "**बोधनादिति**"पञ्चम्यर्थ हेतुत्वस्य तथात्वबोधना-दित्युत्तरबोधनपदार्थेऽन्वयः। "**परमब्रह्मे**"ति परमब्रह्मपदेत्यर्थः। "**तथात्वबोधना**"दिति। मुक्तिहेतुत्वबोधनादित्यर्थः। अत्रत्यपञ्चम्यर्थस्य प्रयोज्यत्वस्य 'ईश्वरसाक्षात्कार एव मुक्ति-हेतु'रिति पूर्ववाक्यार्थेऽन्वयः।

नन्वेवं जीवात्मतत्त्वज्ञानस्य मुक्तिसाधकताबोधकश्रुत्यादीनां का गतिरित्यत आह "**आत्मविषयके**"त्यादि। आत्मविषयकेति जीवात्मविशेष्यकेत्यर्थः। शरीरादिभिन्नत्वेत्यत्रादि-पदमहिम्ना 'अहं क्षयी न', 'अहं जातो न' इत्यादिभेदा अप्युपादेयाः, अन्यथा समानविषयक-ज्ञानस्यैव विपरीतज्ञानविरोधितया तस्यैव च तज्जन्यवासनानाशकत्वेन आत्मविशेष्यक-शरीरेन्द्रियादिभिन्नत्वप्रकारकसाक्षात्कारस्य अहं क्षयीत्यादिज्ञानासमानविषयकस्य तज्जन्य-वासनानाशकत्वासम्भवेन तस्य प्रस्तूयमानरीत्या मुक्तावुपयोगित्वं नोपपद्यत इति ध्येयम्। स्वविरोधिनिश्चयस्य स्वजन्यवासनानाशकत्वं क्लृप्तमेव तन्त्रेष्विति तत्त्वम्। "**उपयुज्यते**" इति परम्परया प्रयोजको भवतीत्यर्थः।

तदेव परम्परया प्रयोजकत्वलक्षणमुपयोगित्वमुपपादयति "**तदनुत्पाद**" इत्यादिना। तदनुत्पादे—जीवात्मविशेष्यकशरीरादिभिन्नत्वप्रकारकसाक्षात्कारस्य अनुत्पाद इत्यर्थः। "**वासनासत्त्वेने**"ति। तादृशसाक्षात्कारनिवर्त्यमिथ्याज्ञानजन्यवासनाया निवर्तकान्तरा-भावात्तादृशवासनाया अवश्यं वर्तमानत्वेनेत्यर्थः। **विहितनिषिद्धयोः** कर्मणोरिति शेषः। "**प्रवर्तमानस्ये**"ति। मिथ्याज्ञानजन्यवासनाया रागादिद्वारा कर्मसु प्रवृत्तिजनकत्वादिति भावः। "**धर्माधर्मे**"त्यादि। विहितेन कर्मणा धर्मान्तरस्य निषिद्धेन च कर्मणा अधर्मा-न्तरस्योत्पादसम्भवेनेत्यर्थः। विहितनिषिद्धयोरित्यत्र विहितेति धर्माधर्मान्तरेत्यत्र धर्मेति च सम्पातायातम्, न तु प्रकृते तदुपयोगः। प्रकृतानिर्मोक्षप्रसङ्गे निषिद्धस्य कर्मणस्तज्जन्य-दुरितस्यैव च समुपयोगात्। तथाहि आत्यन्तिकदुरितध्वंसस्य मुक्तित्वमते तेनैव निषिद्ध-

1 तथाच ईश्वरसाक्षात्कार एव मोक्षहेतुरात्मविषयकशरीरादिभेदज्ञानञ्च एतादृश-वासनानाश एव हेतुः, न तु मोक्षे, किन्तु मुक्तावुपयुक्तमित्यर्थः। परम्परया प्रयोजकमिति भावः। 2 A तदनुपयोगे 3 D omits अन्तर 4 B D read न च (for न तु)

**आत्मविषयकमिथ्याज्ञानजन्यसंस्काररूपां वासनां निवर्तयितुमर्हति भिन्नविषयकत्वात्[1] । [2]समानविषयकविरोधिज्ञानस्यैव[3] संस्कारनाशकतायाः[4] क्लृप्तत्वात् ।**

---

कर्मजन्यदुरितेन मुक्तित्वाभिमतदुरितध्वंसस्य सामानाधिकरण्य-कालिकोभयसम्बन्धेन दुरितवत्तया क्वापि तत्र प्रागुक्तदुरितवदन्यत्वरूपात्यन्तिकत्वविरहेण स्वाभिमतमोक्षस्यैव विलोपप्रसङ्ग इति भावः। एवञ्च मुक्तिमुद्दिश्य विशेषदर्शिनां प्रवृत्तिरपि व्याहन्यत इति तात्पर्यम् ।

आत्यन्तिकदुःखध्वंसस्य मुक्तित्वमतेऽपि निषिद्धकर्मजन्यदुरितेन दुःखस्यावश्यं मोक्षाभिमानदशायामुत्पादनात् तदानीन्तनदुःखध्वंसस्यापि प्रागुक्तोभयसम्बन्धेन दुःखवत्तया निरुक्तदुःखवदन्यत्वरूपात्यन्तिकत्वानुपपत्त्या तथैव दोष इति बोध्यम् ।

नित्यसुखसाक्षात्कारस्य मुक्तित्वमतेऽपि निषिद्धकर्मजन्यदुरितस्य तत्प्रतिबन्धकताया अभ्युपगमेन स एव दोष इति ध्येयम् ।

अथवा प्रकृते विहितेति धर्मेत्यपि च सोपयोगम् । तथाहि 'अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशत' इति श्रुतिप्रतीकान्मुक्तिदशाया नियमेन सुखदुःखोभयनिर्मुक्तत्वं लभ्यते। ततश्च या सुतरामात्मनि मुक्तत्वाभिमते सुखदुःखोभयस्पर्शविनिर्मुक्ता दशा, सैव तत्तदात्मनो मोक्षदशेति स्थिते मिथ्याज्ञानजन्यवासनावशाद् विहितकर्मानुष्ठानतः समुपजातेन धर्मेण जनितस्य सुखस्य निषिद्धकर्मानुष्ठानतः समुपजातेनाधर्मेण च जनितस्य दुःखस्य तत्तदुत्तरं नियतस्पर्शेनात्मनो मोक्षदशैव सर्वत्र व्याहन्येतेति भावः ।

"**न त्वीश्वरे**"त्यादि । ज्ञानद्वयस्य भिन्नविषयकत्वं ग्राहयितुमीश्वरविषयकेति आत्मविषयकेति च विशेषणद्वयम् ।

"**समानविषयके**"त्यादि । "**विरोधिज्ञानस्ये**"ति स्वजनकज्ञानविरोधिनिश्चयस्येत्यर्थः । तेन समानविषयकत्वमपि प्रकृतसंस्कारजनकज्ञानेन बोध्यम् । विरोधिज्ञानयोरेकस्य नियमेनाभावाद्यतिरिक्तविषयकत्वेन कुत्रापि विरोधिनिश्चयस्य संस्कारजनकज्ञानसमानविषयकत्वं नोपपद्यत इत्यतः समानविषयकत्वमभावरूपविरोध्यंशमपहाय बोध्यम् । अभावनिश्चयवदभावव्याप्यनिश्चयस्यापि संस्कारनाशकत्वे स्वविरोधिनिश्चयत्वं स्वीयविशेष्यताविशिष्टविशेष्यताकविरोधिनिश्चयत्वमेव शक्यं निर्वक्तुम् । विशेष्यतायां विशेष्यतावैशिष्ट्यञ्च स्वावच्छेदकधर्मावच्छिन्नत्व-स्वनिरूपितप्रकारताविशिष्टप्रकारतानिरूपितत्वैतदुभयसम्बन्धेन, प्रकारतायां प्रकारतावैशिष्ट्यञ्च–स्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकत्वसम्बन्धावच्छिन्नाधेयत्वसम्बन्धेन । इत्थञ्च घटाभाववद्भूतलमितिज्ञानस्येव भूतलं घटाभावव्याप्यवदितिज्ञानस्यापि घटवद्भूतलमितिसंस्कारनाशकत्वोपपत्तिः । घटा-

1 C inserts प्रति after वासनां and reads वासनां प्रति नाशकत्वं स्वीकरणीयमिति वाच्यम् (for निवर्तयितुमर्हतीति भिन्नविषयकत्वात्) 2 B D insert किन्तु (before समान) 3 D ज्ञानमेव (for ज्ञानस्यैव) 4 C तया (for तायाः).

**अथ संस्कारविरोधिज्ञानयोर्नाश्यनाशकभावो विषयभेदेन विभिन्न एव विषयनिवेशानुरोधात्। एवञ्च वासनात्मक[1] संस्कारनाशे विरोधिज्ञानस्य हेतुताया अक्लृप्तत्वात् तत्र ईश्वरात्म[2] साक्षात्कारस्यापि[3] हेतुत्वं सम्भवतीत्यलमात्म-**

---

भाववद्भूतलमित्यादिविरोधिनिश्चयवद् घटाभावव्याप्यवद्भूतलमित्यादिविरोधिनिश्चयस्य घटवद्भूतलमित्यादिसंस्कारनाशकत्वानभ्युपगमे तु प्रकारतावैशिष्ट्यं स्वावच्छिन्नप्रतिबध्यता-निरूपितप्रतिबन्धकतावच्छेदकत्व — स्वावच्छिन्नज्ञानविरोध्यनुमितिजनकतावच्छेदकभिन्नत्वै-तदुभयसम्बन्धेन। विरोधिपदञ्च निश्चयस्य अप्रामाण्यज्ञानाद्यनास्कन्दितत्वलाभाय। तेन घटाभाववद्भूतलमित्यादिनिश्चयस्याप्रामाण्यज्ञानाद्यास्कन्दितस्य न घटवद्भूतलमित्यादि-संस्कारनाशकताप्रसङ्गः। घटवद्भूतलमित्यादिसंस्कारं प्रति घटो भूतलनिष्ठाभावप्रतियोगी घटो भूतलावृत्तिरित्यादिनिश्चयस्यापि नाशकत्वे तु निरुक्तसमानविषयकविरोधिनिश्चयत्व-मन्यथा कथञ्चिन्निर्वाच्यम्। तत्र विरोधित्वाभिमतनिश्चयप्रतिबध्यतावच्छेदकस्वीयकिञ्चित्-प्रकारताविशिष्टविषयताकत्वे सति तन्निरूपितविशेष्यताविशिष्टविषयताकत्वमेव स्वसमान-विषयकत्वं वाच्यम्। प्रकारतावैशिष्ट्यं स्वावच्छेदकधर्मावच्छिन्नत्व-स्वावच्छिन्नप्रतिबध्य-तानिरूपितप्रतिबन्धकतावच्छेदकप्रकारतावच्छेदकधर्मावच्छिन्नत्वैतदन्यतरसम्बन्धेन। विशे-ष्यतावैशिष्ट्यञ्च स्वावच्छेदकधर्मावच्छिन्नत्वसम्बन्धेन। घटवद्भूतलमित्यादिज्ञाने घटाभाववद्भूतलमित्यादिज्ञानसमानविषयकत्वरक्षार्थं प्रकारतावैशिष्ट्यघटकसम्बन्धद्वितीय-दलमिति। इह मौलं विरोधिपदमेवातिप्रसङ्गवारकम्।

समानविषयकविरोधिनिश्चयस्य संस्कारनाशकतायाः क्लृप्तत्वेऽपि आत्मविशेष्यक-शरीराद्यभेदप्रकारकसंस्कारनाशार्थं आत्मविशेष्यकशरीरादिभिन्नत्वप्रकारकबुद्धेरनपेक्षणमा-शङ्क्य तत्समाधानमुपक्रमते "**अथे**"त्यादिना।

"**विषयनिवेशानुरोधा**"दिति। अनुपदमेव समानविषयकविरोधिज्ञानस्य संस्कारनाश-कत्वमुक्तम्। तत्र यदि सामान्यतः संस्कारनाशं प्रति सामान्यतो विरोधिज्ञानस्य कारणत्वं स्यात्, तदा प्रतियोग्यविशेषितविरोधितायाः सर्वनिश्चयसाधारणत्वेन येन केनापि निश्चयेन यस्य कस्यापि संस्कारस्य नाशः प्रसज्येत। अतो विषयविशेषनिवेशेन घटप्रकारकभूतल-विशेष्यकसंस्कारनाशं प्रति घटाभावप्रकारकभूतलविशेष्यकनिश्चयत्वादिरूपेण कारणत्वं प्रसक्तातिप्रसक्तिनिवृत्तये कल्पनीयम्। एवञ्च विषयविशेषनिवेशप्रयुक्तो विभिन्न एव संस्कारविरोधिज्ञानयोर्नाश्यनाशकभाव इति भावः।

नन्वेवं संस्कारविरोधिज्ञानयोर्विभिन्ने नाश्यनाशकभावे सत्यपि शरीराद्यभेदप्रका-रकात्मविशेष्यकसंस्कारनाशं प्रति शरीरादिभिन्नत्वप्रकारकात्मविशेष्यकनिश्चयत्वेनापि कारणत्वव्यवस्थितेः तादृशसंस्कारनाशार्थं तादृशबुद्ध्यपेक्षायाः कथं निवृत्तिरित्याकाङ्क्षाया-

1 B साधारणात्मक (for वासनात्मक) 2 B (C D) insert विषयक (before साक्षात्कार) 3 All the Mss. read साक्षात्कारस्यैव (for ०कारस्यापि)

**विषयकशरीरादिभिन्नत्वप्रकारक[1] बुद्धयेति चेन्न, घटादिधर्मिक[2] शरीरादि-तादात्म्य[3] धीजन्यसंस्कारस्य विनैवात्म[4] साक्षात्कारं तद्धर्मिकशरीरभेदबुद्धया विनाशात्तत्र तद्धेतुताकल्पनमावश्यकमिति। तत्र च धर्मिविशेषो न निवेश्यते, [5] धर्मिभेदेनानन्तनाश्यनाशकभावकल्पनापत्तेः। किन्तु समानधर्मिकत्व-स्वसामानाधिकरण्योभयसम्बन्धेन तादृशविरोधिज्ञानस्य प्रतियोगितासम्बन्धेन[6] तादृश-संस्कारनाशं प्रति हेतुता कल्प्यते। इत्थञ्च क्लृप्त[7] कार्यकारणभावेनोपपत्तावात्म-विशेष्यकमिथ्याज्ञानजन्यसंस्कारनाशे[8] विरोधिज्ञानस्य कारणत्वान्तरं (न) कल्प्यते। ईश्वरविषयकसाक्षात्कारस्य तन्नाशकत्वोपगमे तु कार्यकारणभावान्तर-कल्पनाप्रसङ्गः[9]। एवञ्च[10] आत्मविशेष्यकशरीरादिभेदबुद्धिरावश्यकी।**

---

माह "**एवञ्चे**"त्यादि। "**वासनात्मके**"ति—शरीराद्यभेदप्रकारकात्मविशेष्यकमिथ्याज्ञान-जन्यवासनात्मकेत्यर्थः। "**विरोधिज्ञानस्य**" शरीरादिभिन्नत्वप्रकारकात्मविशेष्यकनिश्चयस्य। "**हेतुताया अक्लृप्तत्वा**"दिति। तादृशमिथ्याज्ञानजन्यसंस्कारनाशे शरीरादिभिन्नत्वप्रकार-कात्मविशेष्यकनिश्चयत्वादिना कारणत्वकल्पनायामीश्वरसाक्षात्कारत्वापेक्षया गौरवप्रति-सन्धानेन प्रतिबन्धादेव तत्कल्पनासम्भवादिति। अन्यत्र तु संसारदशायामीश्वरसाक्षात्कार-रूपकारणासम्भवेन संस्कारनाशार्थं तादृशतादृशविशेषनिश्चयानां सुतरामपेक्षणीयतया तत्र तत्र तत्तद्विशेषघटितनिश्चयत्वेन हेतुताकल्पनस्यापरिहार्यत्वेन तादृशहेतुता क्लृप्तेति भावः। "**तत्र**"वासनात्मकसंस्कारनाशे। "**अल**"मित्यादि। तत्र ईश्वरसाक्षात्कारेणैव तादृशतत्त्वज्ञाननिवर्त्यत्वाभिमतमिथ्याज्ञानवासनाया निवर्तनादिति भावः।

आशङ्कां समाधत्ते "**ने**"त्यादिना। "**घटादौ**"त्यादि। "**विनैवेश्वरसाक्षात्कार**"-मिति। तादृशसंस्कारनाशस्य संसारदशायां सम्भवात् तदानीञ्चेश्वरसाक्षात्काररूप-कारणासम्भवादिति भावः। "**तत्र**" तादृशसंस्कारनाशे। "**तद्धेतुते**"ति। तस्याः घटादि-धर्मिकशरीरभेदबुद्धेर्हेतुतेत्यर्थः। "**किन्त्व**"त्यादि। एकधर्मिकविरोधिज्ञानेनापरधर्मिकसमाना-धिकरणसंस्कारनाशवारणाय "**समानधर्मिकत्वे**"ति। समानधर्मिकव्यधिकरणविरोधिज्ञानेन व्यधिकरणसमानधर्मिकसंस्कारनाशवारणाय "**सामानाधिकरण्ये**"ति। नन्वेवं ध्वंसप्राग-भावयोः प्रतियोगिसमवायिदेशवृत्तित्वनियमेन संस्कारनाशाधिकरणात्मनि तादृशोभय-सम्बन्धेन विरोधिज्ञानाभावात् कथं कार्यकारणयोः सामानाधिकरण्यमित्याशङ्कायामाह

1 B C D omit भिन्नत्वप्रकारक and read शरीरादिभेदबुद्धयेति 2 A C read विषयक (for धर्मिक) 3 D inserts विषयक before धी. 4 B C D read ईश्वर (for आत्म) 5 B inserts तदनुप्रवेशे च, C inserts तन्निवेशे before धर्मि 6 B omits प्रतियोगितासम्बन्धेन C reads प्रतियोगिज्ञानस्य (for प्रतियोगितासम्बन्धेन) 7 C तादृश (for क्लृप्त) 8 B नाशं प्रति (for नाशे) 9 B reads ०भावानन्तकल्पना (for ०भावान्तर) and A omits कल्पना 10 BCD इति (for एवञ्च).

**न च तादृशबुद्धेरवश्यापेक्षणे[1] मुक्तिहेतुत्वमपि तस्या एवोचितम्, अन्यथा अक्लृप्तस्ये[2]श्वरसाक्षात्कारस्य[3] कल्पनया गौरवमिति वाच्यम्[4], उपदर्शितश्रुतिसिद्धाया ईश्वरविषयकसाक्षात्कारस्य[5] मुक्तिहेतुताया गौरवेणापाकर्तुमशक्यत्वात् ।**

**न चेन्द्रियाप्रत्यासन्नतया महेश्वरस्य साक्षात्कार एव दुर्घट इति वाच्यम्, आत्मनी[6]वेतरत्रापि मनःसंयोगरूपप्रत्यासत्तिसत्त्वे[7] तन्मानस[8]साक्षात्कारे बाधकाभावात् । इदानीन्तु दुरितेन प्रतिबन्धाद् विजातीयमनःसंयोगविरहाद्वा[9] न [10]साक्षात्कारापत्तिरित्याहुः ।**

---

"**प्रतियोगितासम्बन्धेने**"ति । तथाच प्रतियोगितयोक्तनाशस्य संस्कारवृत्तित्वाददोषः । अत्र मते विरोधिज्ञानस्य संस्कारनाशकत्वे समानधर्मिकत्वं तन्त्रमिति विशेषो बोध्यः ।

"**क्लृप्तकार्यकारणभावेन**"—समानधर्मिकत्वेत्यादिग्रन्थोक्तकार्यकारणभावेन । "**कारणत्वान्तरं**" आत्मविशेष्यकशरीराद्यभेदप्रकारकसंस्कारनाशत्वावच्छिन्नं प्रति आत्मविशेष्यकशरीरादिभिन्नत्वप्रकारकनिश्चयत्वेनापरं कारणत्वम् । "**न कल्प्यत**" इति । अतो न कारणत्वान्तरकल्पनाप्रयुक्तगौरवाशङ्केति भावः ।

"**तन्नाशकत्वोपगमे**" प्रागुक्तसंस्कारनाशजनकत्वस्वीकारे । "**कार्यकारणभावान्तरकल्पनाप्रसङ्ग**"इति । तथाहि यत्र साधारणसंस्कारनाशस्थले परमेश्वरसाक्षात्कारासम्भवस्तत्रत्यसंस्कारनाशार्थं पूर्वोक्तरीत्या एकः कार्यकारणभावः, प्रकृतस्थले चात्मविशेष्यकशरीरादिभिन्नत्वप्रकारकबुद्धेरनभ्युपगमेन पूर्वोक्तकार्यकारणभावेन निरुक्तमिथ्याज्ञानजन्यवासनानाशानुपपत्त्या तादृशवासनानाशार्थं तादृशवासनानाशत्वेनेश्वरसाक्षात्कारत्वेन चापरः कार्यकारणभाव इत्येवमेतन्मते कार्यकारणभावद्वयप्रसङ्गेन महद्गौरवमिति भावः । "**एवञ्चे**"ति । अत्र तादृशशरीरादिभेदबुद्ध्यनङ्गीकारे पूर्वोक्तगौरवापादककार्यकारणभावान्तरकल्पनाप्रसङ्गरूपदोषेणेत्यर्थः । "**तस्या एवे**"ति । अत्र निरुक्तवासनानाशार्थमवश्यमपेक्षणीयाया आत्मविशेष्यकशरीरादिभेदबुद्धेरेवेत्यर्थः । न तु प्रस्तुतेश्वरसाक्षात्कारस्येत्येवशब्दव्यवच्छेद्यम् । "**अन्यथे**"ति । तादृशबुद्धेर्मुक्तावहेतुत्वे ईश्वरसाक्षात्कारस्य च तत्र हेतुत्वे इत्यर्थः । "**उपदर्शितश्रुतिसिद्धाया**" इति । 'तमेव विदित्वातिमृत्युमेती'त्यादिपूर्वोपन्यस्तश्रुतिसिद्धाया इत्यर्थः । एतेन प्रकृतगौरवस्य प्रामाणिकत्वेन तस्य हेयता निरस्ता भवति ।

प्रकृतेश्वरसाक्षात्कारस्याप्रसिद्धिमाशङ्क्य समाधत्ते "**न चे**"त्यादिना । "**आत्मनीव**"

---

1 A ०रावश्यकत्वापेक्षया (for ०रवश्यापेक्षणे) 2 D अन्यस्य (for अक्लृप्तस्य) 3 B D insert विषयक before साक्षात्कारस्य 4 All the Mss गौरवप्रसङ्गाच्च इति वाच्यम् 5 B प्रत्यक्षस्य (for साक्षात्कारस्य) 6 7 C सत्त्वेन 8 C तद्गोचर (for तन्मानस) 9 B omits वा and reads विरहाच्च 10 C D insert तद्गोचर before साक्षात्कार

**तच्चिन्त्यम्[1], 'न वा अरे पत्युः कामाय पतिः प्रियो भवती'त्यादिश्रुत्या ईश्वरासम्भ[2] वि-प्रियत्वाख्यानेन[3] जीवमुपक्रम्य 'आत्मा वा अरे श्रोतव्यो मन्तव्यो निदिध्यासितव्यः साक्षात्कर्तव्यश्च, एतावदेव खल्वमृतत्व' मिति श्रुतौ[4] आत्मनः[5] साक्षात्कारस्य मोक्षहेतुत्वं प्रतिपादितमतो जीवात्मतत्त्वज्ञानस्यैव तथात्वं पर्यवसितम्[6]। एतावदेवेत्यस्यात्मविषयकश्रवणादिरूपवित्तिचतुष्टयमेवेत्यर्थः। अमृतत्वम् अमृतत्वसाधनमित्यर्थः[7], कारणे कार्योपचारात्। ईश्वर[8] विषयक-**

---

जीवात्मनीव। अहं सुखी अहं दुःखीत्यादिरूपेण जीवात्मसाक्षात्कारस्य मानसस्य सर्वसिद्धतया तस्य दृष्टान्ततयोपन्यासः। **"इतरत्रापि"**–परमात्मपदाभिधेये महेश्वरेऽपि। **"बाधकाभावा"**दिति। अत एव प्रकृते मोक्षहेतुतया समुपात्त ईश्वरसाक्षात्कारो नाप्रसिद्ध इति भावः।

नन्वेवं संसारदशायामपि परमात्मनि तादृशमनःसंयोगरूपसन्निकर्षाबाधादीश्वरसाक्षात्कारप्रसङ्गादतिप्रसङ्गः कथं रोद्धव्य इत्याकाङ्क्षायामाह **"इदानीन्त्व"**त्यादि। इदानीं संसारदशायाम्।

ननु दुरितस्य महेश्वरसाक्षात्कारप्रतिबन्धकतया संसारदशायामतिप्रसङ्गनिरासे मुक्तेः पूर्वं कथं मुक्तिकारणतया सम्मतस्येश्वरसाक्षात्कारस्य समुत्पादः, आत्यन्तिकदुरितध्वंसरूपमुक्तेर्दुरितात्मकस्वप्रतियोगिजन्यतया तदव्यवहितपूर्वं तत्सत्त्वस्यावश्यकतया ततः पूर्वमपि तत्सत्त्वादित्यतो विजानीयेत्यादिद्वितीयहेत्वनुसरणम्। तथाहि—मानससाक्षात्कारकारणीभूतः सन्निकर्षरूपो मनःसंयोगो द्विविधः, साधारणो विजातीयश्च। साधारणमनःसंयोगेन अहं सुखीत्यादिजीवात्मसाक्षात्कारो जायते। विजातीयमनःसंयोगेन च महेश्वरसाक्षात्कारो भवति। तच्च वैजात्यं, योगजधर्मादिप्रयोज्यमिति। सांसारिकमनःसंयोगे तदभावात् संसारदशायां कारणतावच्छेदकावच्छिन्नव्यतिरेकादेव तादृशसाक्षात्कारव्यतिरेक इति भावः। **"साक्षात्कारापत्ति"**रिति। प्रकृतेश्वरसाक्षात्कारापत्तिरिति। **"आहु"**रित्यस्य पूर्वोपक्रान्तेन केचित् इत्यनेनान्वयो बोध्यः।

आहुरित्यनेन कल्पस्यास्य अस्वरसः सूचितः, तद्बीजञ्च तच्चिन्त्यमित्यादिना स्वयमेव ग्रन्थकारः प्राह।

**"न वेत्या"**दि। अस्या एव श्रुतेरपरोंऽशः 'न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवती' ति। प्रियत्वाख्यानेनानौपाधिकप्रेमास्पदत्वप्रकाशनेनेत्यर्थः। तथाहि श्रुतिरियमात्मभिन्नस्य सर्वस्यैव वस्तुनः सोपाधिकप्रेमास्पदत्वमात्ममात्रस्यैव च निरुपाधिकप्रेमास्पदत्वं गमयति। तदुक्तं ब्रह्मसूत्रप्रथमाध्यायचतुर्थपादस्याष्टादश-

1 B omits तच्चिन्त्यम् 2 A reads ईश्वरासम्भवे D सम्भवेन 3 D ०ख्यानमेव 4 B D श्रुत्या (for श्रुतौ) 5 B D omit आत्मनः 6 B omits अतोजीवात्मतत्त्वज्ञानस्यैव तथात्वं पर्यवसितम् 7 C omits इत्यर्थः 8 C inserts आत्म before विषयक

**ज्ञानस्य मुक्तिहेतुताबोधकश्रुत्यादीनाञ्च (न्तु) ईश्वराभिन्नत्वेन जीवात्मभावनायाः[1] परम्परया[2] मुक्तिप्रयोजकत्वे[3] तात्पर्यं तत्त्वमसीति वाक्यस्वरसादवसीयते, न त्वीश्वरविषयक[4] लौकिकसाक्षात्कारस्य मुक्तिजनकतायां तत्तात्पर्यम्, तथा सति तादृशलौकिकसाक्षात्कार-तत्सामग्र्यादीनां कल्पने गौरवादिति ।**

---

सूत्रभाष्यभामत्यां **वाचस्पतिमिश्रैः**—'आत्मौपाधिकं हि प्रियत्वमेषां, न तु साक्षात् प्रियाण्येतानि, तस्मादेतेभ्यः पतिजायादिभ्यो विरम्य यत्र साक्षात् प्रेम स एव आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इति । तत्रैव कल्पतरुपरिमले **श्रीमदप्पय्यदीक्षितेनापि** 'पतिजायादिवाक्येषु वैशब्दः प्रसिद्ध्यनुवादकः, प्रसिद्धं ह्येतत्तवापि मैत्रेयि पत्यादयो जायादीनां पत्यादिप्रयोजनाय प्रिया न भवन्ति किन्तु स्वप्रयोजनाय। अत एव तेषु स्वेष्टसम्पादकत्वदशायामिव स्वानिष्टसम्पादकत्वदशायां न प्रेमा, अतः सोपाधिकं प्रियत्वमेतेषामात्मन एव निरुपाधिक' मिति। ईश्वरस्यापि स्वात्मभिन्नत्वेन तत्रापि न निरुक्तश्रुतिवेदितं निरुपाधिकप्रियत्वमिति। अत एवोक्त"**मीश्वरासम्भवी**"ति। तच्च 'न वा अरे' इत्यादिश्रुतौ परमात्मनः परमेश्वरपदाभिधेयस्योपक्रमगोचरत्वशंकाव्युदासार्थम्। एतत्तत्त्वमधिकृत्य **गदाधरस्तु** स्वीयमुक्तिवादे प्राह—'न वा अरे पत्युः कामाय पतिः प्रियो भवती' त्यादि। आत्मनः सुखाद्यर्थं तत्सम्पादकतया पतिपुत्रादेरनुरागविषयत्वरूपं प्रियत्वमुक्तम्। तत्रात्मपदं स्वात्मपरमेव नत्वीश्वरपरं तस्य सुखाभावात्। तत्रानन्दं मन्यमानानामपि तदानन्दस्य नित्यत्वाभ्युपगमात्, तस्य उद्देश्यत्वासम्भवात्, 'सर्वेषामेव भूतानां नृप स्वात्मैव वल्लभ' इत्यादावपि स्वात्मन एव निरुपाधिप्रियत्वाभिधानात्। एवञ्च स्वात्मन एवोपक्रान्ततया 'आत्मा वा अरे' इत्यादिश्रुत्या स्वात्मनः श्रवणादेरेव मोक्षहेतुता प्रत्याय्यते, न तु परमात्मन' इति। "**आत्मनः साक्षात्कारस्य**" जीवात्मनः साक्षात्कारस्य। "**तथात्वं**" मोक्षहेतुत्वम्। "**एतावदेवे**"ति पूर्वोक्तश्रुतिप्रतीकधारणम्। "**वित्तिचतुष्टयमि**"ति। ज्ञानचतुष्टयमित्यर्थः।

ननु कथं तादृशार्थे प्रकृतश्रुतीनां तात्पर्यग्रह इत्याकांक्षायामाह "**तत्त्वमसीत्यादी**"ति। तत्त्वमसीति श्रुतिवाक्ये हि तत्पदं परमात्मपरं त्वंपदञ्च जीवात्मपरं प्रकृते तयोः सामानाधिकरण्यात् परमात्मपदाभिधेयपरमेश्वराभिन्न जीवात्मा बोध्यते। तादृशवाक्यार्थबोधस्य च मुक्तावुपयोगितायाः श्रुत्यादिसिद्धत्वाज् जीवात्मनः परमेश्वराभिन्नत्वेन चिन्ताया मुक्तिप्रयोजकत्वसामञ्जस्यमिति भावः। न चैवं नैयायिकनये तस्याः श्रुतेरप्रामाण्यमिति वाच्यम् तस्याः श्रुतेर्वैज्ञानिकवैशिष्ट्ये तात्पर्यकल्पनया कथञ्चिदेव प्रामाण्यस्योपपादयितुं शक्यत्वात्। **तत्तात्पर्यम्**—तेषां श्रुत्यादीनां तात्पर्यम्। **गौरवादिति**—तथा चेश्वरलौकिकसाक्षात्कारो मोक्षहेतुरिति कैश्चित्-कल्प्यो व्युदस्त इति भावः।

1 A श्रुत्या इदानीन्तु ईश्वरादभिन्नत्वेन जीवात्मविषयकभावानायाः (for श्रुत्यादीनाञ्चेश्वराभिन्नत्वेन जीवात्मभावनायाः) 2 C omits परम्परया 3 B हेतुत्वे (for प्रयोजकत्वे) 4 A न त्वीश्वरात्म० (for न त्वीश्वरविषयक)

**तत्त्वज्ञानन्तु कस्यचिद् योगाभ्यासवशात्, कस्यचित् काशीमरणात्, कस्यचिद् भगवन्नामग्रहणपूर्वकमरणादितो जायते। नचैषां परस्परव्यभिचारेण कारणत्व[1]मसम्भवीति वाच्यम्, अनायत्या कारणवैशिष्ट्यं[2] कार्यतावच्छेदककोटौ निवेश्य[3] व्यभिचारवारणात्[4]।**

**यत्तु तृणारणिमणिन्यायात् कार्यनिष्ठवैजात्यो[5]पगमाद् व्यभिचारनिवारणम्[6], तन्न, काशीमरणगङ्गामरणाद्युभयजन्ये उभयजन्यतावच्छेदक[7] वैजात्यसमावेशा[8]ज्जातिसाङ्कर्य[9]प्रसङ्गेन जातिकल्पनाया असम्भवात्। न चैकवैजात्यमेव**

---

नन्वेवमीश्वरज्ञानस्य मुक्तिहेतुताबोधकश्रुतीनां का गतिरित्याकांक्षायामाह "**ईश्वरविषयकज्ञानस्ये**"त्यादि। **परम्परये**त्यादि। स्वात्मतत्त्वज्ञानसम्पादनद्वारा, न तु साक्षादित्यर्थः। नैयायिकसिद्धान्ते जीवात्मनि परमात्माभेदज्ञानस्य भ्रमरूपत्वेऽपि स्वात्मतत्त्वज्ञानसम्पादनद्वारा मुक्तिप्रयोजकत्वं नासम्भवि। दृष्टं हि रज्जौ भुजगभ्रमादीनां भयादिसम्पादनद्वारा जीवनरक्षार्थं सुदूरापसरणादौ प्रयोजकत्वं लोकप्रपञ्चे। अत एवोक्तं **गदाधरेण**—'तमेव विदित्वे'त्यादिश्रुतेर्जीवब्रह्माभेदचिन्तारूपयोगाभ्यासस्य स्वात्मसाक्षात्कारसम्पादनद्वारा मुक्त्युपयोगितायामेव योगाभ्यासविध्येकवाक्यतानुरोधेन तात्पर्यकल्पनौचित्यात्।' इति ; ईश्वरसाक्षात्कारस्य मुक्तिहेतुत्वमतेऽपि ईश्वराभिन्नत्वेन जीवात्मचिन्तनरूपज्ञानस्य भ्रमात्मकस्यापि तादृशसाक्षात्कारजनकत्वं तत्त्वमसीति श्रुतिवाक्यतात्पर्येणोपपादितं गदाधरेण 'आत्मनानात्वमते जीवात्मब्रह्मणोरभेदज्ञानं यद्यपि भ्रमस्तथापि तादृशस्यैव तस्य मोक्षहेतुत्वं श्रुतिसिद्धं न विरुध्यत इति चेन्न जीवब्रह्माभेदचिन्तनरूपस्य योगस्याभ्यासेन मोक्षकारणमीश्वरसाक्षात्कारः सम्पद्यत इत्यत्रैव तत्त्वमसीति वाक्यतात्पर्येण यथाश्रुतस्य तमेव विदित्वेत्यस्य सामञ्जस्यादिति वदन्ति' इति सन्दर्भेण।

नन्वेतावता ग्रन्थेन निरुक्तरूपं जीवात्मतत्त्वज्ञानमेव मुक्तौ कारणमिति स्थितम्। तदिदं तत्त्वज्ञानं कुतः कारणादुत्पद्यत इत्याकांक्षायां तस्य विविधकारणप्रभवत्वं वर्णयति "**तत्त्वज्ञानन्त्वि**"त्यादिना। एतेन काशीमरणादीनां तत्त्वज्ञानद्वारा परम्परयैव मुक्तिप्रयोजकत्वं व्याख्यातम्। एवञ्च 'ब्रह्महत्यां नरः कृत्वा पश्चात् संयतमानसः। प्राणांस्त्यजति यः काश्यां स मुक्तो नात्र संशयः।' इत्यादि काशीखण्डाद्युक्तवचनानां 'रथस्थं वामनं दृष्ट्वा पुनर्जन्म न विद्यते।' इत्यादि शास्त्रवचनानाञ्च तत्त्वज्ञानद्वारा परम्परयैव मुक्तिप्रयोजकत्वे तात्पर्यमवसेयम्।

"**परस्परव्यभिचारेणे**"ति। यत्र योगाभ्यासेन तत्त्वज्ञानं, न तत्र काशीमरणादि, यत्र

1 B हेतुत्वं 2 B C D read वैशिष्ट्यस्य 3 C D निवेशनेन (for निवेश्य) 4 C D व्यभिचाराभावात् 5 D ० मणिन्यायेन कार्यवैजात्यो० 6 B reads तद्वारणम् ( for व्यभिचारनिवारणम् ) 7 A omits जन्यतावच्छेदक 8 A reads समावेश 9 A B D omit जातिसांकर्यं

**तत्राभ्युपेयत[1] इति वाच्यम्, विनिगमनाविरहादुभयवैजात्यप्रयोजकोभयसत्त्वेनोभयजात्यवच्छिन्नोत्पत्तौ[2] बाधकाभावात् ।**

---

काशीमरणादिना तत्त्वज्ञानं न तत्र योगाभ्यास इत्येवं तत्तत्कारणाभावेऽपि कार्योत्पत्तिमूलकमिथोव्यभिचारेणेत्यर्थः ।

"**कारणवैशिष्ट्य**"मिति । अव्यवहितोत्तरत्व-सामानाधिकरण्योभयसम्बन्धेन तत्तत्कारणवैशिष्ट्यमित्यर्थः । तथाहि तादृशोभयसम्बन्धेन योगाभ्यासविशिष्टतत्त्वज्ञानं प्रति योगाभ्यासत्वेन काशीमरणादिविशिष्टतत्त्वज्ञानं प्रति च काशीमरणत्वादिना कार्यकारणभावकल्पनादेकविशिष्टे अपरस्य कारणत्वाभावादेव निरुक्तव्यभिचारस्य निरस्तत्वान्न निरुक्तकारणत्वमसम्भवीति भावः ।

लाघवतस्तत्तदुपायजन्यतत्त्वज्ञानेषु पृथक् पृथग् वैजात्यमभ्युपेत्य तस्य कार्यतावच्छेदकत्वकल्पनया व्यभिचारवारणमाशङ्क्य निषेधति "**यत्त्वि**"त्यदिना । "**तृणारणिमणिन्याया**"-दिति, तृणारणिमणीनामिव तृणारणिमणिस्थल इवेति वा । तथाहि वह्निं प्रति तृणारणिमणीनां पृथक् पृथक् कारणत्वस्य दर्शनात् तत्र तत्र व्यभिचारवारणाय यथा तार्णत्वादिरूपं तत्तद्वह्न्यादिगतं वैजात्यमङ्गीकृत्य तार्णत्वाद्यवच्छिन्नं प्रति तृणत्वादिना कारणत्वकल्पनेन व्यभिचारो वार्यते, तथा प्रकृतेऽपि योगाभ्यासादिरूप-पृथक्पृथक्कारणाव्यवहितोत्तरजायमानेषु तत्त्वज्ञानेषु पृथक् पृथग् वैजात्यमभ्युपेत्य तादृशवैजात्यावच्छिन्नं प्रति योगाभ्यासत्वादिविशेषविशेषधर्मपुरस्कारेण कारणत्वकल्पनादेव व्यभिचारः शक्यनिरास इति भावः ।

जातिसाङ्कर्यप्रसङ्गेन तादृशवैजात्यकल्पनानुपपत्त्या प्रकृतं कारणत्वकल्पनानिषेधमुपपादयति "**तन्न, काशीमरणे**"त्यादिना । "**जातिकल्पनाया असम्भवा**"दिति । तादृशतादृशकार्यतावच्छेदकत्वाभिमतवैजात्यकल्पनाया असम्भवात् । प्रकृते एकत्रापरवैजात्यनिरूपितसाङ्कर्यप्रसङ्गात् साङ्कर्यस्य जातिबाधकताया न्यायतन्त्रानुमतत्वात् । प्रकृते साङ्कर्योपपत्तिश्च,—काशीमरणाजन्ये गङ्गामरणजन्ये तत्त्वज्ञाने गङ्गामरणप्रयोज्यस्य वैजात्यस्य सत्त्वात् काशीमरणप्रयोज्यस्य वैजात्यस्य चासत्त्वात् गङ्गामरणप्रयोज्यवैजात्ये काशीमरणप्रयोज्यवैजात्यव्यभिचारस्य, गङ्गामरणाजन्ये काशीमरणजन्ये तत्त्वज्ञाने काशीमरणप्रयोज्यवैजात्यस्य सत्त्वाद् गङ्गामरणप्रयोज्यवैजात्यस्य चासत्त्वात् तत्रैव काशीमरणप्रयोज्यवैजात्यसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वरूपस्य काशीमरणप्रयोज्यवैजात्याव्यापकत्वस्य तदुभयजन्ये च तत्त्वज्ञाने तयोरुभयोरेव वैजात्ययोः समावेशाद् गङ्गामरणप्रयोज्यवैजात्ये काशीमरणप्रयोज्यवैजात्यसामानाधिकरण्यस्य समन्वयादिति । एवमन्यत्राप्युपपत्तिः प्रतिपत्तव्या ।

1 All the Mss read नचैकवैजात्यमुपेयते तत्रेति (for नचैकवैजात्यमेव तत्राभ्युपेयत इति) 2 B reads उभयप्रयोजकहेतुसत्त्वेन उभयवैजात्यसत्त्वे (for उभयवैजात्यप्रयोजकोभयसत्त्वेन उभयजात्यवच्छिन्नोत्पत्तौ)

**न च चित्र[1] रूपवन्नानाहेतुसत्त्वे[2] विलक्षणमेव कार्यमुपेयत इति वाच्यम्[3], तन्नियामककार्यकारणभावान्तराणां प्रत्येकजन्यतावच्छेदकावच्छिन्नोत्पत्तिवारणाय प्रतिबध्यप्रतिबन्धकभावानाञ्च कल्पनाप्रसङ्गेन महागौरवात् ।**

---

तत्तदुभयजन्ये तत्त्वज्ञाने एकैकमात्रं वैजात्यविशेषमङ्गीकृत्य उभयोः सामानाधिकरण्यस्य विघटनात् सांकर्यविरहसम्भावनां निरस्यति "**नचैक**"मित्यादिना । एकमिति एकमात्रमित्यर्थः । "**तत्रे**"ति उभयजन्ये तत्त्वज्ञान इत्यर्थः । एवञ्चोभयोस्तत्र तत्र सामानाधिकरण्याभावादेव न सांकर्यशंका । तेन तादृशतादृशवैजात्यस्यैव तत्तत्कार्यतावच्छेदकतया व्यभिचारवारणं नाशक्यसम्भावनमिति भावः ।

"**विनिगमनाविरहा**"दिति । असति बाधके नियामकसत्त्वे विशिष्टकार्योत्पादस्यावश्यम्भावितया तत्र तत्रोभयवैजात्यावच्छिन्नकार्योत्पादस्यापोहितुमशक्यत्वेन तत्र तत्र एकैकमेव वैजात्यं नापरमभ्युपेयत इत्यस्य सुतरां युक्तिबाह्यत्वादित्यर्थः । तदेवमेकत्रापरनिरूपितसामानाधिकरण्यस्यानपायात् सांकर्यसमन्वयेन तादृशवैजात्यकल्पनाऽसम्भव इति भावः ।

तादृशोभयकारणसमवधानस्थलीयतत्त्वज्ञानरूपकार्ये चित्ररूपवदेकं वैजात्यमङ्गीकृत्य सांकर्याभावमाशंक्य तत्प्रतिषेधं प्रस्तौति "**न चेत्या**"दिना । "**चित्ररूपव**"दित्यादि । तथाहि यथा नानारूपवद्भिस्तन्तुप्रभृतिभिरारब्धे पटादौ स्वाश्रयसमवेतत्वसम्बन्धेन तत्तद्रूपावच्छिन्नकारणानां विभिन्नजात्यवच्छिन्नश्वेतपीतादिरूपाणां सत्त्वेऽपि न तत्र श्वेतपीतादिरूपोत्पत्तिः । किन्तु चित्राख्य-तत्तद्विजातीयविलक्षणरूपोत्पत्तिरेव, तथैव प्रकृतेऽपि विभिन्नजातीयतत्त्वज्ञानकारणीभूतकाशीमरणाद्यनेकसम्बलनस्थले नैकाधिकविभिन्नजात्यवच्छिन्नकार्योत्पत्तिः किन्तु चित्रत्ववदेकविलक्षणवैजात्यावच्छिन्नकार्योत्पत्तिरेव । एवञ्च नैकत्र वैजात्यद्वयसमावेशप्रयुक्तसांकर्येण वैजात्यकल्पनाव्याघाताशंकेति भावः ।

न च प्रकृते दृष्टान्तस्थलेऽपि चित्ररूपोत्पत्तये समपेक्षितानां श्वेतत्वपीतत्वाद्यवच्छिन्नतत्तद्रूपाणां तत्तज्जात्यवच्छिन्ननियामकानां परम्परया तत्र सत्त्वेऽपि कथं न तत्र तत्तज्जात्यवच्छिन्नकार्योत्पत्तिरिति चेत् विभिन्नजातीयरूपं प्रति श्वेतपीतादिरूपाणां स्वाश्रयसमवेतत्वसम्बन्धेन प्रतिबन्धकत्वादिति गृहाण । वस्तुतस्तु प्रकृते श्वेतपीतादिरूपव्यक्तीनां स्वविजातीयरूपं प्रति न प्रतिबन्धकत्वं, किन्तु स्वभिन्न-रूपत्वन्यूनवृत्तिजात्यवच्छिन्नं प्रति स्वाश्रयसामानाधिकरण्यसम्बन्धेन रूपत्वन्यूनवृत्तिजातेरेव प्रतिबन्धकत्वं कल्प्यम् । सम्बन्धघटकसामानाधिकरण्यञ्च समानकालावच्छिन्नं ग्राह्यम्, तेन एकविधरूपनाशोत्तरमवयवेषु रूपान्तरोत्पत्त्या यत्रावयविनि तादृशमेव रूपान्तरं जायते तत्र पूर्वरूपगतजातेः प्रतिबन्धकत्वापातान्न तादृशरूपान्तरोत्पादानुपपत्तिः । एतेन रूपव्यक्तीनां पूर्वोक्त-

1 B तत्र (for चित्र) 2 A हेतुं समुद्दिश्य (for सत्त्वे) 3 A reads साम्प्रतं (for वाच्यम्)

**अथ काशीमरणादीनां तत्त्वज्ञानोत्पादकत्वे[1] किं मानम्[2] ? न च तेषां मुक्तिप्रयोजकताबोधकश्रुत्यादिरेव तत्र मानम्[3], तेषां[4] तत्त्वज्ञानानुत्पादकत्वे मुक्तिप्रयोजकत्वानुपपत्तिरिति वाच्यम्, तादृशश्रुतीनां साक्षान्मुक्तिजनकत्व एव[5] तात्पर्योपगमात्। अन्यथा शरीरान्तरतत्त्वज्ञानादिकल्पनाया महागौरवात्[6]।**

---

रीत्या प्रतिबन्धकत्वस्वीकारे प्रतिबन्धकताया: स्वरूपसम्बन्धात्मिकाया: प्रतिव्यक्तिभिन्नत्वेन प्रसक्तं प्रतिबन्धकताया आनन्त्यमपि प्रत्युक्तं भवति।

नचैवं नानाविजातीयरूपवदवयवारब्धपटाद्यवयविनि चित्ररूपस्याप्यनुपपत्तिः, चित्ररूपस्य तत्रत्यावयवगतरूपविजातीयत्वादिति वाच्यम्, पूर्वोक्तप्रतिबध्यप्रतिबन्धकभावान्तःपातिनि प्रतिबध्यतावच्छेदके स्वभिन्नत्ववच्चित्रत्वजातिभिन्नत्वस्यापि निवेशनीयत्वात्।

नच नानारूपसमवाय्यवयवारब्धचित्ररूपोत्पादकल्पनास्थले अवयविनि चित्ररूपमनङ्गीकृत्य विभिन्नावयवावच्छेदेन तत्रैव विभिन्नरूपमङ्गीक्रियतां, तावता निरुक्तप्रतिबध्यप्रतिबन्धकभावस्य चित्ररूपस्य च कल्पनादिप्रसूतं महागौरवं शक्यमपाकर्तुमिति वाच्यं, तत्कल्पनाया: सत्यपि प्रदर्शितमहागौरवप्रतिपक्षत्वे सकलरूपव्याप्यवृत्तित्वनियमनिरस्तत्वात्। नच तथापि तत्र तत्र क्लृप्तातिरिक्तं चित्ररूपमनभ्युपेत्य अवयवरूपैरेव रूपप्रतीतिरुपपाद्यतामिति वाच्यम्, तथा सति तत्र तत्रावयविन: पटादेर्द्रव्यस्य वहि:प्रत्यक्षत्वानुपपत्तेः, उद्भूतरूपसमवायिन एव द्रव्यस्य वहि:प्रत्यक्षत्वनियमात्। समवायसम्बन्धेनोद्भूतरूपस्य वहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे कारणत्वस्य सिद्धत्वात्। नच तत्र स्वाश्रयसमवेतत्वसम्बन्धेनैवोद्भूतरूपवत्त्वस्य कारणत्वं कल्प्यतां, तावतैव तत्रानुपपत्तिनिवृत्तेरिति वाच्यम्, तत्र तादृशपरम्परासम्बन्धेन कारणत्वकल्पने गौरवप्रसङ्गेन लाघवत: समवायेनैवोद्भूतरूपवत्त्वस्य द्रव्यबहि:प्रत्यक्षकारणत्वसिद्धया अवयविनि रूपास्वीकारे तस्य वहि:प्रत्यक्षगोचरताया: सुतरामुपपादयितुमशक्यत्वादिति ध्येयम्।

एवञ्च प्रकृते तादृशचित्ररूपदृष्टान्तेन काशीमरणगङ्गामरणाद्यनेककारणजन्ये तत्त्वज्ञाने शक्यं विलक्षणं वैजात्यमभ्युपगन्तुमिति भाव:। तत्र दोषमाह **"तन्नियामके"**त्यादिना। तन्नियामकेति—तादृशवैजात्यावच्छिन्नविलक्षणकार्यनियामकेत्यर्थ:। **"कार्यकारणभावान्तराणाम्"**—क्लृप्ततत्त्वज्ञानकाशीमरणाद्येकैकहेतुघटितकार्यकारणभावातिरिक्तानां, काशीमरणगङ्गामरणेतिद्वयादिघटितकार्यकारणभावानामित्यर्थ:। कल्पनाप्रसङ्गेनेत्युत्तरेण तदन्वय:।

1 B जनकत्वे (for उत्पादकत्वे) 2 CD read मानाभाव: (for किं मानं) 3 B काशीमरणादीनां मुक्तिप्रयोजिका श्रुतिरेव मानं (for तेषां मुक्ति:......श्रुत्यादिरेव तत्र मानं) 4 A inserts अन्यथा before तेषां 5 B D read मुक्तौ साक्षात्कारणत्व एव (for साक्षान्मुक्तिजनकत्व एव) 6 All the Mss read कल्पनाया गौरवात्

विचित्रकार्यस्य विचित्रकारणजन्यत्वनियमादिति भावः। कार्यकारणभावान्तराणामिति बहुवचनेन क्वचित् काशीमरणादिद्वयस्य क्वचित् तत् त्रयस्य क्वचित्तच्चतुष्टयस्य तादृश-विलक्षणकार्यजनकत्वात् तत्र तत्र विभिन्नकार्यकारणभावानां कल्पनात् तत्रत्यं कार्यकारणभाव-बाहुल्यं सूच्यते। "प्रत्येके"ति। काशीमरणाद्येकैकेत्यर्थः। "प्रतिबध्यप्रतिबन्धकभावानाम्" —गङ्गामरणाद्येकैकमात्रप्रयोज्यतत्तद्वैजात्यावच्छिन्नं प्रति काशीमरणत्वादिना कल्पनीयाना-मिति शेषः। तदेवं तत्त्वज्ञानरूपकार्यगतवैजात्याङ्गीकारेण व्यभिचारवारणस्याशक्यतया कार्यतावच्छेदककोटावनायत्या कारणविशेषाणां वैशिष्ट्यं निवेश्यैव व्यभिचारवारणमिति सुस्थितम्।

अथ मानं विना वस्त्वसिद्धेः काशीमरणादीनां तत्त्वज्ञानजनकत्वे मानमनुसन्धत्ते "अथे"त्यादिना। "तेषा"मिति। काशीमरणादीनामित्यर्थः श्रुत्याद्बीत्यादिपदेन 'जन्मान्तर-सहस्रेषु युञ्जन् योगी यदाप्नुयात्। तदिहैव परो मोक्षो मरणादधिगम्यते'। 'ब्रह्महत्यां नरः कृत्वा पश्चात् संयतमानसः। प्राणांस्त्यजति यः काश्यां स मुक्तो नात्र संशयः'। इत्यादिकाशीखण्डादिस्मृतिर्गृह्यते।

"मुक्तिप्रयोजकत्वानुपपत्तिरिती"ति। 'अत्र हि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे, येनासावमृती भूत्वा मोक्षी भवती'ति श्रुत्यादिभिस्तारकब्रह्मोपदेशसहकारेण तत्त्वज्ञानजननद्वारा मुक्तिप्रयोजकत्वं काशीमरणस्येति सूचितम्। तथाहि, अमृती भूत्वा मोक्षी भवतीत्यत्रामृतं मुक्तिहेतुतत्त्वसाक्षात्कारः, स चोपदेशादसम्भवी, शब्दस्य साक्षात्-काराजनकत्वादतस्तत्र काशीमरणमेव जनकमभ्युपेयम्। एवञ्च काशीमरणे शास्त्रोक्त-मुक्तिप्रयोजकतोपपन्नेनिति। तदेवं तत्त्वज्ञानं द्वारीकृत्यैव काशीमरणादीनां मुक्तिं प्रति प्रयोजकत्वात्, तेषां तत्त्वज्ञानजनकत्वास्वीकारे न तत्र निरुक्तरूपमुक्तिप्रयोजकत्वमुपपद्यत इति भावः।

"तादृशश्रुतीनाम्"—काशीमरणादौ मुक्तिप्रयोजकताबोधकत्वेनाभिमतानां शास्त्राणाम्। "साक्षा"दिति। तत्त्वज्ञानमद्वारीकृत्येत्यर्थः। तथाच काशीमरणादीनां तत्त्वज्ञानानुत्पादक-त्वेऽपि न तादृशश्रुत्याद्यर्थबाध इति भावः। "अन्यथे"ति। तादृशश्रुत्यादीनां तत्त्वज्ञानं द्वारीकृत्य मुक्तिप्रयोजकतापरत्वे इत्यर्थः। "शरीरान्तरतत्त्वज्ञानादिकल्पनाया" इति। तथाहि 'अत्र हि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे' इत्यादिश्रुत्या प्रतिपादितस्य रुद्रकर्तृकतारकोपदेशस्य मृतस्योपदेश्यत्वासम्भवेन अनायत्या मुमूर्षुतादशायामेवाभ्युपगमे कृतेऽपि तदनन्तरं काशीमरणरूपहेतो मृतशरीरावच्छेदेन न शक्यं तत्त्वज्ञानमभ्युपगन्तुमत-स्तदर्थं तारकब्रह्ममन्त्रोपदेशादनन्तरं शरीरान्तरं तत्रैव च तत् तत्त्वज्ञानं कथञ्चित् कल्पनीयम्, येन नोपपत्तिव्याघात इति भावः।

अत्र तत्त्वज्ञानस्योभयमतसिद्धतया स्वमते परमतापेक्षया तत्त्वज्ञानकल्पनाप्रयुक्तं गौरवं यद्यपि नोपपद्यते, तथापि परमतासिद्धशरीरान्तरावच्छिन्न-तत्त्वप्रत्यक्षस्य परमता-सिद्धस्य कल्पनाप्रयुक्तमेव प्रकृते गौरवमुपपन्नमिति ध्येयम्।

न च मुमूर्षुतादशायां शब्दात्मकतारकमन्त्रोपदेशाद् दशमस्त्वमसीत्यादित इव कथञ्चित्त-च्छरीरावच्छेदेनैव साक्षात्कारसम्भवेन शरीरान्तरस्वीकरणमप्रयोजनमिति वाच्यम्, तस्य

**न च काशीमरणादितः साक्षान्मुक्तिस्वीकारे तादृशमुक्तौ तत्त्वज्ञान-हेतुतायां व्यभिचारः[1]। एवं तत्त्वज्ञानादिजन्यमुक्तौ काशीमरणादीनामपि[2]। गोवधादिजन्यतावच्छेदकजात्या सङ्करप्रसङ्गेन मुक्तिप्रतियोगिदुरित[3] निष्ठ-वैजात्यस्य कार्यतावच्छेदकतया [4] कल्पयितुमशक्यत्वादिति वाच्यम्, काशीमरणा-**

---

तत्त्वज्ञानद्वारा मुक्तेः काशीमरणहेतुकत्वानुपपत्तिपराहतत्वात्। काशीमरणादौ मुक्ति हेतुताप्रतिपादक श्रुतिस्मृत्यादीनां श्रुतिसिद्धे तदानीन्तनतारकमन्त्रोपदेशे निरुक्तमुक्तिहेतु-तापरत्वकल्पने पूर्वशरीरावच्छेदेनापि तत्त्वज्ञानस्याभ्युपगन्तुं शक्यतया गौरवपरीहारस्तु निरुक्तश्रुत्यादीनां लाक्षणिकत्वाद्यापातेन प्रत्युक्तः। यदि च तदानीं श्रुतिसिद्धेन तारकोप देशेन काशीमरणस्यान्यथासिद्धया काशीमरणे तत्त्वज्ञानहेतुत्वमेव नास्तीति सुतरामनायत्या श्रुत्यादीनां लाक्षणिकत्वं सोढव्यमिति विभाव्यते, तदा तच्छरीरावच्छेदेनापि तत्त्वज्ञानस्या-भ्युपगन्तुं शक्यत्वेन नोक्तगौरवप्रसङ्गः पदं धत्ते।

परन्तु तन्मते बहुत्र लक्षणादोषात् काशीमरणस्य मुक्तिहेतुतायाः श्रुत्याद्यनुमतत्व-सिद्धया तदर्थं क्लृप्तकारणत्वेन निरुक्तान्यथासिद्धिविरहान्न तद्व्याघात इति ध्येयम्। **"तत्त्वज्ञानहेतुतायां व्यभिचार"** इत्यादि। एतच्च अमृतीतिश्रुतिर्मृतिदुःखशून्यार्था, रुद्रकर्तृकशब्दात्मकतारकमन्त्रोपदेशस्य न तत्त्वसाक्षात्कारजनकत्वमिति मतमभ्युपेत्य। अन्यथा तु गङ्गामरणादिस्थले निरुक्तव्यभिचारो बोध्यः काशीमरणस्थले तदनुपपत्तेः। अत्रायं भावः, यत्र शास्त्रादिना विभिन्नधर्मविशिष्टानामनेकेषां कारणता प्रत्याय्यते, तत्र तेन तेन विभिन्नधर्मेण कार्यं प्रति कारणताया उपगन्तव्यतया प्रकृते मुक्तित्वेन काशीमरणत्वादिना पृथक् पृथगेव कार्यकारणभावकल्पना प्राप्ता। किन्तु प्रकृतमते काशीमरणादिजन्यमुक्तिस्थले मुक्तित्वावच्छिन्नकारणीभूततत्त्वज्ञानविरहेण, तत्त्वज्ञानादि-जन्यमुक्तिस्थले च मुक्तित्वावच्छिन्नकारणीभूतकाशीमरणादिविरहेण व्यभिचारात् तेन तेन रूपेण कार्यकारणभावकल्पनैवासम्भवेति।

ननु निरुक्तकार्यकारणभावेषु प्रतिकार्यकारणभावं मुक्तित्वस्य तुल्यतया कार्यता-वच्छेदकत्वे स्यादेवोक्तरीत्या व्यभिचारापातः, परं तदेव न, ध्वंसात्मकमुक्तिप्रतियोगिनि दुरिते वैजात्यविशेषानङ्गीकृत्य विशेषविशेषवैजात्यघटितधर्म एव तत्र तत्र कार्यतावच्छेदको-वाच्यस्तत एव न व्यभिचारप्रसङ्ग इत्यपि मतं दूषयितुमाह **"गोवधादी"**त्यादि।

**"सङ्करप्रसङ्गेने"**ति। तथाहि यत्र काशीमरणजन्यमुक्त्यात्मकध्वंसप्रतियोगि दुरितं ब्रह्मवधजन्यं तत्र तद्गतप्रकृतवैजात्यस्य गोवधजन्यतावच्छेदकजातिव्यभिचारित्वं तत्त्वज्ञाना-दिजन्यमुक्त्यात्मकध्वंसप्रतियोगिनि गोवधजन्यदुरिते स्वसमानाधिकरणभेदप्रतियोगिताव-

---

1 B reads हेतुताव्यभिचारः (for हेतुतायां व्यभिचारः) 2 B omits काशी-मरणादीनामपि 3 A reads दुःख (for दुरित) 4 A reads तत्त्वज्ञानजन्यतावच्छेद-कतया (for कार्यतावच्छेदकतया)

**दीनां तत्त्वज्ञानजनकत्वमते**[1] [2]**योगाभ्यास-काशीमरणादिहेतुतायां व्यभिचारेण**[3] **तत्रैवात्रापि कारणवैशिष्ट्यं निवेश्यैव व्यभिचारस्य वारणीयत्वात्। वैजात्य-कल्पनायास्तत्रापि दूषितत्वात्।**

---

च्छेदकत्वलक्षणं गोवधजन्यतावच्छेदकजात्यव्यापकत्वम्, यत्र च काशीमरणजन्यमुक्त्यात्मक-ध्वंसप्रतियोगि दुरितं गोवधजन्यं तत्र तादृशवैजात्यस्य गोवधजन्यतावच्छेदकजातिसामानाधिकरण्यमिति प्रकृते गोवधजन्यतावच्छेदकजातिसांकर्योपपत्तिः। एवमेवमन्यत्रान्यत्रापि बोध्यम्। एवञ्च सांकर्यस्य जातिबाधकतया तादृशवैजात्यविशेषाणां कल्पयितुमशक्यतया तादृशतादृशवैजात्यघटितध्वंसत्वावच्छिन्नं प्रति काशीमरणत्वादिरूपविशेषविशेषधर्मपुरस्कारेण कार्यकारणभावकल्पनयापि न व्यभिचारः शक्यनिरास इति भावः।

तादृशतादृशवैजात्यकल्पनेन मुक्तिं प्रति तत्त्वज्ञानादिहेतुतायां व्यभिचारस्याशक्य-निरासत्वेऽप्यन्यथैव व्यभिचारं निरस्य दोषं निवर्तयति "**काशीमरणादीना**"मित्यादिना।

"**मते**"इत्यादि। "**व्यभिचारेणे**"ति। तथाहि काशीमरणादीनां तत्त्वज्ञानजनकत्व-मते क्वचित् काशीमरणेन क्वचित् पुरुषोत्तमदर्शनेन क्वचिच्च योगाभ्यासादिना तत्त्वज्ञानं जन्यते, तदनुरोधात् तत्त्वज्ञानं प्रति काशीमरणत्वादिविशेषविशेषरूपेण पृथक् पृथगेव कारणत्वं कल्पनीयम्। एवञ्च काशीमरणोत्तरं जायमाने तत्त्वज्ञाने योगाभ्यासादीनामपि कारणत्वेन तत्पूर्वं योगाभ्यासादिरूपकारणविरहाद् व्यभिचारप्रसङ्ग इति भावः।

"**तत्रैवे**"ति। यथा तत्र अव्यवहितोत्तरत्वघटितोभयसम्बन्धेन काशीमरणविशिष्ट-तत्त्वज्ञानं प्रति काशीमरणत्वेन योगाभ्यासादिविशिष्टतत्त्वज्ञानं प्रति च योगाभ्यासत्वादिना कारणत्वं कल्पयित्वा व्यभिचारो वार्यते तथेत्यर्थः। अत्रापि काशीमरणादीनां मुक्ति-जनकत्वमतेऽपि। **कारणवैशिष्ट्यमिति**। अव्यवहितोत्तरत्वघटितोक्तसम्बन्धेन काशीमरणादि-रूपतत्तत्कारणवैशिष्ट्यमित्यर्थः। तथाहि, अव्यवहितोत्तरत्वघटितोक्तसम्बन्धेन काशीमरण-विशिष्टमुक्तिं प्रति काशीमरणत्वेन, तथैव योगाभ्यासादिविशिष्टमुक्तिं प्रति योगाभ्यासत्वा-दिना कारणत्वकल्पनात् काशीमरणविशिष्टमुक्तिं प्रति योगाभ्यासादीनां योगाभ्यासविशिष्ट-मुक्तिं प्रति च काशीमरणादीनामकारणत्वेन न व्यभिचार इति।

ननु प्रकृते साध्यविकलो दृष्टान्तः, तत्र तत्त्वज्ञानगतवैजात्यकल्पनयैव व्यभिचारस्य वारयितुं शक्यत्वान्महता गौरवेण कार्यतावच्छेदके तथा कारणवैशिष्ट्यस्यानिवेशादित्या-शंक्याह "**वैजात्यकल्पनाया**" इत्यादि। "**दूषितत्वा**"दिति। 'तत्र काशीमरणगङ्गामरणा-द्युभयादिजन्ये उभयजन्यतावच्छेदकवैजात्य-समावेशाज् जातिसाङ्कर्यप्रसङ्गेन जातिकल्पनाया असम्भवा' दिति प्रागुक्तग्रन्थेनेति शेषः।

अथेदानीं युक्त्या तत्त्वज्ञानापेक्षया साक्षादेव काशीमरणादीनां मुक्तिहेतुत्वमपोह्य तत्त्वज्ञानद्वारैव मुक्तिहेतुत्वं तत्सम्पादकतया च तेषां तत्त्वज्ञानजनकत्वं प्रतिपादयति

1 A मतेऽपि 2 C D insert तत्र before योगाभ्यास 3 A reads व्यभिचारस्या-वश्यकतया (for व्यभिचारेण)

**मैवम्, तमेव विदित्वातिमृत्युमेति, नान्यः पन्था विद्यतेऽयनाय इति श्रुत्या तत्त्वज्ञानं विना न मुक्तिरिति प्रतिपादनात् काशीमरणादिस्थलेऽपि तत्त्वज्ञानमावश्यकमेव[1]। एवं तत्त्वज्ञान[2]विशिष्टमुक्तित्वापेक्षया लाघवात्[3] किञ्चिदविशेषितस्य मुक्तित्वस्य तत्त्वज्ञान[4]जन्यतावच्छेदकत्वे[5] सिद्धे तादृश-**

---

"**मैव**"मित्यादिना। "**तत्त्वज्ञानं विना न मुक्ति**"रित्यस्य मुक्तिस्तत्त्वज्ञाननिरूपितव्याप्तिमतीत्यर्थः। एतेन यत्र यत्र मुक्तिस्तत्र तत्रैव तत्त्वज्ञानस्यावश्यकतया काशीमरणादिस्थलेष्वपि तत्त्वज्ञानस्यावश्यकत्वमुपपादितं भवतीति ध्येयम्। **तत्त्वज्ञानविशिष्टे**ति। अव्यवहितोत्तरत्वसम्बन्धेनेति शेषः। "**लाघवा**"दित्यादि। तथाहि—मुक्तिनिष्ठा तत्त्वज्ञानजन्यता किञ्चिद्धर्मावच्छिन्ना जन्यतात्वात्, मुक्तित्वमात्रस्य तादृशजन्यतावच्छेदकत्वे लाघवमिति लाघवज्ञानानुगृहीतेन निरुक्तानुमानेन मुक्तित्वमात्रस्य तादृशजन्यतावच्छेदकत्वसिद्धिरिति भावः।

"**तादृशकारणत्वोपपादकस्ये**"ति। मुक्तित्वमात्रावच्छिन्नकार्यतानिरूपिततत्त्वज्ञानत्वावच्छिन्नकारणत्वोपपत्तिप्रयोजकस्येत्यर्थः। तथाहि—यदि काशीमरणप्रयोज्यमुक्तिस्थले काशीमरणेन तत्त्वज्ञानं न जन्यते, तदा तत्र तत्त्वज्ञानस्य कारणान्तराभावेन तत्त्वज्ञानानुत्पत्त्या व्यभिचारेण निरुक्तं कारणत्वमेव नोपपद्यत इति। काशीमरणात् तत्त्वज्ञानस्वीकारे च तथा व्यभिचारासम्भवात्तदुपपत्तिरविघ्नितप्रसरा भवतीति भावः। एवं योगाभ्यासपुरुषोत्तमदर्शनादिस्थलेऽपि तत्तज्जन्यतत्त्वज्ञानस्य तादृशकारणत्वोपपादकत्वमवगन्तव्यम्।

"**तन्नियामके**"त्यादि। तस्य काशीमरणादिजन्यतत्त्वज्ञानस्य नियामकं निर्वाहकं प्रयोजकमित्यर्थः, यत् कारणत्वं काशीमरणादिगतं तत्त्वज्ञानकारणत्वं तत्कल्पनाया इत्यर्थः। तथाहि यदि काशीमरणादिकं तत्त्वज्ञानं प्रति कारणं न स्यात् तदा तत्र तत्र तत्त्वज्ञानस्य कारणान्तराभावेन तत्त्वज्ञानमेव नोत्पद्येतेति भावः। न च काशीमरणस्थले श्रुतिसिद्धस्यैव तारकब्रह्ममन्त्रोपदेशरूपकारणान्तरस्य विद्यमानत्वात् तेनैव काशीमरणस्यान्यथासिद्ध्या न तस्य कारणत्वसम्भव इति वाच्यम्, तस्य साक्षात्कारकारणत्वमभ्युपेयते चेत्तदैवायं दोषः। तदेव प्रकृते नाभ्युपेयत इत्यादेरुक्तत्वात्। केचित्तु तत्र तत्र काशीमरणपदं काशीमरणजन्यतारकब्रह्ममन्त्रोपदेशपरमेव, तस्य च तत्त्वज्ञानजनकत्वं श्रुतिसिद्धमेवेति प्राहुः। "**फलमुखे**"त्यादि। फलमुखं गौरवं न दोषायेति नियमस्य सकलतान्त्रिकानुमतत्वादिति भावः।

ननु मैवमित्यादिना युक्तमुत्पश्याम इत्यन्तग्रन्थेनोपपादितं सर्वमेवेदं 'तत्त्वज्ञानं विना न मुक्ति'रिति सिद्धान्तसव्यपेक्षं, स चायं सिद्धान्तस्तादृशश्रुतौ विदित्वेत्यनन्तरमेवकार-

1 D inserts कल्पनं before आवश्यकमेव 2 D reads काशीमरणादि (for तत्त्वज्ञान) 3 B D omit लाघवात् 4 A omits तत्त्वज्ञान 5 D कार्यता (for जन्यता)

**कारणत्वोपपादकस्य[1] काशीमरणादिजन्यतत्त्वज्ञानस्य कल्पनाया[2] स्तन्नियामककारणत्वकल्पनायाश्च फलमुखगौरवसम्पादकत्वेनादोषत्वमित्यपि युक्तमुत्पश्यामः[3] । एतेन लाघवानुरोधात्तादृशश्रुतेरर्थान्तरपरता[4] कल्पनमपि परास्तम् ।**

---

योजनादिप्रयासगौरवाक्रान्तस्ततो यथाश्रुते द्वितीयान्ततत्पदार्थेनैवकारार्थान्वयात् तदितराविषयकतद्विषयकवेदनानन्तरं मुक्तिमेतीत्येव तादृशश्रुत्यर्थो लाघवेनानुगृहीतो भवति, तत् कुतस्तरां तदर्थपरीहारेण तादृशश्रुतेः प्रकृतार्थाभ्युगम इत्याकांक्षायामाह "**एतेने**"त्यादि । एतेन फलमुखगौरवसम्पादककल्पनाया अदोषत्वेनेत्यर्थः । "**लाघवानुरोधा**"दिति । तमेव विदित्वेत्यादिश्रुतिघटकद्वितीयान्ततत्पदोत्तरप्रयुक्तैवकारस्य विदित्वेतिपदानन्तरं योजनायां प्रयासगौरवमङ्गीकृत्य तद्विषयकवेदनानन्तरमेव मुक्तिमेतीत्यर्थकल्पनामपेक्ष्य यथाश्रुतरूपेण द्वितीयान्ततत्पदार्थान्वय्येवकारार्थमादाय तदितराविषयकतद्विषयकवेदनानन्तरं मुक्तिमेतीत्यर्थकल्पनायां प्रयासलाघवरूपविनिगमकबलादित्यर्थः । "**तादृशश्रुतेः**" —'तमेव विदित्वे'त्यादिश्रुतेः । "**अर्थान्तरपरतेति**" । तदितराविषयकतद्विषयकवेदनानन्तरं मुक्तिमेतीत्यन्यार्थपरतेत्यर्थः । प्रकृते गौरवस्य फलमुखत्वञ्च सामान्यतो मुक्तित्वावच्छिन्नं प्रति तत्त्वज्ञानत्वेन कारणत्वमिति कार्यकारणभावे जन्यतावच्छेदकलाघवरूपविशिष्टफलप्रयोजकत्वरूपमवगन्तव्यम् । तथाहि निरुक्तश्रुतौ तमेवेत्येवकारस्य व्यत्यासेन योजनया तदर्थस्य वेदनानन्तर्यान्वयेनैव 'तत्त्वज्ञानं विना न मुक्ति' रिति सिद्धान्तसिद्धया मुक्तौ तत्त्वज्ञानव्याप्यत्वमवसीयते, तत एव च मुक्तित्वावच्छिन्ने तत्त्वज्ञानव्यभिचारविरहेण मुक्तित्वमात्रस्यैव तत्त्वज्ञानजन्यतावच्छेदकत्वकल्पनायाः शक्यत्वेनावच्छेदकलाघवरूपं फलं सम्पद्यते इति प्रकृतगौरवस्य फलमुखत्वमुपपन्नं भवतीति भावः ।

"**परास्तमि**"ति । तदेवं विदित्वेत्यनन्तरमेव तमेवेतिद्वितीयान्ततत्पदोत्तरप्रयुक्तैवकारस्य योजनया सर्वत्रैव मुक्तिपूर्वं तत्त्वज्ञानस्यावश्यम्भावप्रत्ययेन काशीमरणादिस्थलेऽपि काशीमरणादिना तत्त्वज्ञानस्य जननमनायत्या कल्पनीयमिति युक्तिबलोपात्तमेव सिद्धं काशीमरणादीनां तत्त्वज्ञानजनकत्वमिति भावः ।

एतावता प्रबन्धेन तत्त्वज्ञानस्य कर्मविनाभूतस्यैव साक्षान्मुक्तिकारणत्वमित्यायाति । तच्च—

> विदिते परतत्त्वे तु समस्तैर्नियमैरलम् ।
> तालवृन्तेन किं कार्यं लब्धे मलयमारुते ।
> ज्ञानामृतरसो येन सकृदास्वादितो भवेत् ।
> स सर्वकार्यमुत्सृज्य तत्रैव परिधावति । इति
> न केवलेन योगेन प्राप्यते परमं पदम् ।

1 C ०त्वोपपादिकायाः (for ०त्वोपपादकस्य) 2 B C काशीमरणादितस्तत्त्वज्ञानकल्पनायाः 3 D reads श्रीहरिः सम्पूर्णोऽयं मुक्तिवादः after उत्पश्यामः. 4 B omits परता.

**यत्तु स्वाश्रमविहितसन्ध्यावन्दनादिसहकृतमेव तत्त्वज्ञानं निःश्रेयसहेतुः। तथाच स्मृतिः—"उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः। तथैव ज्ञान-कर्मभ्यां प्राप्यते ब्रह्म शाश्वतम्। इति, ज्ञानं प्रधानं न[1] च कर्महीनं कर्म प्रधानञ्च न बुद्धिहीनम्। तस्मात्तयोरेव भवेत् प्रसिद्धिर्नह्येकपक्षो विहगः प्रयाति" इति।**

---

ज्ञानन्तु केवलं सम्यगपवर्गफलप्रदम्। इत्यादिस्मृतिभिः 'नास्त्यकृतः कृतेनेत्यादि'-श्रुतिभिश्चानुगृह्यते।

भट्टप्रभृतयस्तु कर्मसहितस्यैव तत्त्वज्ञानस्य मोक्षकारणतामाचक्षते। तत्पक्षमधिक्षिप्य स्वं पक्षं व्यवस्थापयितुं प्रस्तौति "**यत्त्वि**"त्यादि। स्वाश्रमविहितेत्यनेन परकीयाश्रमविहित-कर्मव्यवच्छेदः। तेन सन्न्यासाद्याश्रमगतानां गृहस्थाश्रमादिविहितविशेषक्रियाननुष्ठानेऽपि न क्षतिः।

"**सन्ध्यावन्दनादिसहकृतमेव तत्त्वज्ञानं निःश्रेयसहेतुरित्य**"नेन तत्त्वज्ञानस्य निःश्रेयसं प्रति तादृशसन्ध्यावन्दनादिसहकारेणैव कारणत्वमुक्तम्। तच्च तादृशसन्ध्यावन्दनादि-समवधानप्रयुक्तफलोपधायकत्ववत्त्वरूपम्। निरुक्तसमवधानव्याप्यप्रकृतफलोपधायकत्वलक्षणं वा। एतेन '**ज्ञानं प्रधानं न च कर्महीन**' मिति शास्त्रं समर्थकत्वेनोपयुक्तं भवति। प्रधानमित्यस्य निरपेक्षं मुक्तौ कारणमित्यर्थकत्वात्।

ननु 'ज्ञानं प्रधानं न च कर्महीनं कर्म प्रधानञ्च न बुद्धिहीन' मित्यादिस्मृत्या तत्त्वज्ञानस्य मुक्तिरूपकार्यजनने कर्मणः सहकारित्वं कर्मणस्तादृशकार्यजनने च ज्ञानस्य सहकारित्वमिति लभ्यते। एवञ्च 'कर्मणैव हि संसिद्धिमास्थिता जनकादय' इत्यादि-स्मृतिविरोधः, कर्मणैवेत्येवकारेणान्यव्यवच्छेदार्थकेन ज्ञाननिरपेक्षकर्मणो मुक्तिहेतुताप्रति-पादनादिति चेन्न, 'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इत्यादिश्रुत्या तत्त्वज्ञानं विना न मुक्तिरित्यर्थस्य प्रतिपादनात् श्रुतिस्मृत्योर्विवादे श्रुतेरेव बलीयस्तया तदनुरोधेन तत्रार्थान्तरस्य कल्पनात्। तथाहि कर्मणैवेत्यत्र सहार्थे तृतीया, संसिद्धिपदं मुक्तिकारणीभूतसम्यग्ज्ञानपरम्। तेन 'जनकादयः कर्मसहितं तत्त्वज्ञानमेवास्थिता' इत्यर्थस्य प्रकृतस्मृतिवाक्यप्रतिपाद्यत्वान्नोक्तविरोधावकाशः। स्थलान्तरेष्वप्येवमेवार्थान्तर-कल्पनादिना विरोधः समाधेयः।

"**उभाभ्यामेवे**"त्यादिस्मृतिवचने 'प्राप्यते ब्रह्म शाश्वत' मित्यत्र, क्वचित् 'लभते परमं पद' मिति, क्वचित् 'जायते परमं पद' मिति, क्वचिच्चान्यत्र 'सह मोक्षोऽपि जन्यत' इति पाठभेदाः समुपलभ्यन्ते। तेषु सर्वेष्वेवार्थतः प्रायेण साम्यात्तद्विचारे वयमुदास्महे।

"**तस्मात्तयोरेवे**"त्यादि। तस्मात् कर्मासहकृतस्य तत्त्वज्ञानस्य तत्त्वज्ञानासहकृतस्य कर्मणो वा मुक्तौ प्रधानत्वाभावात्। **तयोः** ज्ञानकर्मणोरुभयोरेव। "**प्रसिद्धिः**"—प्रकृष्टा सिद्धिः, मुक्तौ कारणत्वेन प्रमितिरिति यावत्। प्रकृतवाक्यार्थं वैधर्म्येण समर्थयितुमाह

1 B reads ननु (for नच)

**तदसत्; तादृशकर्मणां तत्त्वज्ञान[1] प्रतिबन्धकदुरितनिवर्तकतया प्रागपेक्षितत्वेनापातत उपकारकतयैव उभाभ्यामित्युपपत्तेस्तेषां मुक्तिकारणत्वे मानाभावादिति[2] ।**

---

**न ह्येकपक्ष** इत्यादि । तथाहि यथा विहग एकमात्रेण पक्षेण वियति सञ्चरितुं नार्हति, तथैव जीव एकेन कर्मणा एकेन तत्त्वज्ञानेन वा मुक्तिमासादयितुं नार्हति, किन्तु मिथो मिलिताभ्यामेव ताभ्यामिति भावः ।

तदिदमुक्तमद्वैतब्रह्मसिद्धिकृता सदानन्दयतिनापि ज्ञानकर्मसमुच्चयखण्डनप्रकरणे पूर्वपक्षविधया, यथा—'भट्टास्तु—उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः । तथैव ज्ञानकर्मभ्यां सह मोक्षोऽपि जन्यते' । इति हारीतवचनात्, तत्प्राप्तिहेतुर्विज्ञानं कर्म चोक्तं महामुने । इति स्मृत्यन्तराच्च कर्मणोऽपि मोक्षसाधनत्वश्रवणाज् ज्ञानकर्मसमुच्चयादेवात्मनोजडबोधात्मकस्य नित्यं ज्ञानं नित्यं सुखञ्चोदेति । ततश्च विषयविशेषानपेक्षया नित्यज्ञानेन नित्यसुखाभिव्यक्तिर्मुक्तिरित्याहु' रिति ।

त्रिदण्डिवेदान्तिनोऽपि तथैव ज्ञानकर्मसमुच्चयवादिन इत्यपि तद्वचनादेव लभ्यते, यथा—'एवं त्रिदण्डिनोऽपि जीवब्रह्मणोर्वास्तवभेदाभेदमभ्युपेत्य ज्ञानकर्मसमुच्चयाभ्यामादेव कारणात्मके ब्रह्मणि कार्यात्मकस्य जीवस्य कर्मवासनासहितभेदांशनिवृत्तिर्मोक्ष इति वदन्ति' । इति । तदेवं भट्टत्रिदण्डिप्रभृतय एव ज्ञानकर्मसमुच्चयवादिन इति बोध्यम् ।

अथ यत्तुकल्पोक्तं भट्टादिसिद्धान्तं युक्त्या प्रतिषिध्य स्वीयसिद्धान्तं संवर्धयितुमाह "**तदस**"दित्यादि ।

तन्मतस्यासत्त्वे हेतुमाह "**तादृशकर्मणामि**"त्यादिना । तादृशकर्मणां स्वाश्रमविहितसन्ध्यावन्दनादिकर्मणाम् । "**तत्त्वज्ञानप्रतिबन्धकदुरितनिवर्तकतया**"—मुक्तिकारणीभूततत्त्वज्ञानानुत्पादप्रयोजकपापनिवृत्तिसाधनतया । "**प्रागपेक्षितत्वेन**"—तत्त्वज्ञानात् पूर्वतरमावश्यकत्वेन । "**आपातत उपकारकतयैवे**"ति । आरादुपकारकतयैव परम्परया प्रयोजकतयैवेति यावत् । "**उभाभ्यामित्युपपत्ते**"रिति । 'उभाभ्यामेव पक्षाभ्या' मित्यादिग्रन्थार्थोपपत्तेरित्यर्थः । तथाहि 'तथैव ज्ञानकर्मभ्या' मित्यत्र तृतीयार्थः साक्षात्परम्परासाधारणप्रयोजकत्वं तन्निरूपितप्रयोज्यत्वं वा । तेन ज्ञानगतं साक्षात्प्रयोजकत्वं कर्मगतञ्च परम्परया प्रयोजकत्वं तत्तन्निरूपितप्रयोज्यत्वं वा समुपादाय तत्रत्यग्रन्थार्थोपपत्तिः प्रतिपत्तव्या । तादृशकर्मणां दुरितनाशकत्वे 'सन्ध्यामुपासते ये तु नियतं शंसितव्रताः । विधूतपापास्ते यान्ति ब्रह्मलोकमनामय' मित्यादिस्मृतयः प्रमाणतया स्मरणीयाः । "**तेषा**"—निरुक्तसन्ध्यावन्दनादिकर्मणां । "**मुक्तिकारणत्वे**"—मुक्तिं प्रति साक्षात् कारणत्वे । "**मानाभावा**"दिति । उभाभ्यामित्यादिस्मृतिवाक्यस्थतृतीयादीनां सर्वत्रैव तादृशपारम्परिकप्रयोजकत्वरूपार्थपरत्वात् प्रमाणान्तरस्य चासम्भवादित्यर्थः । एवं ज्ञानकर्मसमुच्चयवादे निरस्ते सिद्धं सन्ध्यावन्दनादिकर्मासहकृतस्यैव तत्त्वज्ञानस्य मुक्तिं प्रति साक्षात्कारणत्वमिति भावः ।

1 C reads ०ज्ञानं and inserts प्रति before प्रतिबन्धक 2 A reads संक्षेपः, इति मुक्तिवादरहस्यम् after मानाभावादिति ।

**जीवात्मनः परमात्मनि लयो मोक्षः। लयो लिङ्गशरीरापगमः। लिङ्ग-शरीरञ्च एकादशेन्द्रियाणि, पञ्च महाभूतानि, सूक्ष्ममात्रया सम्भूयावस्थितानि जीवात्मनि सुखदुःखावच्छेदकानीति दण्डिन इति संक्षेपः।**

---

नचैवं 'कर्मणैव हि संसिद्धि' मित्यादिगीतास्मृतेः प्रागुक्तकर्मसाहित्यघटितार्थपरि-कल्पनाऽसङ्गतिरिति वाच्यम्; सिद्धान्ते तस्या वक्ष्यमाणार्थान्तरपरत्वात्। तथाहि कर्मणा कर्मयोगेन फलाभिसन्धानं विना परमेश्वरार्पणबुद्धया वा कृतेन कर्मणा प्रयोजकेनेति यावत्। संसिद्धिं सम्यग्भूतं ज्ञानं तत्त्वप्रमितिमिति यावत् संसिद्धिं मोक्षमिति वा, आस्थिताः प्राप्ताः। उभयत्रैव कर्मणां परम्परया प्रयोजकत्वस्य 'तादृशकर्मणां तत्त्वज्ञानप्रतिबन्धके'त्यादिमूलप्रती-केन सूचितत्वादिति ध्येयम्।

अथेदानीं दण्डिवेदान्तिमतसिद्धं मुक्तिस्वरूपमुपक्षिपति **"जीवात्मन"**इत्यादिना। दण्डिवेदान्तिनो द्विविधाः, एकदण्डिनस्त्रिदण्डिनश्चेति। एकदण्डिशब्दस्य त्रिदण्डिशब्दस्य च व्युत्पत्तिभेदो यथा—एकः दण्डः ज्ञानरूपः, स प्राशस्त्येन विद्यते येषां ते एकदण्डिनः' प्राशस्त्यार्थयोगान्मत्वर्थीयप्रत्ययः साधुः। त्रयो दण्डाः—वाग्दण्डः कायदण्डो मनोदण्डश्चे-ति, ते प्राशस्त्येन विद्यन्ते येषां ते त्रिदण्डिनः। अत्रापि पूर्ववन्मत्वर्थीयप्रत्ययस्य साधुत्वम्। प्राशस्त्यरूपविशेषार्थापरिग्रहे 'न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेदर्थप्रतिपत्तिकर' इत्यनु-शासनस्य प्रकृते मत्वर्थीयप्रत्ययबाधकताप्रसङ्गात्। एकदण्डिस्वरूपं यथा परमहंसोपनिषदि 'ज्ञानदण्डो धृतो येन एकदण्डी स उच्यते। काष्ठदण्डो धृतो येन सर्वाशी ज्ञानवर्जितः। स याति नरकान् घोरान् महारौरवसंज्ञकान्। इति। अज्ञानतत्कार्ययोर्दमनसाधनत्वाज्ज्ञान-स्यापि दण्डत्वमुपपन्नं भवति।

एकदण्डिनां विशेषं वर्णयन् काण्वायनः प्राह 'तत्र परमहंसा नाम एकदण्डधरा मुण्डा-स्तथा कौपीनवाससोऽव्यक्तलिङ्गा अव्यक्ताचारा अनुन्मत्ता उन्मत्तवदाचरन्तः शिखायज्ञो-पवीतत्रिदण्डकमण्डलुकपालानाञ्च त्यागिन' इति। 'शिखासूत्राणां युक्तत्वायुक्तत्वाभ्यामेक-दण्डित्रिदण्डिनोर्लौकिको भेदो बोध्य' इति नवमुक्तिवादटीकायां **शिवरामः**। 'एकदण्डी त्रिदण्डी वा' इत्यादिस्मृतिष्वपि स्पष्टं सम्प्रदायद्वयमङ्गीकृतमुपलभ्यते।

त्रिदण्डिस्वरूपवर्णनाप्रकरणे दक्षः प्राह— 'वैणवेन त्रिदण्डेन न त्रिदण्डीति कथ्यते। अध्यात्मदण्डयुक्तो यः स त्रिदण्डीति कथ्यते। वागादिदण्डयुक्तस्तु प्रत्यगात्मन्यवस्थितः। परब्रह्मणि लीनो यः स त्रिदण्डी व्यवस्थितः।' इति। **भास्कराचार्यो**ऽपि स्वीयब्रह्मसूत्र-भाष्यं त्रिदण्डिनामाचारपरत्वं प्रत्यपीपदत् 'स्मृतौ च मननादौ त्रिदण्डयज्ञोपवीतादिनियमात् उत्तमाश्रमः स्वरूपतो धर्मतश्च निर्ज्ञात इति', इत्येतद्ग्रन्थसन्दर्भेण, 'सर्वापेक्षा च यज्ञादि-श्रुतेरश्ववद्' इति सूत्रभाष्ये च 'अत्रापि कर्मत्यागो नास्ती'त्यादिग्रन्थप्रतीकेन। त्रिदण्डिनां वाग्दण्डादिदण्डत्रय—स्वरूपमाह दक्षः—'वाग्दण्डे मौनमातिष्ठेत् कायदण्डे त्वनीहता। मानमस्य तु दण्डस्य प्राणायामो विधीयते।' इत्यनेन।

मुक्तिस्वरूपादिविषये तेषामुभयेषां भेदः **श्रीगदाधर**भट्टाचार्येण नवमुक्तिवादे स्पष्ट-तयैव प्रत्यपादि यथा,—'एकदण्डिनो वेदान्तिनस्तु यदुपाध्यनवच्छिन्नस्य ब्रह्मणो विशुद्धरूपता

**इति महामहोपाध्यायश्रीहरिरामतर्कवागीश-भट्टाचार्यविरचितो मुक्तिवादविचारः सम्पूर्णः ।**

**श्रीहरये नमः ।**

---

तादृशोपाधिविगम एव कैवल्यम् । तादृशोपाधिरविद्यैवेति तन्निवृत्तिरेव तत्' । इति । 'त्रिदण्डिनस्तु आनन्दमयपरमात्मनि जीवात्मनो लयो मोक्ष' इति च ग्रन्थसन्दर्भयुगलेन । तदेतन्मूलोक्तं प्रकृतमुक्तिस्वरूपं त्रिदण्डिवेदान्तिनामेवानुमतमित्यत्र न विप्रतिपत्तिः ।

ननु तत्त्वमस्यादिश्रुतिप्रमाणैः शतशो नित्येन परमात्मना समं जीवाभेदस्य व्यवस्थापितत्वात् कथं परमात्मनि जीवात्मनो लयः सम्भवतीत्याशंकापरीहारार्थमाह **"लयो लिङ्गशरीरापगम"** इति । तथाहि न खलु नित्यमनवच्छिन्नं विशुद्धरूपं परं ब्रह्म स्वरूपत एव जीवभावं भजते, किन्तु अवच्छिन्नस्वरूपेणानित्येनाविशुद्धस्वभावेन लिङ्गशरीरेणावच्छिन्नं सदेवेति प्रकृतसिद्धान्ते यथा घटविनाशे घटाकाशं महाकाशे लीयते, तथैव लिङ्गशरीररूपोपाधिनाशे लिङ्गशरीरावच्छिन्नब्रह्मरूपजीवोऽपि परब्रह्मणि लीयते । सविशेषणे हि विधिनिषेधौ विशेषणमुपसंक्रामतः सति विशेष्ये बाधे' इतिन्यायेन सोऽयं लयो लिङ्गशरीरलय एवेति । **गदाधरो**ऽप्यनयैव दिशा तमिमं पक्षं व्याचचक्षे ।

कीदृशमिदं लिङ्गशरीरं नाम, येनोपाधिनोपहितस्य जीवात्मनः परब्रह्मणि लयो मोक्ष इत्याकांक्षायामाह **"लिङ्गशरीरञ्चे"**—त्यादि । **"एकादशेन्द्रियाणि"**—चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि पञ्च बाह्यज्ञानेन्द्रियाणि, वाक्पाणिपादपायूपस्थाख्यानि पञ्च कर्मेन्द्रियाणि मनश्चेति । एतच्च बुद्ध्यहंकारयोरप्युपलक्षणम्, तयोरन्यत्र सूक्ष्मशरीरापरपर्यायलिङ्गशरीरघटकत्वश्रवणात् । तदुक्तं साख्यसूत्रे **कपिलेन** 'सप्तदशैकं लिङ्ग' मिति । तद्वृत्तावनिरुद्धभट्टः प्राह 'कतिभिस्तत्त्वैः सूक्ष्मशरीरारम्भ इत्यत्राह 'सप्तदशैकं लिङ्गम् ।' सप्तदश च एकञ्च अष्टादश । तैः लिङ्गं सूक्ष्मदेह उत्पद्यते । बुद्ध्यहंकारमनांसि पञ्च सूक्ष्मभूतानि दश इन्द्रियाणि इति ।' इति । **"पञ्च महाभूतानी"**ति । ननु यदि महाभूतानि लिङ्गशरीरघटकानि ततः किन्तत् प्रत्यक्षतो नोपलभ्यते इत्यत आह **"सूक्ष्ममात्रये"**ति । सूक्ष्ममात्रया तन्मात्ररूपेण न तु स्थूलरूपेणेत्यर्थः । तथा च महाभूतानां क्षित्यादीनां प्रत्यक्षग्रहणायोग्यसूक्ष्मतन्मात्ररूपेणैव तद्घटकत्वान्न तस्य प्रत्यक्षतः समुपलब्धिरिति भावः । **गदाधरस्तु** 'लिङ्गशरीरञ्च स्थूलशरीरबीजभूतमहदहङ्कारतन्मात्राख्यभूतसूक्ष्मैकादशेन्द्रियसमुदाय' इति ग्रन्थेन कण्ठत एव लिङ्गशरीरघटकत्वं महदहङ्कारयोः प्रत्यपीपदत् । गदाधरेण समुदाय इत्यनेन यथा तादृशसमुदायत्वावच्छिन्ने ऐकैकलिङ्गशरीरत्वपर्याप्तिः सूचिता तथैवात्रापि **"सम्भूयावस्थितानी"**त्यनेन तादृशसमुदायत्वावच्छिन्न एव सा **हरिरामेण** सूत्रिता । तादृशसमुदायश्च एकैकमहदहङ्कारतत्त्वादिघटितो प्राणः, लिङ्गशरीरमप्येकैकमेव । तयोश्च प्रकृते तादात्म्येनान्वयः । सुखदुःखावच्छेदकानीत्यस्यापि सम्भूयावस्थितेषु महदाद्यष्टादशसु तथा । तत्र सुखदुःखावच्छेदकेत्येतदुद्देश्यान्तर्गतं लिङ्गशरीरमिति तु विधेयभूतम् । नचैवं तादात्म्येन विशेष्यविशेषणयोरन्वयस्थले विशेषानुशासनासत्त्वे विशेष्यविशेषणपदयोः समानविभक्तिकत्वस्येव समानवचनकत्वस्यापि

तन्त्रत्वेन बहुवचनान्तसुखदुःखावच्छेदकपदार्थस्य सम्भूयावस्थितेषु बहुवचनान्तपदोपस्थापितेषु महदादिषु तादात्म्येनान्वयस्य निराबाधत्वेऽपि तत्रैकवचनान्तलिङ्गशरीरपदार्थस्य तादात्म्येनान्वयो दुर्घट इति वाच्यम्, वेदाः प्रमाणमित्यादिष्विव यत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसंख्याया विवक्षितत्वं तत्र विशेष्यविशेषणयोरभेदान्वये समानवचनकत्वस्यानपेक्षणात् प्रकृते निरुक्तैकैकमहदादिघटितानामष्टादशानां समुदाये एकैकलिङ्गशरीरस्यैवाभेदान्वयस्य प्रतिपाद्यत्वेन लिङ्गशरीरगतैकत्वस्याष्टादशत्वलक्षणविशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याविरुद्धस्य विवक्षितत्वेन न तत्र समानवचनकत्वापेक्षा। तदुक्तं व्युत्पत्तिवादे **भट्टाचार्येण**—'यत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसंख्याया अविवक्षितत्वं तत्र विशेष्यविशेषणपदयोः समानवचनकत्वनियमः। अत एव पुरूरवोमाद्रवसौ विश्वे देवा इत्यादौ द्वित्वविशिष्टयोः पुरूरवोमाद्रवःप्रभृत्योर्विशेषणतया विवक्षितत्वात्तद्वाचकस्य द्विवचनान्तता।' इति।

सुखदुःखावच्छेदकानीत्यत्र तु समभिव्याहृतविशेषणविभक्तेराकांक्षामात्रसम्पादकतया न संख्यार्थकत्वमतस्तादृशसंख्याया अविवक्षितत्वेन समानवचनकत्वमपेक्षितमेवेति प्रतिपत्तव्यम्।

"**सुखदुःखावच्छेदकानी**"ति। अत्र सुखदुःखावच्छेदकत्वविशिष्टेषु सम्भूयावस्थितेष्वेकादशेन्द्रियादिषु तादात्म्येन लिङ्गशरीरविधानाल्लिङ्गशरीरस्य सुखदुःखावच्छेदकत्वं लभ्यते। ततश्चावच्छेदकतासम्बन्धेन सुखदुःखोत्पत्तौ तादात्म्येन लिङ्गशरीरत्वेन कारणत्वमिति कार्यकारणभावोऽपि। एवञ्च सुखदुःखावच्छेदकतया कारणीभूतस्य लिङ्गशरीरस्य नाशे कारणाभावेनैव सुखदुःखोत्पत्तेरसम्भवितया पूर्वजातयोः सुखदुःखयोश्च स्वत एव निवृत्तत्वेन प्रियाप्रिययोरसंस्पर्शात् 'अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशत' इति श्रुत्यर्थोऽप्युपपादितो भवति।

केचित्तु, स्वमते दुःखात्यन्तनिवृत्तेर्दुःखसाधनात्यन्तनिवृत्तेर्वा मुक्तित्वमभिहितम्। तन्मतमेतन्मताविरुद्धमशक्यप्रतिषेधमकामैरपि त्रिदण्डिभिरनुमन्तव्यञ्चेति सुखदुःखावच्छेदकानीत्यनेन सूचितमिति प्राहुः। तन्नातिरमणीयम्; तादृशार्थस्य लिङ्गशरीरे दुःखमात्रावच्छेदकत्वकथनादेव लाभसम्भवे सुखावच्छेदकत्वकथनवैयर्थ्यापत्तेः। "**संक्षेप**"इति। सत्स्वपि विविधेषु बहुषु प्राचीनतन्त्रसिद्धेषु मुक्तिसिद्धान्तेषु तन्निदानभूतेषु च विचित्रेषु बहूनामपरीक्षणेन केवलकतिपयमुक्तिसिद्धान्तादीनां परीक्षणमेवात्र संक्षेपः। स च मुक्तितत्त्वं जिज्ञासमानानामपि ग्रन्थविस्तरविचारभीरूणां स्वीयग्रन्थे निरवग्रहप्रवृत्तिसम्पादनार्थमेवेति।

एतद्ग्रन्थप्रतिपाद्यवस्तुसंक्षेपः। अत्र ग्रन्थकारो नाम प्रथमत एव 'कस्तावदपवर्ग' इति शिष्यप्रश्नवाक्यमुगन्यस्य आचार्यादिसम्मतमात्यन्तिकदुःखनिवृत्तिरूपमपवर्गपदार्थं तन्निवृत्तये निबबन्ध। तत्र चात्यन्तिकत्वं स्वसमानाधिकरणदुःखप्रागभावासमानकालीनत्वं स्वसमानाधिकरणदुःखासमानकालीनत्वं वेत्याचक्षाणो लक्ष्ये तत् सङ्क्रमय्य तस्याननुगतस्वत्वघटितत्वेनाननुगमदोषमुद्भावयामास।

अथाननुगमदोषनिर्मुक्ततया कंश्चन सम्भावितं दुःखगतचरमत्वजातिघटितं 'चरम-

दुःखध्वंसोऽपवर्ग' इत्यपवर्गलक्षणं समुल्लिख्य तद्घटकचरमत्वस्य गोवधादिजन्यतावच्छेदकजातिनिरूपितसाङ्कर्येण जातित्वाभावमुपपाद्य तस्यापि स्वसमानाधिकरणदुःखप्रागभावसमानकालीनत्वरूपार्थ एव पर्यवसानात्तथैवाननुगमदोषग्रस्ततया तद्घटितमपि लक्षणं तथैव दुष्टमिति प्रतिपादयामास ।

अथ प्रथमतः स्वयमुपस्थापितस्वरूपमाचार्यादिसम्मतात्यन्तिकदुःखनिवृत्तिरूपमुक्तिलक्षणघटकमात्यन्तिकत्वमेव सम्बन्धविधयानुगमय्य सम्बन्धाननुगमस्यादोषत्वमभ्युपेत्य लक्षणदोषं निराचकार । एतेन प्रकृते वस्तुनि श्रीहरिरामस्य प्रशस्यं प्रतिभानमनुभूयते । नवमुक्तिवादप्रजापतिना श्रीगदाधरेण तु स्वग्रन्थे प्रकृतलक्षणाननुगमस्य शङ्का च समाधानञ्चेति द्वयमेव परिहृतमुपलभ्यते, तस्य कारणं मृग्यम् ।

अथ ग्रन्थकारः सांसारिकदुःखध्वंसवदात्यन्तिकदुःखध्वंसस्यापि स्वोत्तरवर्तिविभुविशेषगुणादिरूपक्लृप्तकारणबलादेव सम्भवेन तत्त्वज्ञानस्यान्यथासिद्ध्यादिदोषान्मुक्तिं प्रति हेतुत्वाभावतो मुक्त्यर्थं विशेषदर्शिनां तत्त्वज्ञाने प्रवृत्त्यनुपपत्तिमुपन्यस्य विविधयुक्तिभिरात्यन्तिकदुःखनिवृत्तेर्मुक्तिस्वरूपतां विघटय्य 'आत्यन्तिकदुरितध्वंस एवापवर्ग' इति मतं दाढर्येन प्रत्यपीपदत् । तत्र च विचारप्रसङ्गेनात्यन्तिकदुरितनाशरूपस्वाभिमतमुक्तिपदार्थस्य पुरुषार्थत्वतत्त्वज्ञानजन्यत्वादिकं सम्यक्तया निबध्नाति स्म । अत्रैव मुक्तिस्वरूपे दृढानुमतिः श्रीहरिरामस्य । नवमुक्तिवादप्रणेतुर्गदाधरस्य पुनरात्यन्तिकदुःखनिवृत्तावेव, नात्यन्तदुरितध्वंसे । प्रतिभाति चैतत् 'केचित्तु दुःखध्वंसस्य कारणान्तरादेव सम्भवेन न तस्य तत्त्वज्ञानजन्यत्व' मित्यादिरीत्या अन्येषामभिमतत्वेन तन्मुक्तित्वमतस्य सङ्कीर्तनात् । तत्र मुख्यप्रयोजनादन्यत्र मुक्तित्वस्वीकारो न्यायसूत्रादिविरोधश्चेत्यस्वरसो गदाधराभिमत इति सम्भाव्यते । हरिरामस्य तु दुःखसाधनध्वंसस्य दाढर्येन मुक्तित्वं व्यवस्थापयतोऽपि सहैव विकल्पेन क्वचित् क्वचिद् दुःखात्यन्तनिवृत्तेरपि तथात्वेन समुल्लेखात्तत्र तस्य सुतरामनभिमतिर्न प्रतिभासते । सुदृढो निर्भरस्तु तस्य दुरितात्यन्तनिवृत्तावेवेति नितरामवदातम् ।

अथ मतान्तरमधिक्षिपता हरिरामेण केवलं 'नित्यसुखाभिव्यक्तिर्मुक्ति' रिति तौतातितभट्टमतमेव खण्डनीयतया परिगृहीतम् । तत्रादौ श्रुत्याद्यर्थविचारेण युक्तिपरम्परया च तद्घटकं नित्यसुखं प्रतिषिध्य दर्शितं तेन सुमहदेव शास्त्रार्थविचारचातुर्यम् । तत्र श्रुत्यादिविरोधं युक्त्या समुपपाद्य नानाविधगौरवलाघवादिपर्यालोचनेन मुक्तिदशायामात्मनि सुखसत्त्वस्य सुखसाक्षात्कारादेश्च भट्टानुमतस्य सुदृढेन परिकरेण विरोधः कृतः । तत्प्रकरणे सर्वत्रैव भट्टमतानुगुणयुक्तिममूहमुपन्यस्य तस्य खण्डनेन स्वमतस्य सुष्ठुतया कृतं मण्डनं श्रीहरिरामेण । प्रस्तुतश्च विचित्रो विचारस्तत्त्वज्ञानदुरितध्वंसयोः तत्त्वज्ञाननित्यसुखसाक्षात्कारयोश्च कार्यकारणभावलाघवगौरवादिप्रतिसन्धानेन ।

अथ मुक्तेः कारणविचारप्रसङ्गेनात्मविशेष्यकशरीरादिभेदप्रकारकसाक्षात्कार एव मुक्तौ मुख्यं कारणम्, नात्मनिर्विकल्पकम्, न परमेश्वरसाक्षात्कारः, नापि समुच्चितं ज्ञानकर्मेत्युभयमित्यादिकं बहुतरशास्त्रयुक्तिसमुपन्यासेनोपपादितम् । काशीमरणादीनां सन्ध्यावन्दनादिकर्मणाञ्च न मुक्तिं प्रति मुख्यकारणत्वं किन्तु परम्परया प्रयोजकत्वमात्रमित्यपि सम्यक् स्थापितम् ।

अन्ते च त्रिदण्डिवेदान्तिमतसिद्धं मुक्तिसिद्धान्तं नाममात्रेण समुल्लिख्य ग्रन्थोपसंहारः कृतः। अन्यमतसिद्धानां मुक्तिस्वरूपाणां नाममात्रेणापि न कृतः समुल्लेखः। अत्र हि ग्रन्थे युक्त्या परमतं निषिध्य स्वसिद्धान्तस्थापने श्रीहरिरामस्य सुमहती तर्कप्रतिभा प्रतिपद्यत इति शिवम्।

नभोवसुवसुक्षितिप्रमितशाकसंवत्सरे
गुरोः सकरुणाशिषा कुशलमूल-पित्रोस्तथा।
समाप्तिमुपलम्भिता सपदि 'मुक्तिलक्ष्मी'रियं
चिनोतु करुणालवं कमपि वादविद्यावताम्।

राधालक्ष्मीनामधेया मदीया
पत्नी प्राप्ता मुक्तिमुक्तामकाले।
तस्या मुक्तेर्व्यक्तमन्योक्तिलोभाद्
व्याख्या नीता मुक्तिलक्ष्मीत्यभिख्याम्।

इति कोटालिपाड़ीय-काश्यपकुलमण्डन-विद्वत्प्रवीण-श्रीहरिदासतर्कतीर्थभट्टाचार्याणां
तनूजेन भट्टपल्लीय-वाशिष्ठ-महामहोपाध्याय-श्रीशिवचन्द्रसार्वभौमभट्टाचार्य-
शिष्येण महामहोपाध्यायश्रीकालीपदतर्काचार्यभट्टाचार्येण
विरचिता मुक्तिलक्ष्मीनाम्नी हरिरामतर्कवागीश-
कृतमुक्तिवादविचारव्याख्या

**समाप्ता।**

Library IIAS, Shimla
S 181.43 H 225 M-H 225 M: 1
00001018